# उपदेशमालाविशेषवृत्तिग्रन्थस्य शुद्धिपत्रकम् ।

| पत्रम् | पङ्क्तिः | अशुद्धिः | शुद्धिः |
|---|---|---|---|
| १ | ६ | सङ्गिनो | स जिनो |
| ,, | १० | दोग्घ्रो | दोग्घ्री |
| ३ | १३ | अच्छेरहिं | अच्छरेहिं |
| ५ | ४ | महदेहु | मह देहु |
| ,, | १७ | व्बुय | व्वुय |
| १६ | १५ | २४१ | २४२ |
| ,, | १६ | २४२ | २४३ |
| २७ | ५ | मेलित्त | मेलित्तु |
| ,, | १३ | तदेव | तदेवं |
| २९ | ३ | मह | मह[१] |
| ३२ | १५ | प्रोद्यते | प्रोच्यते |
| ४१ | २ | ल‿ | लद्धु |
| ४२ | ७ | सुमरे विणु | सुमरेविणु |
| ४५ | २ | उपसगषु | उपसर्गेषु |

| पत्रम् | पङ्क्तिः | अशुद्धिः | शुद्धिः |
|---|---|---|---|
| ५३ | १ | दसादाह | [१]दसादाह |
| ५४ | ५ | वीयस्स | बीयस्स |
| ५७ | ३ | लायणो | लोयणो |
| ६८ | ३ | उगाय | उग्गय |
| ६९ | ४ | थोवेण | थेवेण |
| ८९ | १ | शिरो धाम | शिरोधाम- |
| | | वसतेः | वसतेः |
| ११७ | १६ | सुन्निहिय | सन्निहिय |
| १२४ | ६ | भोगनां | भोगानां |
| ,, | ८ | घमानत्वात् | घटमानत्वात् |
| ,, | १५ | पव्यइओ | पव्वइओ |
| १२९ | १ | जयसि | [१]जयसि |
| १३३ | १० | मित्तण | मित्तेण |
| १३४ | १ | त्वच्छेद | त्वकूच्छेद |

| पत्रम् | पङ्क्तिः | अशुद्धिः | शुद्धिः |
|---|---|---|---|
| ,, | ३ | दोर्भाग्य | दौर्भाग्य |
| १३८ | १० | प्रासा | प्रासौ |
| १३९ | १ | क्रुदादयः | क्रुधादयः |
| ,, | ७ | तवशाप० | तवाशाप० |
| १४३ | ११ | कण्य | कण्यं |
| १४५ | ९ | आउयाएवि | माउयाएवि |
| १४८ | ३ | जम्बूचरित्र | जम्बूचरित्रं |
| १५० | ७ | गृहामे | गृहमे |
| १५२ | ७ | पुरन्दश्रे० | पुरन्दरश्रे० |
| ,, | १६ | घन्नं | धन्नं |
| १६१ | ६ | मोत्तण | मोत्तूण |
| १६३ | ४ | कृताऽन्यतो | कृतामन्यतो |
| १६७ | १३ | सविदित० | स विदित० |
| ,, | १४ | नवग्रह० | नवगृह० |

| पत्रम् | पङ्क्तिः | अशुद्धिः | शुद्धिः |
|---|---|---|---|
| १७२ | ६ | घणेणावि | धणेणावि |
| ,, | १३ | –धणा | –धणो |
| १७४ | ४ | अत्ता | अक्का |
| १७७ | १ | कुट्टन्य | कुट्टीन्य |
| ,, | ३ | निवड सुयाहिं | निवडसुयाहिं |
| १७८ | १२ | चमत्कारा | चमत्कारं |
| १८० | ९ | तत्त्वामा | तत्वमा |
| १८४ | १४ | श्रते | श्रते |
| १८७ | ६ | सुहया | सुहडा |
| ,, | ८ | घेत्तण | धित्तूण |
| १८८ | ३ | ज्झाणठिओ | ज्झाणट्ठिओ |
| ,, | ५ | खग्ग सिरे | खग्गसिरे |
| ,, | ९ | झाणाओ | झाणाउ |
| ,, | १५ | परिहा | परिसहा |
| १९१ | ६ | मणियं | भणियं |

| पत्रम् | पङ्क्तिः | अशुद्धिः | शुद्धिः |
|---|---|---|---|
| ,, | १४ | विजयहारे | विजहारे |
| २०० | ११ | कोशेय | कौशेय |
| २०२ | ८ | णोवविट्ठो | णोवविट्ठा |
| २०६ | ११ | ब्रह्मेन्द्रभूते-रजनिप० | ब्रह्मेन्द्रभूते-रजनि प |
| २२० | ६ | खिवेइ | खिवेह |
| ,, | १५ | अतेउर | अंतेउर |
| २२१ | १ | अत्थ | अत्थं |
| २२२ | ३ | मुनिसन्धिः | मुनिकथा |
| २२९ | १४ | गगम्मु | गकम्मु |
| २३२ | ५ | धणु | घणु |
| २३३ | ६ | सामि माइ | सामिमाइ |
| ,, | | ३३३ | २३३ पत्र |
| २४७ | ७ | चाक्ख | चोक्ख |
| २४८ | २ | णभहा | णमहा |
| ,, | ७ | पीठसन्धिः | पीठकथा |

| पत्रम् | पङ्क्तिः | अशुद्धिः | शुद्धिः |
|---|---|---|---|
| ,, | १५ | पवेशो | प्रवेशो |
| २५० | ९ | तिस्रोऽपि | तिस्रोऽपि |
| २५४ | ८ | कारणाम् | कारणम् |
| २५७ | ५ | बद्धात या | बद्धा तया |
| २६३ | १७ | १ | २ |
| ,, | ,, | जभ्मम्मि | जम्मम्मि |
| २६६ | ३ | हियासरीरं | हिया सरीरं |
| २६८ | ६ | कस(म) | कुस(म) |
| ,, | १२ | हयाए | एयाए |
| २७० | ५ | अज्जेणीए | उज्जेणीए |
| २८४ | ७ | हेउ | हेऊ |
| २९० | ५ | करित्त | करित्तु |
| २९३ | १ | यथावस्थि | यथावस्थित |
| ३०२ | १३ | अविकत्ति | अवि कत्ति |
| ३०३ | ७ | थेवो | थोवो |
| ,, | ९ | ापया | पिया |

॥ ६ ॥

| पत्रम् | पङ्क्तिः | अशुद्धिः | शुद्धिः | पत्रम् | पङ्क्तिः | अशुद्धिः | शुद्धिः | पत्रम् | पङ्क्तिः | अशुद्धिः | शुद्धिः |
|---|---|---|---|---|---|---|---|---|---|---|---|
| ३१३ | १२ | विभुत्ति | विमुत्ति | ३४३ | १० | सहलीकयं। | ।सहलीकयं | ३८९ | १३ | १६९–७० | १६८–६९ |
| ३१६ | ६ | ण्हारु | ण्हारु | ३४८ | ६ | ममंतो | ममं तो | ३९३ | १५ | खवियगी | खवियंगी |
| ३१७ | ६ | सद्दुवि | सुद्दुवि | ३५० | ३ | पिशुनैर्मर्यैं | पिशुनैर्मर्त्यैं | ३९८ | १६ | लिंगो | लिंगे |
| ३१८ | ६ | रागारीनां | रागारीणां | ३५१ | ९ | महाजइ | महाजुइ | ३९९ | ५ | कलाइ० | कराइ० |
| ,, | १६ | मुड | मुंड | ,, | १४ | परिभावओ | परिभवाओ | ४०० | ६ | विररिउं | विहरिउं |
| ३१९ | १६ | अन्नपि | अन्नंपि | ३५२ | १६ | पंचत्त | पंचत्तं | ४०४ | १ | वदिय | वंदिय |
| ३२४ | ३ | मुप्पते | मुप्यते | ३५६ | १२ | मारेज्जा | मारेज्जा ? | ४११ | ८ | त्पर्यंट | पर्यंट |
| ३२४ | ६ | क्षाररिव | क्षारैरिव | ,, | १३ | कहिय | कहियं | ४१२ | १२ | लोएऽपि | लोएऽवि |
| ३२६ | १६ | गृदीतो | गृहीतो | ,, | १७ | निज्जइ | नज्जइ | ४२१ | १२ | मांसशिनो | मांसाशिनो |
| ३२७ | १२ | शरणां | शराणां | ३५८ | १७ | महाऽत्थ | महाऽनत्थं | ४८२ | ४ | स शूक | सशूक |
| ३२९ | १० | दृढयन्त्रा | दृढयन्त्रा | ३५९ | १ | मुद्धलिउं | मुद्धरिउं | ,, | ७ | वित(न) | वि त(न) |
| ३३१ | १४ | न न ना | न ना | ३६३ | ६ | पसमभाव | पसमभावं | ४२३ | ४ | वाक्याटवा | वाक्पाटवा |
| ३३३ | ९ | मीक्ष | मोक्ष | ३७२ | ९ | देवि | देविं | ४२४ | ९ | पयतिं | पपतिं |
| ,, | ,, | निजकाङ्ग | निजकाङ्क्ष | ,, | १० | पडिकूल | पडिकूलं | ४२९ | हेडींग ४३२ नुं अवर नवर बदलवुं | | |
| ३३४ | १० | पुसेरहिं | पुरिसेहिं | ३७३ | ३ | न्ताभ्रूंशं | न्ताभ्रूशं | ४३३ | ६ | त देह | तं देह |
| ३३७ | ७ | विविन्ना | बिन्ना | ३८३ | १५ | भंजणा | वदणा | ४३४ | ३ | खधो | खंधो |

| पत्रम् | पङ्क्तिः | अशुद्धिः | शुद्धिः | पत्रम् | पङ्क्तिः | अशुद्धिः | शुद्धिः | पत्रम् | पङ्क्तिः | अशुद्धिः | शुद्धिः |
|---|---|---|---|---|---|---|---|---|---|---|---|
| ४३७ | ७ | २५३ | २६३ | ४५७ | ,, | काधादी० | क्रोधादी० | ४८७ | १० | अट्ठुएि | अट्ठिए |
| ,, | ११ | प्रात. | प्रातः | ४६० | ९ | गधे | गंधे | ,, | १३ | केसिच्चि | केसिंचि |
| ४४३ | १६ | गुरु | गुरुः | ४६१ | ३ | ऽणं | णं | ,,८ | ४ | कायं | कायँ |
| ४४६ | २ | ऽव्यम् | ऽव्ययम् | ४६२ | ६ | मेदा | भेदा–मद् | ४९२ | | द्वाः स्थितोन्त | द्वाः स्थितोऽन्त |
| ,, | १३ | मन्कुट | मुकुट | ४६३ | १३ | त्रिमिर्विशेस | त्रिभिर्विशेष | ४९६ | ९ | राजन् । | राजन् ! |
| ४४९ | १२ | अपीडि० | आपीडि० | ४६७ | १ | लिगा | लिंगा | ५०३ | १५ | विजृमि | विजृम्भि |
| ,, | ,, | बद्वस्य | बद्धस्य | ,, | १४ | एतद्वय | एतद्व्य | ५१७ | ३ | बृहंक | बृहक |
| ४५२ | २ | त्वभूनि | त्वमूनि | ४६८ | १६ | न न | नय | ,, | ९ | कर्त्तरपि | कर्त्तुरपि |
| ४५३ | १५ | ३९४ | ३०४ | ४७४ | ७ | षट | षट् | ५२२ | १० | दट्ठु | दट्ठुं |
| ४५४ | ६ | यात्याहो | यात्यहो | ४८६ | १ | भ्रष्टः | भ्रष्टस्य | ५२९ | ७ | श्रतज्ञान | श्रुतज्ञान |

# । श्री उपदेशमाला दोघट्टीवृत्तेरनुक्रमणिका ।

## प्रथम विश्रामे


पत्र

१ मंगलादि ।
३ रणसिंह कथा ।
३१ उपोद्घातः ।
३२ ऋषभपारणकसन्धिः ।
३८ चन्दनबालापारणासन्धिः ।
४५ उपसर्गेषु निष्प्रकम्पता ।
४६ गणधरविनयः ।
४७ आचार्यगुणाः ।
४८ आचार्याष्टसम्पदः ।
४९ आचार्यषट्त्रिंशत् गुणाः ।
५० आचार्यप्रवचनस्वामित्वम् ।
५१ आर्यचन्दनायाः विनयोपरिकथा ।
५२ धर्मे पुरुषज्येष्ठत्वम् ।

पत्र

५३ आदर्शगृहे भरतकेवलम् ।
५४ प्रसन्नचन्द्रराजर्षिकथा ।
६० व्यवहार–निश्चयनयपरस्पर-
सापेक्षता ।
६१ भरतस्य युगपदुभयसंदेशागमनम् ।
६२ मरुदेवीकेवलज्ञानम् ।
६३ भरतसमृद्धिः ।
६४ अङ्गारदाहकदृष्टांतः ।
६५ भरत–बाहुबलिसंग्रामः ।
६७ बाहुबलिसंयमग्रहणम् ।
६९ सनत्कुमारचक्रिकथा ।
७९ अनुत्तरसुराणामपि अस्थिरत्वम् ।
८० ब्रह्मदत्तचक्रिकथा ।
८१ ब्रह्मदत्तचक्रिपूर्वभवाः ।
१०९ विनयरत्नकथा ।


## द्वितीयविश्रामे


पत्र

११३ जा सा सा सेतिकथायां चित्रकार-
वरलाभः ।
११५ मृगावतीकथा ।
१२० स्त्रीलोलुपिसुवर्णकारः ।
१२१ पंचशतचौराणां प्रव्रज्या ।
१२२ लज्जितप्रद्योतस्य मृगावत्यै दीक्षा-
नुमतिदानम् ।
१२४ कषायाणां पुष्पफले ।
१२४ जम्बूस्वामि चरितम् ।
१२५ भवदेवदीक्षा ।
१२६ भवदेव–नागिला प्रश्नोत्तराणि ।
१२७ महिषिभूत–पुत्रप्रतिबोधः ।
१२८ उच्छिष्टभोजिदृष्टान्तेन नागिलया
स्थिरीकरणम् ।

पत्र

१२९ भवदेवस्य सागरदत्तत्वेनोत्पत्तिः ।

१३० शिवकुमारस्य सागरदत्तमुनि-
समागमः ।

१३३ चतुर्गतिदुःखानि ।

१३७ जम्बु-प्रभवचोरसंवादः ।

१३८ मधुबिन्दु दृष्टांतः ।

१३९ कुबेरदत्त-कुबेरदत्ता ज्ञातम् ।

१४२ महेश्वरदत्तज्ञातम् ।

१४४ मकरदाढा वेश्याकथा ।

१४७ भौताचार्यकथा ।

१४८ अतिलोभे वानरमिथुनकथा ।

१४९ कृतपूतना-द्यूतकारप्रसङ्गः ।

१५१ प्राप्तव्यमर्थं लभते मनुष्यः ।

१५२ सिद्धदत्तस्य राजकन्यादिप्राप्तिः ।

१५३ सुन्दरश्रेष्ठि कथा ।

१५४ हेममयूरो वायसीकृतः ।

पत्र

१५५ विजयसुजय दृष्टांतः ।

१५८ इर्ष्यालुस्थविरयोः कथा ।

१५९ विसंवादि राज्यस्थिति प्रेक्षणम् ।

१६४ कलिराज्यकथा ।

१६७ मित्रत्रितयीकथा ।

१६९ अमरसेन-प्रवरसेनभ्रातोः कथा ।

१७२ अतिलोभे लोहर्गला गणिकाकथा ।

१७७ धर्मशास्त्रे स्त्रीणां स्वभावजा दोषाः ।

१७८ साधुसमागमलाभे प्रभाकरकथा ।

१८५ सपरिवारेण जम्बूप्रभवस्वामिदीक्षा ।

१८६ सुंसुमा-चिलातिपुत्रकथा ।

१८९ अलाभपरिसहे ढंढणमुनिकथा ।

१९२ आपत्सु दृढधर्मतोपरि स्कंदकाचार्य-
कथा ।

१९६ हरिकेश मुनिकथा ।

२०१ शाल-महाशालयोः कथा ।

पत्र

२०३ गौतमाऽष्टापदारोहणम् ।

२०४ तापसानां प्रव्रज्या केवलं च ।

२०६ गौतमस्य केवलेऽधृतिः ।

२०७ वज्रस्वामिचरित्रम् ।

२२१ परिग्रहाऽपायहेतवः ।

२२२ वसुदेवपूर्वभवे नंदिषेणमुनिकथा ।

२२८ क्षमायां गजसुकुमालमुनिसन्धिः ।

२३३ जिनप्रवचने वन्दनापद्धतिः ।

२३४ तीव्रव्रताराधने स्थूलभद्र मुनिकथा ।

२४४ कलुषितचित्तस्य न वर्द्धते गुणश्रेणिः ।

२४५ गुणप्रशंसाऽसहने पीठमहापीठकथा ।

२४८ स्वगुणप्रशंसने लधुता ।

२५० शिष्यस्य गुणदोषाः ।

२५२ तामलितापसकथा ।

२५४ बालतपस्विनोऽल्पफलम् ।

### तृतीयविश्रामे

२५५ शालिभद्र महर्षिसन्धिः ।
२६२ अवन्तिसुकुमाल सन्धिः ।
२६६ एकदिवसप्रव्रज्याफलम् ।
२६७ मेतार्यमुनि सन्धिः ।
२७८ विनितशिष्यगुणाः ।
२८० गुरुपरिभवकारिदत्तसाधुकथा ।
२८२ गुरुभक्तिरागे सुनक्षत्र-सर्वानुभूति-कथा ।
२८४ गुरुपर्युपास्तिफले प्रदेशिनृपकथा ।
२८८ कालिकाचार्य-दत्तराज्ञोः यज्ञविषयक प्रश्नोत्तराणि ।
२९१ यथावस्थितधर्ममकथने मरिचि-बोधिनाशः ।
२९४ अनुमोदने बलदेव-मृग-रथकारकथा ।
२९८ पुरणर्षि सन्धिः ।
३०३ गृहिप्रसङ्गे वारत्रकमुनिकथा ।
३०९ गृहस्थानां निमित्त-मंत्रकथने तपःक्षयः ।
३१० गृहिव्रतदार्ढ्ये कमलामेला-सागरचंद्र कथा ।
३१३ धर्मदार्ढ्ये कामदेवकथा ।
३१७ रागद्वेषयोरनिष्टत्वम् ।
३१८ साम्यसुखोपरि श्लोकानि ।
३१९ गुरुप्रत्यनिक गोशालककथा ।
३२१ संयमनैरर्थ्यैककारणानि ।
३२२ क्षमायां दृढप्रहारिकथा ।
३२५ क्षमायां सहस्रमल्लाख्यानकम् ।
३२७ दुःखानुभवे विवेकीनां भावना ।
३२८ स्वजनरागत्यागे स्कन्दककथा ।
३२९ भ्रातृकोत्सवप्रवृत्तिप्रारम्भः ।
३३० पोट्टिलया तेतलिपुत्र प्रतिबोधनम् ।
३३३ श्रेणिक-कोणिककथा ।
३४१ सुलसासम्यक्त्व परीक्षा ।
३४३ श्रेणिकपूर्वभवाः ।
३४९ अभयस्य राज्यग्रहणाऽनिच्छा ।
३५० चेल्लणाशीलशङ्का ।
३५१ श्रेणिक कारागार दुःखम् पञ्चत्वम् च ।
३५३ कोणिकनरकगमनम् ।
३५४ चन्द्रगुप्त-चाणक्यकथा ।
३६४ वैरे परशुराम-सुभूमचक्रिकथा ।
३६९ आर्यमहागिरिकथा ।
३७१ मेघकुमारकथा ।
३७८ एकाकिसाधोर्न धर्मः ।
३७९ विषयरागे सत्यकिकथा ।
३८३ साधु वन्दनफले कृष्णकथा ।
३८५ क्षमायां चंद्ररुद्राचार्यशिष्यकथा ।
३८८ अंगारमर्दकाऽऽचार्यकथा ।
३९० पुष्पचूलाकथा ।

३९२ अग्निकापुत्राचार्यकथा।
३९३ भोगत्यागे कारणम्।
३९४ जघन्यादिकर्मविपाकानि।
३९५ प्रत्येकबुद्धाः।
३९६ प्रत्येकबुद्ध करकण्डुकथा।
३९८ प्रत्येकबुद्ध दुर्मुखकथा।
३९९ प्रत्येकबुद्ध नमिकथा।
४०० प्रत्येकबुद्ध नग्गइराजकथा।
४०२ सुकुमालिकाकथा।
४४४ आत्मनो दुर्दमत्वेऽष्ट रुपकाणि।
४०५ विषयास्थादोषे मंग्वाचार्यकथा।
४०७ सर्वभवाहारादीनां परिमाणम्।
४०८ भोगर्द्धेर्दूर्मोचकत्वम्।
४०९ योषिदङ्गकुत्सनीयता।
४१० महाग्रह-कामग्रहपीडा।
४१२ ज्ञानादिषु स्थितः संसारसमुद्रं तरति।
४१३ पार्श्वस्थादीनां संसर्गे दोषाः।

चतुर्थविश्रामे

४१६ ३५ मार्गानुसारिगुणाः।
४१७ श्रावकधर्मविधि-कर्तव्यानि च।
४२१ मांसभक्षणे दोषाः।
४२२ सांवत्सरिकादिपुण्यतिथि-कर्तव्यानि।
४२३ हिंसादिपापेभ्यो विरमणम्।
४२५ सुखदुःखयोः लघुलक्षणम्।
४२६ शेलकाचार्य-पन्थकशिष्ययोः कथा।
४२८ प्रतिदिनदशप्रतिबोधकनन्दिषेणकथा।
४३१ पुंडरिक-कंडरिकयोःकथा।
४३३ विशुद्धिपदं दुर्लभम्।
४३४ शशिप्रभ-शूरप्रभ भ्रातृद्वयकथा।
४३६ रणसिंहस्य उपदेशः।
४३७ आन्तरबहुमानोपरि पुलिन्द्रकथा।
४३८ श्रुतदायकेषु विनयोपरि श्रेणिककथा।
४४२ गुरुनिन्हवणे दोषाः।
४४३ सम्यक्त्व-मिथ्यात्व-स्वरूपम्।
४४५ निमेषमात्रमपि प्रमादो हेयः।
४४६ देवभवे सुख-नरके दुःखहेतू।
४४७ तिर्यग्गतिदुःखम्।
४४८ देवभवेऽपि दुःखम्।
४४९ आसन्नसिद्धिगामिलक्षणम्।
४५० संघयणकालादिहानिमनालम्ब्य यतनया वर्तितव्यम्।
४५१ द्विचत्वारिंशतैषणादोषाः।
४५२ समितयः कषायाश्च।
४५८ नोकषाय-गौरवस्वरूपम्।
४६१ इंद्रियद्वारम्।
४६२ अप्रमद-ब्रह्मचर्यगुप्तिद्वारम्।
४६४ स्वाध्याय-विनय-तपोद्वारम्।
४६७ संविग्नानां प्रभावकत्वम्।
४६८ पार्श्वस्थानां स्वरूपं-भेदाश्च।
४६९ पार्श्वस्थानां दोषस्थानानि।

४७२ संवत्सर चातुर्मास पाक्षिक तपश्चर्या।
४७६ कपटक्षपक कथा।
४७७ शुद्धालम्बनसेविसंयमसाधकाः।
४७९ ज्ञानादिषु अतिचाराः।
४८० कथं साधुरपि अनंतसंसारि ?
४८१ अगीतार्थस्य दीर्घसंसारित्वम्।
४८२ गीतार्थनिश्रां विना गुणश्रेणिर्न वर्द्धते।
४८३ ज्ञानार्थिना गुरवः आराधनीयाः।
४८४ क्रियाविकलज्ञानमकिंचित्करम्।
४८५ ज्ञानक्रियासापेक्षता।
४८६ यतिधर्मभ्रष्टस्य न श्रावकेऽपि गणना।
४८७ एकं कार्य-व्रतं खण्डयन् भवे भ्रमति।
४८८ दर्दुरदेवाऽऽख्यानकम्।
४९८ श्रेणिकनरकनिवारणप्रार्थना।
४९९ श्रेणिकसम्यक्त्वपरीक्षा।
५०० कालशोकरिकान्त्यावस्था।
५०१ सुलसकथा।
५०३ इह-परलोकयोः भङ्गकानि।
५०४ हितोपदेश श्रवणफलम्।
५०६ जमालिकथा।
५०९ हितोपदेशः।
५१७ सुवर्णप्रासादादधिकौ तपसंजमौ।
५१८ च्युतधर्मः साधुवेषेण शाशनलाघवकारी।
५१९ पार्श्वस्थादिबलवत्तरे माध्यस्थमालम्बनीयम्।
५२० संविग्नपाक्षिकलक्षणम्।
५२२ सर्वैः द्रव्यलिङ्गान्यनंतशः मुक्तानि।
५२३ जिनवचनबाह्या न प्रमाणयितव्याः।
५२४ आय-व्ययं तोलयित्वा गीतार्थो आचरति।
५२५ उपदेशमाला केषां न वैराग्यजनिका।
५२६ रणसिंहनिदर्शनम्।
५२७ ग्रन्थकर्तुरभिधेयान्तरगाथा।
५२८ केषामियं दातव्या ?।
५२९ आशीर्वाद-ग्रन्थप्रमाणम्।
५३० व्याख्याकारप्रशस्तिः।
५३१ ताडपत्रीय लेखापक-दयावटसंघ प्रशस्तिः।

॥ जयन्तु श्री वीतरागसर्वज्ञभगवन्तः ॥

# । संपादकीय निवेदन ।

श्री उपदेशमाला दोघट्टी विशेषवृत्तिना संपादनकार्य अंगे नीचे जणावेल हाथपाथीयोनो उपयोग संपूर्णतया अने आंशिकपणे करेल छे.

A संज्ञक ताडपत्रपत्रिः—खंभात श्री शान्तिनाथ हस्तलिखित ताडपत्र भंडारनी प्रति, जेना ३१२ पत्रो छे. साइझ ३६×५ इंच लंबाइ-चोडाइ, प्रतिपत्रे छ पंक्तिओ छे. ताडप्रतिमां कोइक स्थले खंडित भाग हता जे बीजी प्रतिओना आधारे अखंडित शुद्ध थइ गया छे. ए ताडप्रति सं. १३९४ मां लखाएली जणाय छे. क्यां अने कोणे लखावी ते प्रशस्तिना अन्त भागमां छपायेल छे. ताडप्रतिनो फोटो मेलववा सफलता मेलवी शकाइ नथी. आ प्रतिना आधारे विद्वद्वर्य पंडित श्री छबीलदास केसरीचन्दे छपाववा योग्य सुन्दर-शुद्ध प्रेसकोपी लखी आपी. तेमनुं स्मरण अत्र आवश्यक छे.

B संज्ञावाली हस्तलिखितप्रति संशोधनकार्यदक्षतर-साहित्यरसिक मुनिराज श्री पुण्यविजयजी म. ना संग्रहनी छे. डा. नं. २०६ प्रति नं. ९९९९. ते प्रतिनुं लखाण एकसरखुं शरुथी छेडा सुधीनुं आकर्षक अने लेखनकलानी यादी आपे एवुं सुन्दर छे. वि. सं. १५२९ वर्षे लखाएली होवा छतां जालवणी सारी होवाथी प्रति सुन्दर हालतमां छे. आ प्रतिना छेल्ला पाने वीजो कागल चोंटाडीने मूल लखावनारनुं नाम तिरोहित करी खरतरगच्छना आचार्यनुं नाम जुदा पडता अक्षरोथी स्पष्ट तरी आवे छे. प्रतिना पाना १३५, साइझ १२॥।×५ इंच लंबाइ-पहोलाइ. प्रतिपत्रमां १७ पंक्तिओ दरेक पंक्तिमां ७२ थी ८१ संख्या सुधीना अक्षरो लखेला छे. पत्र संख्या २८ तथा ९० खंडित लखाण तेटलो भाग लख्या वगरनो कोरो राखेल छे. संशोधनकार्यमां उपयोगी नीवडी छे. आ प्रतिना एक पानानो फोटो अहिं B संज्ञावालो आपेल छे.

॥ १४ ॥

C संज्ञायाली प्रति मारा परमोपकारी तारक गुरुमहाराज आगमोद्धारक आचार्य महाराज श्री आनन्दसागरसूरीश्वरजी संगृहितशास्त्रभंडार जैनानन्द पुस्तकालय गोपीपुरा सुरतनी छे. १९६३ नी सालमां लखाएली छे. लहीयाए शाही वापरवामां बेदरकारी करेली होवाथी पानाओ केटलाक परस्पर चोंटी गया छे. अक्षरो पाछल फुटेला होवाथी वांची शकाता नथी. केटलोक सारो भाग अशुद्धि मेलववा माटे उपयोगी थयेल छे. ताडप्रतिने अनुरुप लखाण छे, छतां प्रशस्ति नथी.

D. संज्ञावाली हस्तप्रति प. पू. आ. म. श्री विजयनेमिसूरीश्वरजी म. ना खंभातना भंडारनी छे पू. आ म. श्री विजयोदयसूरिजी म. तथा पू. आ. म. श्री विजयनन्दनसूरिजी म. द्वारा प्रतिप्राप्ति थइ हती. 'वि सं. १५८६ वर्षे पोष १३ दिने वृत्तिर्लिखिता ।' आ प्रतिनो फोटो D संज्ञा तरीके छपावेल छे. साइझ ११×४॥ इंच २०६ प्रतिपत्रे १५ पंक्तिओ प्रति पंक्तिमां ६० थी ७० अक्षरो, स्थिति घणी जीर्ण. केटलीक जगोपर कालाश अने पत्रो पण खंडित थइ गया छे. लिपी सारी अने शुद्ध छे.

चार प्रतिओ पैकी प्रशस्ति A संज्ञित ताडप्रतिमां छे. B मां मात्र अढी श्लोकज छे. C. D मां प्रशस्ति छे ज नहिं. बीजी हस्तप्रतिओ न मलवाथी केटलाक स्थलो शंकित रहेला छे. जुनी लीपीमां व. ब. च. ओलखवा मुश्केल पडे छे. तेमज त्थ. च्छ. ज्झ. जेवा बीजा अक्षरो प्रकरणना अनुसारे बेसाडी शकाय छे. शंकितस्थलो परिमार्जन करवा योग्य छे.

आ उपदेशमाला उपर अनेक टीकाओ पैकी अत्यार सुधीमां बे टीकाओ मुद्रित थयेली छे एक सिद्धर्षिनी, बीजी रामविजयजीनी. त्रीजी आचार्य श्री रत्नप्रभसूरिए रचेली अनेक संस्कृत-प्राकृत-अपभ्रंश भाषामय कथानकोथी विभूषित जे माटे विद्वान् उपक्रमकारे सुन्दर स्पष्टता करेली छे. आ टीकानुं महत्त्व अनोखुं छे. कथाना अर्थी माटे व्याख्यानउपयोगी आ ग्रन्थ वैराग्यनुं सुंदर पोषण करनार छे. आमां घणेभागे साधुधर्मोपदेश, कोइक जगो पर गृहस्थधर्मोपदेश, कोईक जगो पर उभय साधारण धर्मोपदेश कहेल छे.

॥ १८ ॥

मारामां आवा महान ग्रन्थो संशोधन करवानी शक्ति न होवा छतां मारा महोपकारि तरणतारण गुरुवर्य आगमोद्धारक शिला–ताम्रपत्रारुढआगमकारक श्री सिद्धक्षेत्र तलेटिमां आगममंदिरस्थापक, सूर्यपुर (सुरत) बंदरे ताम्रपत्रआगममंदिर निर्मापक आचार्य महाराज श्री आनन्दसागरसूरीश्वरजीना शुभ प्रेरणाबलना योगे संपादनतु आ प्रथम कार्य करेल छे. आधुनिक संशोधनपद्धतिनी अपेक्षाए आ संपादनमां घणी त्रुटीओ रहेवा पामी छे, परंतु महापुरुषोनुं कथन छे के 'शुभे यथाशक्ति यतनीयं' ए नियमानुसार में आ प्रयत्न कर्यो छे. वाचकवृन्द हंसदृष्टि राखी त्रुटिओ मने लखी जणावशे तो हुं भविष्यमां तेनुं परिमार्जन करीश. आ ग्रन्थ घणा वर्षो पहेलां छपाइ गयो हते, परन्तु सिन्धिग्रन्थमालामां 'छपाय छे' तेवी जाहेरात वांचवाथी ए कार्य शरु करेल नहिं. तपास करतां मालम पडयुं के छपातो नथी. त्यारबाद प्रेसकोपी तैयार करावी यथाशक्य शुद्ध करी वाचकवृन्दना करकमलमां मुकवा आजे प्रयत्न सफल थयो छे. आ ग्रन्थ संबन्धि उपक्रमना विद्वान् लेखक महाशये विद्वत्तापूर्ण अने घणा ग्रन्थोना अवलोकन आधार लइ विस्तृत निबंध लखेल छे. ते प्रथम वांचवा माटे सहुनु ध्यान खेंचुं छुं. आ ग्रन्थ संपादन करवामां हस्तलिखित प्रतिओ आपनार, उपक्रमणिका लखी आपनार, आर्थिक–मानसिक–कायिक प्रत्यक्ष–परोक्ष के अन्य प्रकारे श्रुतज्ञाननी भक्तिमां सहकार आपनार दरेकने अभिनन्दन आपी आवा अपूर्व–वैराग्यपूर्ण ग्रन्थकारना उपदेशनो आस्वाद पामी दरेक आत्मा परमगतिने पामो एज मात्र अन्तिम आकांक्षा।

वि. सं. २०१४ भाद्रशुक्ल १३ गुरु
शान्ताक्रुझ, मुंबइ ता. २५–९–५८

ली॰ आगमोद्धारक आचार्य महाराज श्री आनन्दसागरसूरीश्वर विनेयाणु,
आ. हेमसागरसूरि.

॥ नमः श्रीजिनशासनाय ॥

॥ श्रीनमस्कार–महामन्त्राय नमः ॥

# ॥ उपक्रमः ॥

विदाङ्कुर्वन्तु महामतिग्रथितपरमाप्तत्वसंवादिजिनवाणिवरिष्ठाभ्यासनेदिष्ठमोक्षाध्वसञ्चरणैकदत्तचित्ताः ! यत्-सदाशयगतानुष्ठान-विशुद्धिकरणपटिष्ठा सदुपदेशनानासुमव्रातसद्गन्धविसररूपनैकमहापुरुषजीवनप्रसङ्गोल्लेखपूता सद्धर्मकर्मालसायमानमोहव्यामूढ-जनान्तःकरणान्धन्तमसनिराकरणप्रवरप्रदीपिका स्वाख्यानुगुण्यहितकृतिप्रयोज्यसद्विशेषादरपात्रा वरेण्यतमा ह्युपदेशमालाख्यकृतिः अपश्चिमतीर्थकृच्चरमणभगवच्छ्रीमहावीरप्रभुवरदकरानन्तलब्धिभाजनभूतैः निष्कारणकरुणावरुणालयैः श्रीमद्भिर्धर्मदासगणिवरैरपार घोरसंसारवारिधिनिमज्जद्रणसिंहादिभाव्यनेकभव्यसत्त्वोद्दिधीर्षया निर्मिताऽस्ति, विदितचरमेतत्समेषां विदुषां ।

मोहोन्मादविकारवैवश्यात्मस्वरूपाननुभूतिमूलिकभवार्णवनिमज्जनक्रियां प्रतिरोध्य प्रवरतरीरूपेणात्मस्वरूपसंवेदनद्वारा जनिमृत्योरविच्छिन्नचक्रवालं विष्टभ्य विचारशुद्धिपूर्विकाचारशुद्धिञ्च सम्पाद्याबालगोपालं सर्वेषां मुमुक्षूणां जननीवद्धितवात्सल्यकारिणीं यां सम्यगवबुध्य यस्याश्च तात्पर्यार्थं सद्गुरुनिश्रया च निर्णीय के के आत्मकल्याणेप्सवः मुमुक्षुजनाः मोक्षाध्वनीना न जाताः ? । नह्यज्ञातप्रायमेतद् शास्त्राम्भोनिधिव्यालोडनक्षमाणां तात्त्विकविदुषां । अत एव चातिप्राचीनकालत आ प्रव्रज्याप्रतिपत्तेरन्यज्ञानाभ्यास-सम्पादनप्रत्यलतायाः भावेऽभावेपि सुविहितगीतार्थवर्यैरेतस्या आमूलचूलं मुखपाठ–स्वाध्यायपरावर्त्तनानुप्रेक्षादिकं समस्तसाधु–साध्वीनां दिनचर्याया अनन्यथासिद्धमङ्गं प्रस्थापितमस्तीति चाभाभिजनवृद्धजनोपज्ञा श्रुतिः श्रूयमाणाऽस्त्यासीच्च, अधुनाऽपि दृश्यते खल्वेतद्यत्–नैका संयमैकदत्तचित्ताः संयमैकजीविताश्च श्रमण्यः एतस्या उपदेशमालायाः प्रत्यहं स्वाध्यायरूपेण स्वान्तरात्मपरिणतिमपूपुषन्

पोषयन्ति च । तथा च संसारवासचकितचेतसां श्राद्धवर्याणामपीयमतीवोपगिनीत्येतदपि दोहट्टीत्यपराह्व विशेषवृत्तिकारैः श्रीरत्नप्रभसूरिवरैर्वृत्तिप्रान्त्यभागीयप्रशस्तौ समर्थितमस्ति, तथाहिः—

" यदियमुपदेशमाला, श्रावक–लोकस्य मूलसिद्धान्तः । प्रायेण पठति चायं, तदिहास्माभिः कृतोयत्नः ॥ " दोहट्टी–प्रशस्तौ. श्लो. ६

अन्यच्चैतस्या अभिधानुकरणरूपेण सार्वजनीनत्वप्रत्यायकानि नैकानि ग्रन्थरत्नानि प्रकरणानि कुलकानि चेदानीमपि समुपलभ्यन्ते । साहित्यक्षेत्रे चैतत्सुतरां प्रतीतचरं यद् विश्रुतस्योत्तमत्वेन ख्यातस्य सर्वसाधारणहितकारिणश्च ग्रन्थरत्नस्य नामसंज्ञाया अनुकरणं चेक्रियते प्रायः पाश्चात्त्यविद्वद्भिः, एवञ्चास्या नाम्नोऽप्यनुकरणजन्म विविधं साहित्यं बहूपलभ्यते, तथाहिः—

१ आत्मोपदेशमाला पत्र १०, राजनगरश्रेष्ठि–उमाभ्रातृपत्नी चंचल सत्कज्ञानकोशे.

२ उपदेशमाला " सुयदेवयं च वंदे " गाथातः प्रारभ्यमाणा गा. ५४२ जैन ग्रं. पृ. १७२. जिनरत्नकोष पृ. ५१.

३ उपदेशमाला पद्मसागरकृत. गा. ३०, जेसलमेरकोषे.

४ उपदेशमणिमाला पाटण–ज्ञानभंडारे.

५ उपदेशरत्नमाला गा. २५. लींबडी–भंडारे.

६ दानोपदेशमाला बृहट्टिप्पनिकायां.

७ ,, वृत्तिः ,, पत्र ७१.

८ धर्मोपदेशमाला. जयसिंहाचार्यकृता गा. १०२ पाटणभंडारे.

९ धर्मोपदेशमाला. स्वोपज्ञा. ६६५० श्लो. ,,

१० ,, विजयसिंहकृता १३००० श्लो. ,,

११ ,, यशोदेवकृता. गा. १०४. बृ. टि पिटर्सन रिपोर्ट च.

१२ पुष्पमाला–उपदेशमाला. मलधारी हेमचंद्राचार्यकृता गा. ६२५ मुद्रिता.

१३ पुष्पमाला उपदेशमाला, स्वोपज्ञावृत्तिः श्लो. १३८३८. मुद्रिता

,, ,, ,, ,, पाटण–भण्डारे.

१४ पुष्पमाला उपदेशमाला साधुसोमकृता लघुवृत्तिः जेसलमेर भंडारे. श्लो. २०००

१५ ,, ,, लघुवृत्तिः, श्लो. २३३० भाव. भं.

१६ ,, ,, अवचूरिः, अंचलगच्छीय जयशेखरसूरिः, पाटण-लींबडी भण्डारे.

१७ शीलोपदेशमाला, जयकीर्तिकृता. १४५ श्लो. पाटण भं.

१८ ,, वृत्तिः, जयतिलकीया, ६९४९ पा. रा. भं.

१९ ,, ,, पुण्यकीर्तिकृता ४०० डेक्कन कोलेज पूना-भण्डारे.

२० शीलोपदेशमालावृत्तिः, सोमतिलककृता रचिता १२९४ वर्षे. राजनगर, बृ. टि.

२१ हितोपदेशमाला, प्रभानन्दकृता गा. ५२६. बृ. टि.

२२ ,, वृत्तिः स्वोपज्ञा श्लो. ९५००, जेसलमेर. बृ टिप्पनिकायां च.

२३ उपदेशमणिमाला कुलकं, जिनेश्वरसूरिकृतं जैनग्रन्थावली पृ. १९७

२४ उपदेशमाला जिनदासगणिकृता गा. ५४२ छाणी-लींबडी भं. जिनरत्नकोषे.

एतेनेदं स्पष्टतरं प्रमीयते यत्-कल्याणकामि-सुयोग्यधर्माराधकाणां चेतसि परमोच्चकक्षां भजमानाया अस्या ह्युपदेशमालाया नामसंज्ञामादाय हितेप्सुत्वमूलिकसद्भावनातो विरच्यमानामौपदेशिकानां स्वग्रन्थानां महत्तां चिख्यापयिषुभिर्बहुभिर्विद्वद्भिर्विविधं साहित्यं निर्माय निर्मायमुपदेशमालाया महत्त्वमुद्घोषितम् ।

तथा च परमगुरूपदिष्टे मुक्तिप्रापके आराधनामार्गे निराबाधं सञ्चरिष्णुभिः विवेकिभिः सुतरामुपादेयभूतायाः मानसिकदुर्वृत्तिनां निग्रहे चाऽश्वानां प्रग्रहवद् दुर्दान्तवृषणाश्च नथ्यावच्छ्रेष्ठोपायभूताया अस्या उपदेशमालाया लघुबृहद्वृत्यादिस्वरूपेण नानाविधं विवरणात्मकसाहित्यं संस्कृत-प्राकृता-पभ्रंश-गूर्जरभाषादिनिबद्धं समुपलभ्यते । तेनापीदं ध्वन्यते यदयं ग्रन्थः भूयान् प्रीतिपात्रमाराधनेप्सूणां मुमुक्षूणां, तथाहि—

१ उपदेशमालावृत्तिः, प्राकृतभाषानिबद्धा, कृष्णर्षि वि. सं.
शिष्य श्रीजयकीर्त्तयः ९१३

२ ,, हेयोपादेया, ९५०० श्लो.
दुर्गस्वामिशिष्याः सिद्धर्षयः

३ ,, कर्णिका १२२७४ श्लो. नागेन्द्र-
गच्छीय-विजयसेनसूरि शिष्याः उदयप्रभाचार्याः १२९९

४ उपदेशमाला विशेष-('दोघट्टी')वृत्तिः, ११९५० श्लो.
बृहद्गच्छीय वादिदेवसूरिशिष्यश्रीरत्नप्रभसूरयः १२३८

५ उपदेशमालावृत्तिः, परमानन्दमुनयः

६ ,, ,, गुणकीर्त्तयः, तपागच्छीय सुमति-
विजयगणिशिष्याः १६६३

७ ,, ,, ७६०० श्लो. सुमतिविजयगणि-
शिष्य रामविजयाः १७८१

८ ,, ,, तपा० चारित्ररत्नगणिशिष्य
सोमधर्मगणिनः

९ ,, लघुवृत्ति ४१७० श्लो. दुर्गस्वामि शिष्याः
सिद्धर्षयः

१० ,, विवरणं पत्र १२४ सर्वानन्दमुनयः वि. सं.

११ ,, अवचूरिः, ꣸अमरचन्द्र गणिनः १५१८

१२ ,, ,, धर्मनन्दन ,, १५९९

१३ ,, ,, बृ. गच्छीयामरप्रभसूरयः

१४ ,, ,, शब्दपर्यायरूपा १५०० श्लो.
जयशेखरमुनयः

१५ ,, ,, ,, १५२९

१६ ,, बालावबोधः तपा० देवसुन्दरसूरिशिष्याः
श्रीसोमसुन्दरसूरयः १४८५

१७ ,, ,, १५४६

१८ ,, ,, ,, श्रीसत्यविजयगणि-
शिष्यश्रीवृद्धिविजयाः १७१३

१९ ,, ,, ग्रं. १५०५ पत्र ३९ लिखिता
१६९४ वर्षे

꣸ ११ H. D. वेलनकरमहोदयैः स्वसङ्कलिते जिनरत्नकोशे (भा. १. पृ. ५१) अमरचन्द्रगणिभिरेषाऽवचूरिप्रतिलिखितास्ति, न निर्मितेति डॉ. पिटर्सनमहोदयसंकलितरिपोर्ट (भा. ५) प्रभृतिग्रन्थाधारेण निर्दिष्टमस्ति, तत्त्वन्त्वत्र विज्ञा विदन्ति ।

| | | | | | |
|---|---|---|---|---|---|
| २० | ,, ,, ,, ५०००. १४९९ वर्षे लिखिता | | २६ | ,, | ग्रन्थसूत्रार्थ–कथानकानि. (संस्कृत) लिखिता १८२१ आषाढ शुक्ल १ |
| २१ | ,, | कथानकानि सिद्धर्षिटीकागतानि, वर्द्धमानसूरिः १२८४ | २७ | ,, | टीका वेलनकरकोषे नाममात्रमुल्लिखितम् |
| २२ | ,, | कथाः | २८ | ,, | ,, अवचूरिः टीका च ,, |
| २३ | ,, | ,, केसरविमलगणिशिष्याः श्रीकुञ्जरविमलाः | २९ | ,, | वार्तारूपान्तरम् खरतरग. रत्नमूर्तिशिष्यमेरुसुन्दराः |
| २४ | ,, | ,, | ३० | ,, | यन्त्रं |
| २५ | ,, | कथासमासः, (प्राकृत) शालिभद्र–शिष्याः जिनभद्रमुनयः १२०४ | ३१ | ,, | शकुनावली* |
| | | | ३२ | ,, | गाथाशतार्थवृत्तिः पत्र २७ राजनगर भंडार |

नं. १९ प्रतिः खलु श्री नित्यविनयजीवनमणिविजयपुस्तकालय–चाणस्मासत्क–हस्तलिखितभाण्डागारे ( वे ११७ प्र. ५९४ ) विद्यते, तत्र चैवं पुष्पिका :—“ सं. १६९४ वर्षे फागुण सु. १० भोमे तपागच्छाधिराजभट्टारकप्रभु श्री श्री पू. विजयाणंदसूरि-विजयराज्ये सकलपंडितसभाशृंगार पं श्री धनहर्षगणिशिष्य पं. रत्नविजयेनालेखि ” ।

नं. २० अनुयो० श्री उमेदवि.–गणिज्ञानभंडार–चाणस्मासत्कहस्तलिखितशास्त्रसंग्रहीय वे. ६५० प्र० १ रुपाया एतस्या प्रतेः प्रान्तभागे चैवं प्रशस्तिः । “ उपदेशमालाप्रकरणबालावबोधार्थः स्फुटः ॥श्री॥छ॥ सङ्ख्या सहस्र ५००० ॥छ॥ सं. १४९९ वर्षे द्वितीय आषाढ वदि एकादश्यां भौमे लिखितं ॥श्रीः॥

नं. २६ अनुयोगाचार्यश्री उमेदविजयगणिसंगृहितचाणस्माज्ञानकोषसत्क–हस्तलिखितसंग्रहीय वे. ६. प्रति ७ रुपायाः एतस्याः

प्रान्ते "सं. १८२८ वर्षे शाके सोल ९४ आषाढमासे शुक्लपक्षे १ तिथौ वार भौमे । पं. उत्तमविजयगणि लिपीकृतं श्री पार्श्वनाथजी प्रसादात् कोयलपुरपत्तने××××" रूपोल्लेखः समुपलभ्यते ।

नं. ३१ प्राच्यहस्तलिखितप्रतिसंग्रहेषु नानाविधा प्रतयः श्री उपदेशमाला-शकुनावलि-स्वरूपज्ञापिका उपलभ्यन्ते । ऐतिह्यसंशोधक-विद्वद्वर्यपूज्यमुनिराजश्री दर्शनवि. (त्रिपुटी) विरचितविश्वप्रभापराख्य-श्रीदिनशुद्धिदीपिकाग्रन्थस्य दशमे परिशिष्टे श्रीउपदेशमालागाथा-शकुनेत्यभिधयोपदेशमालायाः सकोष्टका शकुनावली न्यस्तास्ति । तथा च प्रबलप्रतापि-श्रीतपागच्छाधिपति श्रीविजयसेनसूरीश्वरप्रसादीकृतप्रश्नोत्तरसङ्ग्रहरूप-श्रीसेनप्रश्नाख्यग्रन्थे (उल्लास ४ प्र १३५. ११८ पृ. १. पं. ४) साचोर श्रीसङ्घेन पृष्टप्रश्नवके सप्तमो हि प्रश्न एवमुपलभ्यते यत्:—"तथा कश्चित्परपक्षी प्रार्थनां करोति, तदर्थमुपदेशमाला-गाथावलोकने दूषणं लगति नवेति प्रश्नः । यदि स निष्कपटतया प्रार्थनां करोति तदर्थमुपदेशमाला-गाथाऽवलोकने सर्वथा दूषणं ज्ञातं नास्तीति ।" एतेन चोपदेशमालागाथाशकुनावल्याः कियान् प्रथीयान् प्रचारो भवेदिति वितर्कणा सहजा भवति । एतच्चोपदेशमालायाः सर्वसाधारणोपयोगिता प्रतिपादनायालम्भूष्णु प्रमाणञ्च विज्ञेयं ।

एतया सूच्या निश्चप्रचं विज्ञायते :—नानाविधविनेयजनानुग्रहायेमामत्युपकारिणीमुपदेशमालां विविधव्याख्याप्रकारैः सुगमां विधित्सुभिः पूर्वाचार्यप्रभृतिभिरेतस्याः सार्वजनीनता ध्वनिता । अन्यच्च समर्थप्रतिभाशालिभिर्नव्यन्यायाम्भोनिधिव्यालोडनक्षमैर्लघुहरिभद्रसूरिभिर्न्यायविशारदन्यायाचार्यादिसद्भूतोपमाभ्राजिभिः श्रीयशोविजयवाचकपुङ्गवैः दुष्षमारप्रभावव्यावर्णकेषु सपादशत (१२५) सार्द्धत्रिशत (३५०) गाथामितेषु श्रीसीमन्धरजिनविज्ञप्तिस्तवनेषु स्थाने २ एतद्ग्रन्थगाथा साक्षित्वेनोद्धृत्य समस्तसाहित्यावतंसभूतता एतस्या प्रमाणीकृतेति स्पष्टतरं प्रतीयते, तथाहिः—

## श्रीसीमन्धरजिनविज्ञप्तिस्तव ( १२५ गाथा ) गतोपदेशगाथोद्धारः ।

| | | ढा० | गा० | | |
|---|---|---|---|---|---|
| १ | जेह राखे पर० | ४ | ११ | जइयाऽणेण चत्तं० | ४३४ |
| २ | नाणरहित हितपरिहरी० | ६ | ९ | गुणहीणो गुण० | ३५१ |
| ३ | सूत्रविरुद्ध जे आचरे० | ६ | ११ | जो जहवायं ण कुणइ० | ५०४ |
| ४ | पामरजन पण० | ६ | १२ | लोएऽवि जो ससूगो० | ५०८ |
| ५ | निर्दय हृदय छकायमां० | ६ | १३ | छज्जीवणिकायदया० | ४३० |
| ६ | साधु भगति जिनपूजना० | ६ | १४ | अरिहंत–चेइआणं० | ५०२ |
| ७ | जे मुनिवेष शके नहि० | ७ | १ | जइ ण तरसि० | ५०१ |

| | | ढा० | गा० | | |
|---|---|---|---|---|---|
| ८ | ते पण मारग मांहे० | ७ | १ | संविग्ग–पक्खियाणं० | ५१४ |
| ९ | मृषावाद भवकारण० | ६ | १ | सुद्धं सुसाहुधम्मं० | ५१५ |
| १० | वंदे नवि वंदावे० | ७ | १ | वंदइ णय० ५१६ ओसण्णो० | ५१७ |
| ११ | आप हीनता जे मुनि भाखे० | ७ | २ | आयरतरसंमाणं० | ५२४ |
| १२ | प्रथम साधु बीजो० | ७ | ३ | सावज्ज–जोगपरिवज्ज० | ५१९ |
| १३ | शेष त्रणभव मारग० | ७ | ३ | सेसा मिच्छादिट्ठि० | ५२० |

## श्रीसीमन्धरजिन–वृद्धविज्ञप्ति (३५० गा.) स्तवनगतोपदेशमालागाथोद्धारः ।

| | | ढा० | गा० | | |
|---|---|---|---|---|---|
| १ | अज्ञानी नवि० | १ | ११ | जं जयइ अगीयत्थो० | ३९८ |
| २ | जिम २ बहुश्रुत बहुजन | १ | १४ | जह २ बहुस्सुओ० | ३२३ |
| ३ | पामी बोध न पाले० | १ | २३ | लद्धिल्लियं च बोहिं० | २९३ |
| ४ | जे निरगुण गुणरत्नाकर० | २ | १० | गुणहीणो गुण० | ३५१ |

| | | ढा० | गा० | | |
|---|---|---|---|---|---|
| ५ | पायच्छित्तादिक भाव० | २ | १५ | जो चयइ उत्तरगुणे० | ११७ |
| ६ | द्रव्यक्षेत्र ने काल० | ६ | २ | दव्वं खित्तं कालं० | ४०० |
| ७ | सचित्त अचित्त मिश्र० | ६ | ३ | जहठिय दव्वं ण० | ४०१ |
| ८ | क्षेत्र न जाणे तेह० | ६ | ४ | जहठिय खित्तं ण० | ४०२ |

ढा० गा०

९ भावहिट्ठगिलाण० ६ ५ भावे हिट्ठ-गिलाणं० ४०३
१० नयणरहित जिम० ६ ७ जह नाम कोइ० ४०५ इच्छइय ४०६
११ अगीतार्थ तिम जाणे० ६ ८
एवमगीयत्थेऽ० ४०७ कह सो जयउ अगीओ० ४०८
१२ पच्छित्ते अतिमात्र० ६ ९
सुत्ते य इमं भणियं० ४०९ आसायण मिच्छत्तं० ४१०
१३ तवसी अबहुश्रुत विचरंतो० ६ १०
अबहुस्सुओ तवस्सी० ४१२ देसियराइय सोहिय० ४१३

ढा० गा०

१४ मार्ग मात्र जाणे जे० ६ ११ जह दाइयंमि० ४१५
१५ सर्व उद्यमें पण तस० ६ १९ अपरिच्छियसुय० ४१५
१६ आणारुचि विण० ६ २३ आणाए च्चिय चरणं० ४०५
१७ एकाकीने स्त्री० ७ ७ कत्तो सुत्तत्थागम० १५७
१८ समिति गुपति पण० ७ ८ पिल्लिज्जेसणमिक्को० १५८
१८ दुःकरकारथकी पण० १५ १० णाणाहिओ वरतरं० ४२३
२० नवि माया धर्में० १५ १३ धम्मम्मि णत्थि माया० ३९३
२१ एक बाल पण० १५ १५ हीणस्सवि सुद्ध० ३४८

इत्येवम्प्रकारेण श्रीमद्भिः यशोविजयवाचकैर्विहितेन स्थाने २ उपदेशमालानामोल्लेखभावानुवादादिनाऽस्याः सर्वातिशायिमहत्त्वख्यापनफलस्तेषां पूज्यवर्याणां सत्प्रयत्नो व्यञ्जितो भवति ।

अपरञ्च सैद्धान्तिकधुराधुरीणैः ज्ञानातिशयविभ्राजितैः परमकारुणिकैः श्रीमद्भिः चरमतीर्थङ्करमहावीरप्रभुभगवत्पादानां वरद-करदीक्षितशिष्यैः अत एव परमोत्कृष्टसौभाग्यसेवधिभिः सद्धर्मातिशायिप्रकृष्टाराधनावाप्तधर्मदासगणिवरेत्याख्यया प्रसिद्धिमागतैः <u>श्रीविजयसेनमुनिसत्तमैः</u> ज्ञानातिशयतोऽनागतं दुष्षमाऽरप्रभावं व्यारोद्धुं सूक्ष्मेक्षिकया पर्यालोच्येव विरचितेयमुपदेशमाला भव्यानां मुमुक्षूणामहर्निशं स्वाध्यायचिन्तनादिना कण्ठस्थिता सुमनोरममहाभागपुरुषोत्तमचरितसुगन्धपूर्णोपदेशमालारूपयथार्थाऽभिधानवती पुष्पमालावदनर्घ्यतमा तीर्थंकरप्रभुस्वहस्तदीक्षितत्वसाम्येन गणभृतां द्वादशाङ्गीवद्यदि च सैद्धान्तिकागमिकसाहित्यकोटीमाटीकेत तर्हि नाऽत्र चित्रं !!!

अत एव धुरन्धरैर्विद्वद्भिः स्वमतिप्राग्भारफलेग्रहितायै सोत्कण्ठैरस्या विविधविवरणादिषु प्रयतितम्। चतुर्विधसङ्घस्याप्याराधनाप्राणभूताञ्चेमां नितरामतिशयितस्वाध्यायादिना प्रख्यापितवन्तश्चतुरतमाः सुदीर्घदर्शिनः गीतार्थवर्याः।



परं साम्प्रतीनाः कतिपये विद्वद्वर्याः ऐतिह्यसंशोधनदिशि सर्वप्रमाणोपजीवकाप्तत्वमूलकागमप्रामाण्यं शिथिलयन्तः दृष्टश्रुतग्राहिबार्हस्पत्यानुकारिणः तथाकथितविद्वांस इवानुमानप्रामाण्यं बाहुल्येनोपजीवयन्तः सन्तो विप्रतिपद्यन्ते यत् :—प्रस्तुतोपदेशमालाकर्तारः श्रीधर्मदासगणिवराः श्रीमहावीरप्रभुहस्तदीक्षिताः न सम्भवन्ति, श्रीवीरप्रभुनिर्वाणतः पञ्चशतवर्षभाविनीनामपि घटनानामत्रोल्लेख दर्शनात्, एते ह्येवं प्रतिपादयन्ति यत् :—श्रीउपदेशमालायां श्रीवीरनिर्वाणतोऽर्वाग्भाविनां श्रीआर्यमहागिरि (१५२) श्रीआर्यसम्भूतिविजयशिष्य (६६) श्रीस्थूलभद्र (५९) चन्द्रगुप्तगुरुचाणक्य (१५०) पर्वतक (१५०) उपकोशा (६१) उदायिनृपमारक (३१) अवन्तिसुकुमाल (८८) तुरुमिणीयदत्तनृपमातुल-कालिकाचार्य, (१०५) वज्रस्वामी (४८–९३)त्येतेषामुल्लेखैनैतत्ग्रन्थकर्तार उल्लिखितव्यक्तीनामर्वाक्तनकालभाविन इति स्पष्टतरं प्रतीयते. ततश्च शाश्रूयमाणं हि ग्रन्थकर्तॄणां प्रभुमहावीरहस्तदीक्षितत्त्वं न सङ्घाघटीति। फलतः आधुनिकैः कैश्चित् विद्वद्भिः एतस्या रचनासमयो वीरनिर्वाणाब्द ५२० तोऽर्वाक्तनीयघटनानुल्लेखात् वीर नि सं. ५२० मितप्रायोऽभिमन्यते। परं वस्तुतत्त्वगवेषिकया समीक्षात्मिकया दृष्ट्या विचार्यमाणे चेदं सर्वं घर्मक्लिन्नहिमवद्विशीर्यते, यतः—"जगचूडामणिभूओ०" संज्ञद्वितीयगाथायां युगादिप्रभोः सिद्धिस्थानस्थितत्वेन चूडामणिभूततां युगादौ च प्रकाशकत्वेनादित्यस्वरूपतां व्यावर्ण्य श्रीवीरप्रभोः महनीयताव्यञ्जकाभ्यां त्रिलोकश्रीतिलकत्व-त्रिभुवनचक्षुष्ट्वविशेषणाभ्यां ग्रन्थरचनासमये जीवितत्वं स्पष्टमेव ध्वन्यते, वर्तमानकाले शोभावृद्धौ व्याप्रियमाणत्व एव तिलकोपमायाः सार्थकत्वात्। भगवतः तत्तत्वपदार्थसार्थविवेचनकार्ये साक्षात् प्रयुज्यमानत्वे सत्येव त्रिजगतश्चक्षुर्भूततायाश्च निर्व्याजं सङ्गच्छमानत्वात्। स्फुटतरञ्चैष अर्थः व्याख्यातृचूडामणिभिः पूज्यवर्यैः श्रीसिद्धर्षिगणिवरैर्हेयोपादेयाख्यवृत्तौ प्रारम्भ एव विवृतोऽस्ति। तथाहि:—" ××× वीरे भगवति जीवति सति गुणस्तुतिरियं

प्रकरणकारेण काक्वा चक्रे, ऋषभो जगचूडामणिभूतोऽधुना मुक्तिपदस्थिततया चतुर्दशरज्ज्वात्मकलोकस्योपरिवर्त्तीत्यर्थः, वीरः पुनः प्रत्यक्षोपलक्ष्यमाणतया त्रिलोकश्रीतिलको भुवनलक्ष्मीमण्डनमिति भावः। तथाऽनयोर्मध्ये एक ऋषभो लोकादित्यो युगादौ प्रभात इव विवेकप्रतिबोधनद्वारेण पदार्थोद्योतकत्वेन निखिलव्यवहारकारणत्वात्। एकः पुनर्वीरश्चक्षुः त्रिभुवनस्य। इदानीन्तनजन्तुचक्षुर्भूतागमार्थभाषकत्वादितिxxx" अन्यच्च "अणुगम्मए भगवइ०" (गा. १३) दिणदिक्खियस्स" (गा. १४) गाथाद्वयपरमार्थविचारणाप्येतमर्थं ध्वनयति यत् प्रस्तुतग्रन्थकर्त्तारश्चन्दनबालामहत्तरासाध्व्याः नैकराजसुतासाध्वीपरिवृतत्वं दिनदीक्षितद्रमकस्यापि विनयव्यञ्जनं प्रत्यक्षं दृष्ट्वैवोट्टङ्कितवन्तश्चात्र तत्प्रसङ्गमिति। एवमग्रेऽपि "पणमंति य पुव्वयरं०" (गा. ५७) "जह चक्कवट्टिसाहु०" (गा. ५८) गाथयोर्मर्मार्थविचारणा चक्रवर्तिनामर्थात् तत्सदृशानाञ्च राजमूर्द्धन्यानां दीक्षाप्रसङ्गादेर्तीर्थकृत्महावीरवर्द्धमानस्वामिजीवितकाल एव संभवादेतद्ग्रन्थनिर्माणं प्रभुमहावीरसत्तासमये जातं भवेदित्यनुमां दृढीकरोति। तथाचैतद्ग्रन्थकर्त्तुः प्रभुमहावीरसमकालिकत्वं षट्पञ्चाशदधिकत्रिशत (३५६) तमगाथागतेन 'बंधइ कडिपट्टयमकज्जे' इतिशब्दोल्लेखेन स्पष्टतरं प्रतीयते, अर्वागाचार्यरक्षितसूरिभ्यो हि श्रमणानां चोलपट्टपरिधानं सार्वदिकं जातं। तदूर्ध्वन्तु निष्कारणतत्परिभोगस्याऽननुज्ञातत्वमेकाशनादिप्रत्याख्यानेषु च 'चोलपट्टागारेणं' पदसूचितनिष्कारणचोलपट्टापरिधानञ्च प्रतीतमेव। निष्कारणञ्च चोलपट्टधारणरूपपार्श्वस्थलिङ्गवर्णनमेव हि ग्रन्थकर्तुः प्रभुमहावीरसमकालिकत्वं ख्यापयति।

तथा चास्मिन् प्रकरणे वीरनिर्वाणाब्द ५२० पर्यन्तीयघटनोल्लेखेन ग्रन्थकर्त्तुर्घटनाकालार्वाक्भावित्वकल्पनापेक्षया तु तेषामवधिज्ञानातिशयवत्त्वमुपजीव्यावधिज्ञानस्य चातीतानगतकालीनपदार्थावबोधशक्तिञ्चाभिमत्य तद्बलेनैवागामिप्रसङ्गोल्लेखादेर्सुसङ्गतत्वकल्पना बुद्धिगम्या भवेत्। भूतकालप्रयोगश्च शब्दशास्त्रविलक्षणशैलिवशाञ्च ग्रन्थकर्त्तुस्तत्तद्घटनाऽर्वाक्कालीनत्वसिद्धौ समर्थः, आगमेषु हि स्थाने स्थाने एतादृशप्रयोगबाहुल्यात्, गणभृतो हि दीक्षाप्तेरनन्तरं निषद्यात्रयेण त्रिपदीं प्रभुमुखात् समधिगम्यान्तर्मुहूर्त्तमा-

त्रैणैव सकलां द्वादशाङ्गीं प्रणयन्ति, इत्येतत्तु समेषामाबालगोपानां प्रतीतिचरमेव । तत्र च भगवतीसूत्र–ज्ञाताधर्मकथो–पासकदशाऽन्तकद्दशाऽ–नुत्तरौपपातिकदशा–विपाकसूत्रादिषु च द्वादशाङ्गीप्रणयनकालार्वाक्भाविप्रसङ्गानां भूतकालीनप्रयोगसनाथा उल्लेखाः सन्त्येव । अतश्चातिशयज्ञानवद्भिः स्वार्वाक्कालीनप्रसङ्गानामागमानुसारिशैल्या भूतकालीयप्रयोगैरपि निर्देशमात्रेण न तेषामुल्लिखितघटनार्वाक्कालभावित्वं सद्गुरुवाससमुपबृंहितसन्मतिवतां धीमतां प्रतिभासेत । तथा चैषोपदेशमालाऽपि श्रीमद्भिर्धर्मदासगणिवरैरनागतं संसारावस्थीयरणसिंहाख्यपुत्रस्य भाविनीं कलिमलसूचिकां दशां परिभाव्य तन्मानसपरिमार्जनाय विवेकसमुदञ्चत्सज्ज्ञानविसरं प्रपिथयिषुभिः निर्मिताऽस्ति । एतत्समर्थनञ्च प्रस्तुतदोघट्टीवृत्तौ उपक्रमे एव प्रथमगाथावृत्तौ उपन्यस्तायां षडशीत्यधिकचतुश्शतगाथामितायां श्रीरणसिंहकथायां प्रस्तुतग्रन्थोत्पत्तिबीजं व्यावर्णयद्भिः श्रीरत्नप्रभाचार्यैः कथितमस्ति यत्:—“ कलिछलणमोहिणा, विजयसेणमुणिणा विभावितेनायं । उवलद्धधम्मदासाभिहाणसारेण सगुणेहिं ॥ तुह पडिबोहणिमित्तं अणागयं चेव तेण संघडिया । सुगई जिजासुणा सदुवएसमाला महासत्त ! ॥ ” उप० (गा १. दोघट्टीगतरणसिंहकथा ) ४८५–४८६ अनु० उमेदवि० कोशे वे. ६. प्र. ९ समर्थक्रियोद्धारक पू पं. श्रीसत्यविजयगुरूत्तंसशिष्यरत्न श्रीवृद्धिविजयमुनिवरैः विहितस्य श्रीउपदेशमाला [1]बालावबोधस्य प्रान्त्यभागे एवमुल्लेखोऽप्युपलभ्यते, यत्:—‘×××जे माहिं ताहरउं कलिनइं देखवरुं छल्यानउं स्वरूप अवधिज्ञानइं आगलथी जाणिनि श्रीधर्मदासगणिइं तुझनइं प्रतिबोधवानइं अर्थिं ए श्रीउपदेशमाला कीधी छइ×××श्रीधर्मदासगणि षिमाश्रमणइं अतीत–अनागतभाव अवधिज्ञानइं जाणी ए श्री उपदेशमालानी रचना कीधी×××’ । एतेनानागतकालीनपदार्थावबोधक्षमावधिज्ञानसम्पन्नपूज्य श्रीधर्मदासगणीतिप्रसिद्धनामश्रीविजयसेनगणिवरैर्विरचिताया अस्या उपदेशमालायाः केषाञ्चनार्वाक्तनीयानामुल्लेखमात्रेण प्रभुमहावीरस्वामिहस्तदीक्षितशिष्यावतंसकर्तृत्वं न सङ्गच्छते इत्याधुनिकविदुषां तर्कः खलु न घटाकोटीमाटीकते इति निश्चप्रच प्रतीयते ।

१ एतत्प्रतिप्रान्त्यभागे चैवं पुष्पिका:—‘ सूर्यपूरबंदरे वाचक श्री यशोवि. प्रसादात् १७९५ वर्षे ज्येष्ठ सुदि १ भौमे मनरूपसागरेण लिखिता’

अन्यच्चैतत् ग्रन्थरत्नप्रान्त्यभागे चैवमुल्लिखितमस्ति यत् :—'सोउण पगरणमिणं धम्मेण जाओ उज्जमो जस्स। न य जणियं वेरग्गं, जाणिज्ज अणंतसंसारी ॥ ५३४ ॥' एषा गाथैव ग्रन्थकर्तुरतिशयज्ञानवत्तां ख्यापयति प्रभुमहावीरतीर्थकृत्समकालीनत्वञ्च ध्वनयति। को हि विशिष्टातिशयिज्ञानिनं विना वा समर्थसद्गुरुनिश्रितताम‌न्तरेण सुस्पष्टतरत्वात्रबोधक्षमसद्गुरुनिश्राबलसमुपलब्धविशिष्टात्मशक्तिहुङ्कारसममेतत् जल्पितुमपि प्रभुः ?। को वा प्रस्तुतरचनायाः विशिष्टावबोधक्षमतां प्रकृष्टातिशयितज्ञानबलेनाऽविज्ञायैवं टङ्कारवभूतं वचः प्रोद्घोषयितुमलम् ?। श्रावकाणां हि पाक्षिकाद्यतिचारालोचनासूत्रे च ज्ञानाचारातिचारव्यावर्णनप्रसङ्गे कालाचारालोचनायां 'श्रीउपदेशमालाप्रमुखसिद्धान्ते'-त्याद्यक्षरैरेतत्प्रकरणस्याकाले पठनादेरतिचारास्पदत्वेन निरूपितमस्ति, व्यज्यत एवानेन प्रस्तुतप्रकरणस्य सिद्धान्तप्रायत्वं एतत्कर्तुः सातिशयज्ञानकत्वात् प्रभुमहावीरहस्तदीक्षितत्वाच्च, नान्यथाऽस्य सिद्धान्तप्रायतौचितीमञ्चेत। अस्याश्च कर्त्तुः प्रभुमहावीरहस्तदीक्षितत्वं समर्थयन्त इमानि च प्रमाणान्तराणि समुपलभ्यन्ते। तथाहिः—१ श्रुतज्ञानसमुपासनान्तरभक्तिसमुज्ज्वलागमोद्धारणकार्यदक्षागमजीवितसाक्षात्प्रतिमूर्ति-समर्थगीतार्थधुरन्धर-ध्यानस्थस्वर्गतपूज्याचार्य-श्रीआनन्दसागरसूरिपादा हि मलधारिश्रीहेमचन्द्राचार्यनिर्मितोपदेशमालापराह्व-पुष्पमालाया उपोद्घाते निश्शङ्किततरमेवोल्लिखन्ति यत :—' ××× त्रिजगज्जन्तुजानजीवातु-भगवन्महावीरकरकमलदीक्षितैः श्रीधर्मदासगणिभिः श्रीउपदेशमालाभिधं प्रकरणं प्रकटितं प्रागिति तदनुकरणेनादधुः सूरयोऽप्युपदेशमालाभिधानमस्य×××' २ पूज्यागमोद्धारकवर्यैः प्रकाशितोपदेशमाला (मूलमात्र) प्रतेः शीर्षभागे खलु 'श्रीवीरप्रभुशिष्य श्रीमद्धर्मदासगणिकृते'-त्युल्लिखितमस्ति। ३ प्रस्तुतदोघट्टीवृत्तिकर्तारः श्रीरत्नप्रभाचार्या अपि द्वितीयगाथावृत्तौ 'वीरः पुनः प्रत्यक्षोपलक्ष्यमाणतया×××इदानीन्तनजन्तुचक्षुर्भूतागमार्थभाषकत्वात्। इत्थं च तीर्थकरोभयस्य गुणोत्कीर्तनेन प्रकरणकारो भगवति महावीरे विद्यमाने प्रकरणमिदमकारीति काक्वा ज्ञापयामास×××' इत्युल्लेखेन सुदृढमापादितवन्तः ग्रन्थकर्तुः प्रभुमहावीरसमकालिकत्वं। ४ तथा ५३६ गाथावृत्तौ प्रकरणसङ्गत्यादिनिर्दिष्टेन सन्दर्भेणाप्येतत्समर्थ्यते तथाहि :—'×××श्रीविजयसेनमहाराजो×××परमेश्वर-श्रीमहावीर (पद्महस्तेन) हस्तपद्मेन प्रव्रज्या×××स्वीचक्रे। ×××विशालतपोऽनुष्ठाननिष्ठावाप्तधर्मदासगणिनामधेयोऽवधिज्ञानी×××तीर्थङ्करान्तेवा-

सित्वेनाध्ययनप्रबन्धविधित्सुरवधिना स्वपुत्रस्य प्राप्तस्वकीयराज्यस्य भाविनीं कलिच्छलनामालोकयन् प्रतिबोधविधानाय यथार्थमेतदुपदेशमालाप्रकरणमुत्पादयाञ्चकार, पाठयाञ्चकार च पुत्रप्रतिबोधसंविधायै तन्मातुलकमवोचच्च यथासमये समेत्य कलिच्छलितः स्वस्वस्रीयस्त्वया प्रतिबोधनीय इति ' इत्येतत्सत्रं ' <u>वृद्धानामुपदेशः</u> ' इति कृत्वोल्लिखितमस्ति । ' अभिधानराजेन्द्रकोशे ' भा. ४ पृ. २७१९ 'धम्मदासगणि'–शब्दे एवम्भूतोल्लेखः दृश्यते तथाहि :—' ××× अनेन भगवता ' उपदेशमाला 'नामग्रन्थोरचितः । अयमाचार्यो वीरप्रभोरपि पूर्वं बभूवेति प्रसिद्धिः जै. इ. । तथा चाहुः प्रतिहतसकलव्यामोहतमिश्राः धर्मदासगणिमिश्राः ध. २०, तथाऽत्राह भगवान् धर्मदासगणिः दर्श० ४ तत्व ।' एतेनास्या उपदेशमालाया कर्त्तुः श्रीधर्म्मदासगणीन्द्रस्यातिप्राचीनत्वं प्रभुमहावीर–समकालीनत्वसम्भावनाया पोषणञ्च ध्वन्यते । ५ नित्यवि० (चाणस्मा) सत्ककोषे वे ४२. प्र. ११५ तपागच्छाधिराज–श्रीसोमसुन्दरसूरिशिष्य श्रीमुनिसुन्दरसूरिक्रमाम्भोरुहभृङ्गपं. हर्षभूषणगणि १४८६ वर्षे रचिते अञ्चलमतसदुत्तरस्वरूपे श्रीश्राद्धविधिविनिश्चयाख्याप्रकरणग्रन्थे पृ. १५ स्पष्टतरमुटङ्कितमस्ति । यत् :—' ××× उपदेशमाला च सर्वेषां प्रमाणं तदुक्तविधीनां भव्यैर्मुक्त्यङ्गत्वेन क्रियमाणत्वात्, स्वपुत्ररणसिंहप्रतिबोधनार्थं श्रीमहावीरहस्तदीक्षित–श्रीधर्मदासगणिकृतत्वाच्चेति धर्म्मदासगणिकथायामुक्तत्वाच्च ' । ६ नित्यवि० चाणस्मा कोशे वे. २० प्र. ४४ अष्टाविंशतिपत्रात्मिकाऽतीवप्राचीना उपदेशमालाया श्रीसिद्धर्षिविवरणप्रतिरस्ति । संभाव्यते चैतदेव विवरणं श्रीसिद्धर्षिकृत–हेयोपादेयावृत्त्यपेक्षया लघुवृत्तित्वेन प्रथितं भवेत् । अत्र चादौ २ गाथाविवरणे ' ×××अथवा वीरे जीवति सति गुणस्तुतिरियं प्रकरणकृता काक्वा चक्रे×××अधुना वीरस्त्रिलोकीतिलकः प्रत्यक्षत्वात्×××वीरश्चक्षुस्त्रिभुवनस्य, आधुनिकजन्तुचक्षुर्भूतागमार्थो×××'इत्यादिसन्दर्भेण सुतरां स्पष्टतरं उपदेशमालाकर्तुः प्रभुमहावीरसमकालीनत्वं व्यज्यते । ७ नि. भं. चाणस्मा वे. ११७. प्र. ५९४. वि. सं. १६९४ वर्षे फा. सु. १० भौमे तपागच्छाधिराजभट्टारकप्रभु श्रीविजयाणंदसूरिविजयराज्ये सकल पंडितसभाशृङ्गार पं. श्रीधनहर्षगणि शिष्य पं. रत्नविजयेन लिखितस्य श्रीउपदेशमालावचूर्यात्मक–बालावबोधस्य ३९ पत्रात्मिकप्रतौ प्रारम्भ एव द्वितीयगाथाबालावबोधे ' ××× अनइं प्रत्यक्ष उपलक्ष्यमाण भणी श्रीवीर त्रिभुवनलक्ष्मीमंडन जाणिवउ××× ' रूपाण्य-

क्षराणि समुपलभ्यन्ते । ८ श्रीउमेदवि. कोशे. चाणस्मा. वे. ६ प्र. १० सं. १४९९ वर्षे द्वि. आषाढ व. ११ सोमे लिखिता ७० पत्रात्मिका उपदेशमाला–बालावबोधप्रतिः । तत्र च द्वितीयगाथा बालावबोधे–'×××श्रीआदिनाथ आगइं ग्रन्थकारनुं दूरइ हुऊ,××× अनइं श्रीमहावीर तेणइं कालइं ढुंकडा जयवंता वर्त्तइं×××' इत्यक्षराणि । प्रान्त्यभागे च स्पष्टतरमुल्लिखितम् यत् :—'×××श्रीधर्म्मदासगणिना वचनमाहि दोष सर्वथा नहीं, पूर्वगुरुआ बहुश्रुतभणी ए श्रीउपदेशमाला श्रीमहावीर जीवतां निपनी, तेह भणी श्रीसिद्धान्तप्राय जाणिवी×××' इत्येतैः एतादृशैर्वा प्रामाणान्तरैर्नितान्तमेतद् दृढीक्रियते यदियमुपदेशमाला श्रीमहावीरपरमात्महस्तदीक्षितेन धर्मदासगणिना भाविभव्यसत्त्वोद्दिधीर्षयाऽतिशयज्ञानबलोपबृंहिता विरचितेति, नात्र कश्चन शङ्कालेशविसरः ।

## । गाथासङ्ख्याविचारः ।

यद्यपि उपदेशमालगाथाप्रमाणं ग्रन्थकृद्भिरेव 'इत्थ समप्पइ०' (५४२) गाथायां 'गाहाणं सव्वाणं पंचसया चेव चालीसा' पदैः चत्वारिंशदधिकपञ्चशतमितं निर्दिष्टम् , तथापि साम्प्रतीनासूपलभ्यमानासु प्रति–पुस्तकेषु द्वयोश्चतुर्णां पंचानां च गाथानामाधिक्यं दृश्यते । तथाहि :—स्तम्भतीर्थीय–श्रीशान्तिनाथताडपत्री–कोशे (वे. ७) लींबडीभाण्डागार (मं. १७०२) स्थितप्रत्योः ५४० प्रमाणं दृश्यते । मोहनलाल दलीचंद देसाई संज्ञाधुनिकैतिह्यविदुषाऽतिप्रयत्नसङ्कलिते 'जैन साहित्यनो संक्षिप्त इतिहास' संज्ञग्रन्थ (पृ. २३–३१) उपदेशमालाविवरणप्रसङ्गे ५४० गाथा निर्दिष्टाः । परमेष सामान्यतः ५४२ गाथास्थग्रन्थप्रमाणस्यानुवादशैल्या निर्दिष्टः प्रतीयते, न स्वतन्त्राभिप्रायो उपलक्ष्यते । तथा जिनरत्नकोशे (पृ. ४९) ५४२ गाथाप्रमाणोल्लेखः । स्तंभतीर्थशान्ति० कोशेऽपि ५४२, जैन कॉन्फरन्सप्रकाशितग्रन्थावली (पृ. १०२) लींबडी (मं. १५८७) ५४२ गाथाप्रमाणोपलभ्यते । लींबडीस्थकोशे ५४३ गाथामिता । एका प्रतिः (मं. सं. ६४८.) तथा चाणस्मा नीति० भाण्डागारे प्रतिद्वयं (वे. २० प्र. ४३–४४) वर्तते । तथा चाबालगोपालं गाथाप्रमाणमस्याः ५४४ मितं प्रसिद्धं प्रतीयते । अनेकत्र तादृशप्रतीनां बाहुल्योपलब्धेः । तथाहि :—चाणस्मा उमेदवि० संग्रहे (वे. ६) प्रति-

चतुष्कं । नीतिवि० संग्रहे (वे. ११७. प्र. ५९३-९४) प्रतिद्वयं, स्तम्भतीर्थे शान्ति० (वे. ११) एका प्रतिः, तथा १०२-३-२८-२९-३० सङ्ख्यमञ्जूषकेषु पञ्चदशप्रतिषु प्रायः बाहुल्येन ५४४ गाथाः । जैन ग्रन्थावली (पृ. १७१ निर्दिष्टा) मध्ये एका प्रतिः । लींबडी-स्थकोशे ६४९-७४८-८६८-११०२-२८-२९-१४२४-१५३८-१६०७-१७१७-३४२४ संख्या प्रतयः ५४४ गाथाप्रामाण्यभाजः सन्ति । पूज्यवर्यागमोद्धारक-सम्पादितमूलमात्र उप०-श्रुतज्ञानअमीधारयोश्च ५४४ गाथाः । लींबडी० (मं. १३०३) चाणस्मा-उमेद० संग्रहे (वे. ६. प्र. ५.) च ५४५ गाथाप्रमितोपदेशमाला दृश्यते । एवञ्चाधुनिकसाहित्यसृष्टौ उपदेशमालागाथावैविध्य-मुपलभ्यते । तथाहि :—खंभात-शां० ता० भं. लींबडी, जैन-साहित्य-इतिहासादिषु ५४० गाथा । जिनरत्नकोश-खं. शां. ता. भं. लींबडी भण्डारद्वय,-जैन ग्रंथावल्यादिषु ५४२ । लीं. चाणस्मा. नीति० संग्रहयोः ५४३ । चाणस्मा उमेदवि० ४, नितिवि० २, खंभात शा० ६, जै. ग्रं. १, लीं. भं. ११, पू. आगमोद्धारक-प्रकाशितमूलप्रतिः १, श्रुतज्ञानअमीधारा १, ५४४ । लीं. उमे-दवि. सं १ ५४५ गाथाः । परमेतत्र ५४४ गाथाप्रमाणं प्रामाणिकतरं दृश्यते, बहुश उपलभ्यमानत्वात्सुविहितगीतार्थाचरितमर्या-दाङ्कितत्वात् युक्तिसंगतत्वाच्च, तथाहि :—"इय धम्मदासगणिणा, जिणवयणुवएसकज्जमालाए । मालव्व विविहकुसुमा, कहिआ य सुसीसवग्गस्स ॥ ५४० ॥ संतिकरी वुड्ढिकरी०, ५४१ । इत्थ समप्पइ इणमो० ५४२ । जाव य लवणसमुद्दो० ५४३ ॥ अक्ख रमत्ताहीणं जं चिय पढियं अयाणमाणेणं । तं खमह मज्झ सव्वं जिणवयणविणिग्गया वाणी ॥५४४॥" एतस्मिन् उ० गाथाप्रञ्चके वस्तुतः सापेक्षभावेण विचार्यमाणे विवक्षावशादल्पाधिक्यसंभवो जाघटीति, यत :—ग्रन्थकृद्भिरुपदेशरूपविषयसमाप्तिस्तु त्रयस्त्रिंश-दधिक-पंचशततमगाथयैव कृताऽस्ति, ततः परं गाथाद्वयेन प्रस्तुतप्रकरणस्य सारमयता सूचिता, ततश्चैकगाथया ग्रन्थोपसंहाररूपेण प्रकरणज्ञानसफलता वर्णिता, तदनन्तरीय ५३७ गाथायाञ्च ग्रन्थकृद्भिर्निगूढाक्षरपद्धत्या स्वाभिधेयसंसूचा विहिता, जिनवचनम-हत्त्वं कल्पवृक्षौपम्येन निदर्श्यैतत्प्रकरणाधिकारिणः सूचिताः । तदनन्तरञ्च ५४० तम गाथाया पुनः ग्रन्थकृद्भिः स्वाभिधेयं व्याकुर्व-द्भिरुपसंहारः कृतः । अत्र चैवं वितर्क्येत यदि तर्हि नासङ्गतं यत् :—ग्रन्थकृतः स्वाभिधेयं ५३७ तम गाथया गुप्तरीत्या वर्ण-

यन्तः स्वलघुतां व्यञ्जमानाः सन्तः पुनः गाथाद्वयानन्तरमेव स्वनामसङ्कलनं स्पष्टशब्दैः कुर्युः, नैतदाश्चर्यकरं किमिति ? अत एतां गाथां पाश्चात्येन केनापि प्रक्षिप्तामभिमन्यान्तिमाशीःरूपा 'संतिकरी० ५४०' तमा यदि स्वीक्रियते तर्हि सर्वं सुस्थं भवेत्, एवञ्च तदनन्तरीयायां 'इत्थं समप्पइ०' गाथायां गाथाप्रमाणसूचनमपि सङ्गतं भवेत्, अन्यथैतद्गाथापूर्ववर्त्त्येकचत्वारिंशदधिकपञ्चाशतगाथासत्त्वादेकाधिकत्वं कथमपह्नुयेत ? । अतः 'इयं धम्मदास०' गाथां प्रक्षिप्तामभिमन्य ग्रन्थकृदभिमत५४०गाथाप्रमाणसङ्गतिरुचिता प्रतिभाति । एवञ्च प्राक्निर्दिष्टानां ५४० गाथाप्रमाणोल्लेखवतीनां प्रतीनां प्रामाण्यं ग्रन्थकृन्निर्देशमात्रमपेक्ष्यावशिष्टगाथानाञ्च चूलिकारूपेणागणनरूपविवक्षया च भवेत् । 'संतिकरी वुड्ढिकरी०' गाथामप्रक्षिप्तां स्वीकृत्य ग्रन्थकृन्निर्दिष्टगाथाप्रमाणसूचिकां गाथामेव चरमां गाथां विवक्ष्य ५४२ गाथोल्लेखोऽपि प्रामाणिकतर एव दृश्यते । तथोपदेशप्रधानत्वादेतस्य ग्रन्थस्य मध्यवर्तिगाथास्तु कासुचित् न्यूनाधिक्यसम्भवात्तन्मूलको हि ५४३ गाथोल्लेख इत्यनुमीयेत, तर्हि वरं ! यतः ५४३ गाथावतीषु चरमगाथापञ्चकन्तु एवमेवोपलभ्यते । ५४५ गाथासङ्गतिरपि पूर्ववदुपदेशप्रधानत्वादस्याः कस्याश्चिद् गाथायामेकतमप्रक्षिप्यमाणत्वसम्भवं विवक्ष्य करणीया । निष्कर्षो हि खलु एवमत्र बोद्धव्यो यत् ५४४ गाथाप्रमाणे गाथाया प्रक्षिप्तत्वेन न्यूनाधिक्यं वा नहि कल्पनीयं भवति, अनेकत्र च बहुप्रतिषु एतावद्गाथाप्रमाणस्योपलभ्यमानत्वादस्या उपदेशमालाया ५४४ गाथाप्रमाणं सुनिश्चिततरं सुसङ्गतं प्रामाणिकञ्चेति सुनिश्चीयते ।

**अथ परमप्रामाणिकौपदेशिकग्रन्थचूडामणिभूताया अस्या उपदेशमालाया प्राङ् निर्दिष्टसाहित्यसूच्यां विवरणशैलितः सर्वव्याख्यासु प्रप्रभावं बिभ्रत्याः दोघट्टीसंज्ञवृत्तेर्कर्तृत्वादिविचारः प्रस्तूयते ।**

विद्वद्वर्गे दोघट्टीसंज्ञया प्रसिद्धेयं हि वृत्तिः श्रीवादिदेवसूरिशिष्यावतंसैः श्रीरत्नप्रभसूरिवरैः व्याख्यातृचूडामणि-श्रीसिद्धर्षिकृत हेयोपादेया वृत्त्यनुसारेण गाथार्थपद्धतिं संस्थाप्य विशेषवृत्तीत्यभिख्यया वि. सं. १२३८ वर्षीयमाघमासे भृगुपुरे निर्मितत्येतत्

सर्वं वृत्तिप्रान्तभागे प्रशस्तितोऽवगम्यते । वृत्तिप्रणेतारो हि रत्नप्रभाचार्याः परमोत्कृष्टसंयमाराधनापरायण–शासनप्रभावक–सकलशास्त्र-पारावारपारीण-श्रीमुनिचन्द्रसूरिपट्टप्रभावक–प्रखरतपस्वि–वादकलानिपुणाऽऽशाम्बरीयदिग्गजवादिमदोन्माथि–पूज्याचार्यश्रीदेवसूरिप्रभुपट्टा-वतंसभूताः सन्ति । अतः प्रथमं श्रीमुनिचन्द्रसूरीणां ततश्च वादिदेवसूरीणामैतिह्यज्ञानमावश्यकम् ।

प्रभोर्महावीरदेवभगवतः पट्टपरम्परायां श्रीसर्वदेवसूरि(द्वितीय)पट्टे एकोनचत्वारिंशत्तम पट्टधररूपेण श्रीयशोभद्रसूरि–श्रीनेमिचन्द्रसूरि-संज्ञितौ गुरुभ्रातरौ सूरिवर्यौ सञ्जातौ । वीरगणिरचिताया ७६७१ श्लोकप्रमाणपिण्डनिर्युक्तिवृत्तेस्संशोधनकारिभिः श्रीनेमिचन्द्रसूरिभिः स्वगुरुवर्यप्रदत्तसूरिपदाञ्चितगुरुभ्रात्राष्टकत श्रीविनयचन्द्रोपाध्यायशिष्यश्रीमुनिचन्द्रसूरिभ्यो गच्छभारं योग्यतानुरूपं ददुः, चत्वारिंशत्तम पट्टधररूपेण तेषां प्रथितिश्च कृता । यत उक्तं :—

'गुरुबन्धुविनयचन्द्राध्यापकशिष्यं स(!)नेमिचन्द्रगुरुं। यं गणनाथमकार्षीत्, स जयति मुनिचन्द्रसूरिरिति ।। उपा० धर्मसागर० पट्टावली ।'

एवञ्च सुगृहितनामधेया हि पूज्यवर्याः श्रीमन्तः मुनिचन्द्रसूरिवराः चत्वारिंशत्तमाः पट्टधराः इति निर्णीतम् । इमे हि सूरिवराः बालदीक्षिताः अकुण्ठब्रह्मचारिणः सत्तर्ककर्कशप्रमाणशास्त्रवादतत्वादिदुर्बोधपदार्थसार्थमर्मस्पर्शिज्ञातार अत्युत्कटविशुद्धसंयमपालनपरा-श्चासन् । एतैः सूरिवर्यैः भवावटपातप्रत्यलाः दुरवगाढभवसमुद्रभीषणावर्त्तसमा षडपि विकृतयः मोहोत्पादविकारोत्पत्तिप्रभूष्णव इति सम्यगवबुध्याजीवनं षण्णामपि विकृतीनां सर्वथा परित्यागः कृत आसीत् । रसास्वादवृत्तिनिग्रहाय च सौवीरापरपर्यायभूतां काञ्जिका-मेव शरीरयापनाय जगृहुः, अतश्चेतेषां 'सौवीरपायी'तिशरीरनिरीहताप्रकृष्टत्यागितासूचकमर्थानुगुणं नाम विद्वत्समाजोपज्ञमागोपाङ्गनं प्रथितं जातं तथाहि :—

' सौवीरपायीतितदेकवारि–पानाद्विधिज्ञो बिरुदं बभार । जिनागमाम्भोनिधिधौतबुद्धि–र्यः शुद्धचारित्रिषु लब्धरेखः ।।
संविज्ञमौलिर्विकृतिश्च सर्वास्तत्याज देहेऽप्यममः सदा यः। विद्वद्विनेयाभिवृतः प्रभाव–प्रभागुणौघैः किल गौतमो यः ।। तपा० पट्टा० ।

पूज्या हि सूरिपुङ्गवा अतिप्रबुद्धस्मरणशक्तिभाज आसन् । एकदा नाडोलतः चैत्यविवन्दिषयाऽणहिल्लपुरपत्तनं समागता आसन् । तत्र च सत्तर्कप्रचुरप्रमाणशास्त्रं द्वात्रिंशच्छिष्यानध्यापयमानान् 'वादिवेतालशान्तिसूरिवर्यान्' वन्दित्वा प्रमाणशास्त्रवाचनाश्रवणार्थैकपार्श्वे उपविष्टाः, प्रत्यहं च तेऽनुपलक्ष्यमाणस्वरूपा अज्ञातरूपेणैव प्रमाणशास्त्रगहनव्याख्यावबोधलालसया वाचनां शुश्रुवुः। अत्यन्तदुर्घटप्रमाशास्त्रपदार्थानां सुविशदं यथाशक्यं व्याख्यानं कृत्वापि शिष्याणामनवधारितदुर्ग्राह्य-पदार्थतामवबुध्य गुरुवर्यैः भस्मनिहुतन्यायं पुरस्कृत्य ग्लानिभावसूचकशब्दैः निर्विण्णता व्यक्ता । तदैव सूक्ष्मावधारणप्रत्यल-विशिष्टपटुधारणाशक्तिसंम्पन्नैः श्रीमुनिचन्द्रसूरिभिरतीव विनयभावेन विज्ञप्तं यत् प्रभो ! तत्रभवतां पार्श्वे पुस्तकादि प्रगृह्य वाचनायै समागतवत एव उत्तरदानाधिकारिण ? उतान्येऽपि ? इत्येतां गाम्भीर्यपूर्णवचनपद्धतिं श्रुत्वा चकितैः वादिवेतालगुरुभिः सम्मतौ प्रदत्तायां कुशाग्रातिनिशितधीषणाप्राग्भारावधीरितसुरगुरुसुरगुरुसन्मतिवर्यैरामूलचूलमक्षरशः प्रतिदिवसीयवाचनाजातं श्रावितं, एतावदवधारणसामर्थ्यं श्रीमतां ज्ञात्वातिप्रसन्नचेतोभि वादिवेतालसूरिवर्यैरतिसन्मानपूर्वकं स्वसन्निधौ संस्थाप्य प्रमाणशास्त्रस्य विविधव्याख्यापटिष्ठोऽभ्यासः सोत्कण्ठं कारितः । एतेन च प्रसङ्गेन श्रीमतां स्मरणशक्ति-तीव्रतारञ्जितमनस्कैः विद्वद्धुरन्धरैर्वादिवेतालैः कारितस्य प्रमाणशास्त्रसुसूक्ष्मतराभ्यासबलेन पूज्यश्रीहरिभद्रसूरिवर्यरचितानेकान्तजयपताका-ललितविस्तरादिनैकविधदुर्बोधग्रन्थव्याख्यापटिष्णुतया लब्धं तार्किकशिरोमणिबिरुदं सफलं भवति । उक्तं चः—

"हरिभद्रसूरिरचिता, श्रीमदनेकान्तजयपताकाद्याः । ग्रन्थनगा विबुधानामप्यधुना दुर्गमा येऽत्र ॥
सत्पञ्जिकादिपद्या-विरचना या भगवता कृता येन । मन्दधियामपि सुगमास्ते सर्व्वे विश्वहितबुद्धया ॥" तपा० पट्टा०

तैः विरचितं साहित्यमेवमुपलभ्यते, तथाहि :—१ देवेन्द्र-नरकेन्द्रवृत्तिः । २ सूक्ष्मार्थसार्द्धशतकचूर्णिः । ३ अनेकान्तजयपताकावृत्तिः । ४ उपदेशपदवृत्तिः । प. ललितविस्तरापञ्जिकावृत्तिः । ६ धर्मबिन्दुवृत्तिः । ७ कर्मप्रकृतिटिप्पणकम् । नैषधकाव्य (१२०० श्लोकप्रमाणा) वृत्तिः । स्वतन्त्रकृतिरूपेण च लघुग्रन्थानां विंशतिका एवमुपलभ्यते, तथाहि :—१ अङ्गुलसप्ततिका, २ आवश्यक-

(पाक्षिक) सप्ततिका, ३ वनस्पतिसप्ततिका, ४ गाथाकोशः, ५ अनुशासनाङ्कुशकुलकं, ६–७ उपदेशामृतकुलकद्वयम् , ८ उपदेशपञ्चाशिका, ९–१० धर्मोपदेशकुलकद्वयम् , ११ मोक्षोपदेशपञ्चाशिका, १२ प्राभातिकस्तुतिः (संस्कृत) १३ रत्नत्रयकुलकं १४ शोकहरोपदेशकुलकं, १५ सम्यक्त्वोत्पादविधिः, १६ सामान्यगुणोपदेशकुलकं, १७ हितोपदेशकुलकं. १८ कालशतकं, १९ मण्डलविचारकुलकं, २० द्वादशवर्गः । अत्र च द्वितीया कृतिः ' पाक्षिकसप्तति ' संज्ञया पूज्यवर्यैः दर्शनशुद्धि–प्रमेयरत्नकोशनिर्मातृ–श्रीचन्द्रप्रभाख्यस्वगुरुभ्राता वि. सं. ११४९ वर्षे उद्भावितस्य पूर्णिमामतस्य निरासार्थं सन्दृब्धास्ति । तथा चैतिह्यविद्यानिपुण-मुनिश्रीजयन्त वि. म. सङ्कलिते श्रीशङ्खेश्वरस्तवनावली–लघुपुस्तके पृ. १३३ समस्तकल्याणनिधानकोशं० इत्यादिदशगाथामित श्रीसंखे० पार्श्वनाथ स्तोत्रमन्यत्रकुत्राप्यनिर्दिष्टमनुपलब्धञ्च तदपि पूज्यानां कृतिः । अपरं च जैनग्रन्थावली (पृ ३४१)ग्रन्थे 'रसाउला'ख्या प्राकृतसुभाषितकृतिः पूज्यवर्याणां नाम्नोल्लिखिता यस्या हि एकादशपत्रात्मिका प्रतिः राधनपुरभण्डारेऽस्ति, अप्रसिद्धा चैषा समीक्षापूर्वकं गवेषणीया विद्वद्भिः। तपा० पट्टावल्ल्यां तेषां स्वर्गमनकालो ह्येवं निर्दिष्टः, उक्तं च :—

" अष्टहयेश (११७८) मिताब्दे, विक्रमकालाद्दिवंगते भगवान् । श्रीमुनिचन्द्रमुनीन्द्रो, ददातु भद्राणि सङ्घाय ।। "

प्रातःस्मरणीयानामेतेषां विशिष्टो हि निर्मलावदातोदन्तः पूज्यवर्याणां पट्टप्रभावक–शिष्यावतंसैः वादीन्द्रश्रीदेवसूरिभिः सन्दृब्धाया अपभ्रंशभाषानिबद्धाया श्रीमुनिचन्द्रगुरुस्तुतितोऽवसेयः, या च स्तुतिः श्रीजैन श्वे. कोन्फ० हेरल्डाख्यमासिके ( पु. १३ अं. ९ पृ. ३२४ तः ३३५) मुद्रितास्ति ।

श्रीमुनिचन्द्रसूरीणां स्वर्गगमनानन्तरं तेषां पट्टोदयाचले भास्वत्सूर्यसमाः श्रीमन्तोवादिदेवमहत्तमाः निजोर्जस्विवादकलयाऽऽशाम्बरीयदिग्गजवादिनिग्रहेणावाप्तप्रोज्वलयशस्विनः सुगृहीतनामधेयाः श्रीदेवसूरयः सञ्जाताः । एतेषां हि जन्म वि. सं. ११४३ वर्षे अर्बुदगिरिप्रत्यासन्ने मडाहृतग्रामे समजनि । ११५२ वर्षे दीक्षा, ११७४ वर्षे आचार्यपदं १२२६ वर्षे स्वर्गगमनं चाभूत् ।

अधस्तादजगरो यः, सेयं नरकदुर्गतिः ॥ ४१ ॥ ये चत्वारः पुनः सर्पास्ते कषायाः क्रुदादयः । श्वेताऽश्वेतौ च यावाखू, तौ पक्षौ मासि तादृशौ ॥ ४२ ॥ तद्ग्रहे बन्धशैथिल्यं, तदङ्गे जरसा स्फुटं । ये सङ्घाः सरघानां तु, व्याधयश्चाधयश्च ते ॥ ४३ ॥ याऽङ्गलग्ना लता लघ्वी, सा प्रिया प्रणयैकभूः । माद्वीकं यल्लतासक्तं, सुखं वैषयिकं हि तत् ॥ ४४ ॥ यः स्वर्गी व्यसनत्यागान्मुदे नयति नन्दनं । धर्माचार्यः स संसारत्यागान्नयति निर्वृतिम् ॥ ४५ ॥ इति मधुबिन्दुदृष्टान्तः ॥ नैवेच्छेद्व्यसनविनाशतः स सौख्यं मूर्खश्चेदमृतभुजा वितीर्यमाणं । तद्ब्रूहि प्रभव ! भवक्षयेण मोक्षमाकाङ्क्ष्याम्यहमपि दर्शितं मुनीन्द्रैः ॥ ४६ ॥ सुसखे ! वद जीव एष नृणां पशुरथवा पृथुसाहसेऽप्यशङ्कः । विषयसुखलवैकलम्पटात्मा, गुरुमपि गणयति यन्न दुःखशैलम् ॥ ४७ ॥ प्रभवः प्राह भो भ्रातः !, प्रत्यक्षं पितरौ तव । प्रेक्ष्यते त्वन्मयप्राणौ, प्राणितस्त्वां विना कथम् ॥ ४८ ॥ तवशापल्लवोल्लासाः, कान्ता एता यथा लताः । नैव स्युः कस्य हास्याय, त्वां विना निष्फलोदया ॥ ४९ ॥ जल्पितं जंबुनाम्नाऽथ, माता तातः सुतः सुता । कान्ता नैकान्तिकं किंचिद्भवेऽस्मिन् परिवर्त्तिनि ॥ २५० ॥ यथोक्तम्—अनाद्यनन्ते संसारे, केन केन न कस्य न । सम्बन्धो जन्तुना जन्तोः, केयं स्वपरकल्पना ॥ ५१ ॥ माता भूत्वा दुहिता, भगिनी भार्या च भवति संसारे । व्रजति सुतः पितृतां, भ्रातृतां पुनः शत्रुतां चैव ॥ ५२ ॥ परलोककथा यद्वा, दूरेस्त्वत्रैव वीक्ष्यते । मात्रादीनां परावर्त्तः, प्राणिनां क्लिष्टकर्मणाम् ॥ ५३ ॥ मित्र ! अवधानमाधाय, क्षणमात्रमिदं शृणु । ज्ञातमेकं तनूभाजां, महावैराग्यभागभाक् ॥२५४॥ अथ एकस्मिन् भवे सम्बन्धविचित्रेण कुबेरदत्त–कुबेरदत्तायुगलकथानकम्—

यथा—मथुरानगर्यां कुबेरसेना नाम्नी सुतनुलेश्या वेश्याऽभूत् । तस्याश्च प्रथमगर्भेण निर्भरायामगाधायां बाधायां जातायां जल्पितमम्बया, वत्से ! किममुना गर्भभारेण । केनापि प्रकारेण पातयाम्येनं किमस्माकमनेन व्यसनेन । असम्मते जाते तस्यास्तस्मिन्नर्थे प्रस्तावे जातं युगलकं–पुत्र पुत्रिका च । भणितमम्बया त्यज्यतामेतत् कृतमनेन वेश्याधर्ममर्मच्छिदा । प्रोक्तं कुबेरसेनया मातः ! उत्तालचित्ताऽसि यदि तवात्यन्तमेतत्कर्त्तव्यं तदा दिनदशकादूर्ध्वं कुर्वीथा यथारुचितम् । ततः कुबेरसेनया कुबेरदत्तः कुबेरद-

त्तेति दत्तनामाङ्के द्व मुद्रिके निर्माप्य दशरात्रे जाते जातरूपरूप्यरत्नचीनांशुकादिपूरितायां मंजूषायां निक्षिप्तं मुद्रिकायुग्मयुक्तं युगलकम्। प्रवाहिता सा जातायां यामिन्यां यमुनानिम्नगायां। भवितव्यतावशाच्च प्रवहन्ती प्रत्यूषे मञ्जूषा शौरिकपुरवास्तव्यश्रेष्ठिद्वयेन शौचाऽऽचमनकृते प्राप्तेन प्रेक्षिता स्वीकृता च। उद्घाट्य दृष्टमेतद्‌द्वितयं द्वितयेन। कालिन्दीदेवतया दत्तमेतदस्माकमिति गृहीतः कुबेरदत्त एकेनान्या चान्येन। जातौ च तौ क्रमेण वर्धिष्णू। ततो नवीनयौवनिकानिकामरामणीयकरञ्जितहृदयाभ्यां ताभ्यामिभ्याभ्यां सुसदृशरूपरेखाविशेषो विशेषफलवानस्त्विति कृतस्तयोरेव परिणयः। द्वितीयदिने दम्पतिभ्यां ताभ्यामारब्धायां सारिक्रीडायां सारिता कुबेरदत्तेन ग्रहणके नामाङ्का मुद्रिका। कुबेरदत्तायास्तामालोकयन्त्याः स्वमुद्रिकानिर्माणनाम्नोः संवादमुभयाकारसौसदृश्यं च विमृशन्त्याः संजज्ञे विकल्पः कदाचिन्मम सहोदरोऽयं स्यात्। न चैनं प्रति परिरम्भारम्भसंरम्भो मे मानसस्य न चास्यापि मां प्रति। तद्भवितव्यं विधिसंविधानेन केनाऽप्यत्र ॥ "पारयति यन्न कश्चित्, कर्तुं न मनोऽपि यत्र जंघालम्। उपनयति तदपि दैवं, शुभमशुभं वा किमाश्चर्यम् ॥ २५५ ॥" ततो विच्छिद्य सद्यो द्यूतक्रीडां मुद्रिकाद्वैतं कुबेरदत्तहस्ते वितीर्य गता सा मातुरन्तिके। शपथशतदाननियन्त्रितकृत्वा पृष्टा सा तया तवोदरजाता देवतादत्ता वा दुहिताऽहं स्यामिति। निवेदितो मात्रा यथावृत्तो वृत्तान्तस्तस्यै। तयापि प्रवेदितो विषण्णमनस्कया सर्वः कुबेरदत्ताय। ( ३००० A. ३६४८ B. D. ग्रं० ) तेनापि मुद्रिकाद्वयदर्शनोत्पन्नतथावितर्केण तथैवानुयुक्ता स्वमाता तमेवोदन्तमवादीत्। अनुचिताचाराग्निशोचिःसंचया(वा)चान्तचेताश्च स्वमातरपितरयोः संमुखमाख्यत्—अनुचितमाचरितं युवाभ्यां यदविदितसन्तानतत्त्वयोरावयोर्विवाहो विहितः, परं नाद्यापि परस्परपाणिस्पर्शातिरेकेण कोऽपि दोषः प्रादुरासीदिति विसृज्यतामेषा स्वपितृगृहे। गृहीताऽऽत्ममुद्रा, गता तत्र तेनैव निर्वेदेन रुदतोः पित्रोः प्राव्राजीत्। मुद्रिकां च तां गोपायितां स्वपार्श्वे एव व्यधाषीत्। निशितासि तीव्राणि तपांसि तप्यमानायाश्च तस्या अवधिज्ञानमुदपादि। तदाऽऽभोगेन भावयन्ती पश्यति कुबेरदत्तं व्यवहारगत्या मथुरापुरीप्राप्तं कुबेरसेनानाम्न्या स्वमात्रा सह संवसन्तं। तदुदरोपजातं चाङ्गजं तेनोत्संगीकृतम्। ततश्चिन्तितमनया–अहो अज्ञानविजृम्भितम्। अहो अविरतिविडम्बना। अहो अविवेकातिरेकः। अहो विषयकिम्पाकपा-

कुबेरदत्त-कुबेरदत्ता-ज्ञातम्।

कस्य विपाकः। तत्तावदुत्तारयामि पापान्धकूपकोटरात् कथंचिदेतमिति विचिन्त्य प्रवर्त्तिनीमनुज्ञाप्य प्राप्ता सा मथुरायाम्। सत्थावज्ञातचयर्या याचितकुबेरसेनार्प्पितस्वसद्मैकदेशे। कुबेरसेनाऽपि स्वबालकमार्यिकान्तिके निक्षिप्य स्वव्यापारपरायणा यावदास्ते तावत्तस्यास्तत्पार्श्वे विशिष्टविष्टरोपविष्टकुबेरदत्तस्य च प्रतिबोधाऽऽधानधिया बालकमुपलालयन्ती जजल्पैषा। त्वं बालक ! [1]भ्राता [2]भ्रातृव्यो [3]देवरः [4]पुत्रः [5]पितृव्यः पौत्रश्चासि मे। यस्य च पुत्रस्त्वमसि सोऽपि [1]भ्राता [2]पिता [3]पुत्रो [4]भर्त्ता [5]श्वशुरः [6]पितामहश्च मे। यस्याश्च गर्भात्प्रादुरभूद्भवान् साऽपि [1]माता [2]श्वश्रूः [3]सपत्नी [4]भ्रातृजाया [5]पितामही [6]वधूश्च मे। कुबेरदत्तेनेदमाकर्ण्य साक्षेपमाचचक्षे, आर्ये ! किमसमञ्जसमुल्लपसि परस्परव्याहतव्याहारो हि नार्हतदर्शने कस्यापि दृश्यते। आर्या व्याजहार–श्रावक ! मा मामेवमाक्षिपः। सर्वं तथ्यं पथ्यं सूपपादं चास्मि वच्मि। नहि दृष्टेऽनुपपन्नं नाम। अवधिज्ञानेन हि ज्ञातोऽयमर्थो मया तथाहि—१ भ्राताऽयं मे बालक–एकमातृकत्वात्। २ भ्रातृव्यो–भ्रातृपुत्रकत्वात्। ३ देवरो–भर्त्तुरेकमातृजातलघुभ्रातृत्वात्। ४ पुत्रो–भर्त्तुः पुत्रत्वात्। ५ पितृव्यो–मातृभर्तुर्भ्रातृत्वात्। ६ पौत्रश्च–सापत्नपुत्रस्य पुत्रत्वात्। १ बालकपिताऽपि मे भ्राता–एकमातृजातत्वात्। २ पिता–भ्रातुः पितृत्वात्, मातुर्भर्तृत्वात्। ३ पुत्रः–सपत्न्या संजातत्वात्। ४ भर्ता–तेन परिणीतत्वात्। ५ श्वशुरः–श्वश्रूभर्त्तृत्वात्। ६ पितामहश्च–पितामह्याः पतित्वात्। यस्याश्च गर्भादभूदयं बालकः सा मे—१ माता–जन्मनिमित्तत्वात्। २ श्वश्रूः–भर्त्तुर्मातृत्वात्। ३ सपत्नी–भर्त्तुः कलत्रत्वात्। ४ भ्रातृजाया–भ्रातुर्भार्यात्वात्। ५ पितामही–जनकमातृत्वात्। ६ वधूश्च–सापत्नपुत्रस्य भार्यात्वात्। सम्बन्धाष्टादशकसूचिके गाथे यथा—[1]भाय [2]भत्तिज्ज [3]पित्तिव्वो, [4]मह्पोत्तो [5]देवरो [6]सुओ सि तुमं। तुज्झ पिया य [1]पियामह, [2]पइ [3]भाय [4]सुओ [5]ससुर [6]जणओ ॥ २५६ ॥ माया य तुज्झ बालय ! मह [1]जणणी [2]सासुया [3]सवक्की य। [4]वहु [5]भाउज्जाय [6]पियामही य एत्थेव जम्मम्मि ॥ ५७ ॥ कुबेरदत्तेन संजातसंसारवैराग्येण कुबेरसेना प्रतिबोधविधानाय प्रोक्तमार्ये ! विशेषतो ज्ञीप्साम्येनमर्थं ततो निबिडव्रीडाजाड्यवान् शुश्रूषते। आर्यिकाऽपि मुद्राद्वयं संवादयन्ती कुबेरसेनाजठरयुगलजन्मतः प्रभृति प्रत्यपीपदत्। कुबेरदत्तस्तदाकर्ण्य संजातसंवेगवैराग्यवेगश्चिन्तयामास। धिगज्ञानं मे येनेदृशमकार्यं कार्यं स्म। 'अज्ञानं

खलु कष्टं, क्रोधादिभ्योऽपि सर्वपापेभ्यः । अर्थं हितमहितं वा, न वेत्ति येनाऽऽवृत्तो लोकः ॥ ५८ ॥ ईदृश नव्यविगोपक-कज्जलपङ्कप्रलेपसंपर्कात् । मुखमपि दर्शयितुमहं शक्नोमि न हन्मि तत्किं स्वम् ॥ ५९ ॥ आर्ये ! यामि प्रविशामि, साम्प्रतं प्रज्वलज्ज्वलनराशौ । कथमन्यथा मम स्यात्, पातकतो मोक्ष ईदृक्षात् ॥ २६० ॥ आर्या वक्ति श्रावक !, धर्मश्रद्धाप्रधान ! तेऽनुचितः । स्ववधः पापकृते यज्जिनेन्द्रदीक्षां जिघृक्षस्व ॥ ६१ ॥ ततस्तद्वचनात्स प्रव्रज्य तीव्रतपश्चर्याचारुचरित्रचातुरीमाचर्य स्वर्गमगमत् । कुबेरसेनाऽपि प्रतिपन्नोपासकव्रतव्राता श्राविका जाता । कुबेरदत्तार्यिकाऽपि प्रवर्तिनीपार्श्वमासाद्य संयमसाम्राज्यमाराधयामास । ‘ एतामहो भुवि भवस्य वयस्य शोच्यां, सम्यग् विचारय चिरं कुचरित्रचेष्टाम् । चित्तं द्विधा भवति चिन्तयतोऽपि यां मे, तज्जातिभिः किमिह कार्यमनार्यचर्यैः ॥ ६२ ॥ प्रभवेण ततो जल्पितमुत्पाद्य तावदत्र पुत्रमहो तद्रहितस्य पितॄणां प्रेत्य गतिर्नास्ति तृप्तिर्वा । ‘ गदति स जंबुनामा, न नाम सत्यं त्वयेदमप्युदितं । निजनिजकर्मायत्ता, भवति गतिः (का) क्वापि कस्यापि ॥ ६३ ॥ मिथ्याभिनिवेशोऽयं मिथ्याशास्त्रोपदेशजः पुंसां । द्विजभोजनात् पितॄणां, तृप्तिः सम्पद्यते सद्यः ॥ ६४ ॥ हविरग्निमुखे क्षिप्तं, पिशितं विप्रानने तु तृप्त्यै स्यात् । क्रमशो देवपितॄणां, व्यधिकरणमिदं कथं घटते ॥ ६५ ॥ अथ महेश्वरदत्तकथानकम्—

श्रृणु पुत्रेण पितॄणां परित्रिया तत्र मत्कथामेकां । निगमोऽत्र ताम्रलिप्त्यां, स महेश्वरदत्त इत्यासीत् ॥ ६६ ॥ तस्य समुद्रस्तातो, माता बहुलेति वित्तरक्षादौ । तत्परचित्तौ द्वावपि न धर्मवार्तामपि विधत्तः ॥६७॥ सततार्त्तवर्त्तिचित्तो मृत्वा महिषस्तयोः समुद्रोऽभूत् । मायाबहुला बहुलाऽपि, मृत्युमाप्ता शुनी सदने ॥ ६८ ॥ तदनु निरङ्कुशवृत्तिः, संजाता स्वैरिणी वधूरनयोः । परपुरुषपरीरंभिका, लोलुभा गङ्गिला नाम्नी ॥ ६९ ॥ निशि रमयन्ती ज्ञाता, छन्नं प्रच्छन्नकामुकं पत्या । उपपतिरसिना तेनाऽर्द्धमारितो निस्सरन्विहितः ॥ २७० ॥ कतिपयपदानि गत्वा, प्रहारपीडापराहतोऽपतत् । अनुतापतप्तचेताः, परासुरासीन्मनाक्सुमनाः ॥ ७१ ॥ तत्कालभुक्तकुलटागर्भेऽभवदात्मवीर्यसंयोगे( गात् ) । अङ्गोद्भवो महेश्वरदत्तस्यातिप्रियोऽजनि सः ॥ ७२ ॥ क्रियमाणेऽथ कदाचन सांवत्स-

रिके पितुः समुद्रस्य । क्रीत्वा हत्वा महिषः स संस्कृतः स्वजनभुक्तिकृते ॥ ७३ ॥ उत्संगीकृतपुत्रो, महेश्वरो यावदत्ति तन्मांसं । क्षिपति पुरस्ताद्बहुलाशुनिकायै तस्य चास्थीनि ॥ ७४ ॥ तावन्मासक्षपणस्य पारणे साधुरागतस्तत्र । पश्यति तं वृत्तान्तं, ज्ञानविशेषेण लीनमनाः ॥ ७५ ॥ धूत्वा शिरो नखच्छोटिकां च दत्त्वा महामुनिर्न्यवृतत् । अगृहीतभिक्ष एव, क्षणेन येनाऽऽजगाम पथा ॥ ७६ ॥ चिन्तयति स्म महेश्वरदत्तो ज्ञातेङ्गितो यतेस्तस्य । अनुपदलग्नोऽपृच्छत् , प्रणम्य पादौ स्वगृहकुशलम् ॥ ७७ ॥ किं न गृहीता भिक्षा, भगवन् ? मुनिराह कल्पतेऽस्माकं । न खलु पिशिताशिवेश्मनि, महेश्वरः प्राह को हेतुः ॥ ७८ ॥ मुनिराह महादोषं, मांसास्वादनमधर्मतरुमूलं । स्थलचरखचरादीनां, जीवानां येन वधहेतुः ॥ ७९ ॥ विक्रीणीते क्रीणाति, पोषयेन्मारणाय यो जीवान् । तत्पिशितं संस्कुरुते, भक्षयति स घातकः सर्वः ॥ २८० ॥ भवति यथा शाकिन्याश्शिखादिषा मानुषाङ्गमालोक्य । पिशिताशिनां तथा विश्वदेहिदेहान् विलोकयताम् ॥ ८१ ॥ यः परलोकं कर्माणि, मन्यते कोऽपि तेन मननीया । हिंसाऽहिंसा विरतिश्च, पाप्मने श्रेयसे क्रमशः ॥ ८२ ॥ तेन न भिक्षे भिक्षां, मांसाशिकुलेष्वहं जुगुप्सावान् । भवतो गृहे विशेषादित्युक्त्वा स स्थितस्तूष्णीम् ॥ ८३ ॥ मुहुरनुयुक्तः पदपद्मयुग्मपरिपर्युपासिततात्पर्यात् । कथयितुमारेभे, तस्य मातृपित्रादिवृत्तान्तम् ॥ ८४ ॥ पितृमहिषमांसमशित्वमस्य वत्सरदिने प्रसूः शुनिका । पत्युरस्थीनि भक्षयति, पुत्रमङ्के वहसि शत्रुम् ॥ ८५ ॥ इत्याकर्ण्य महेश्वरदत्तः संवेगमागतः परमं । तस्य मुनेः पादान्ते, दीक्षां शिक्षां च जग्राह ॥ ८६ ॥ ज्ञाता तदेवं प्रभव !, त्वयासौ पुत्रात्परित्रास्ति परत्र यादृक् । तत्किं सखे ! पुत्रविधित्सयैतां, त्यजामि दीक्षामृतपानलीलाम् ॥ ८७ ॥ एत्थंतरे पियवियोगदुक्खंतरियलज्जाए कडक्खसज्जाए जंपियं जेट्ठभज्जाए सिंधुमईए । सामि ! को नाम तुम्हाणमेत्तिओ परलोयसोक्खाय दिक्खाअक्खेवो, उवभुंजेसु तावेयं महाभोगं भोगसुहं, मा ते मयरदाढाए व्व उभयाऽभावाओ पच्छुत्तावो भविस्सइ । भणियं जंबुणामेण—" बाले ! लीलामुकुलितममी मन्थरा दृष्टिपाताः, किं क्षिप्यन्ते विरम विरम व्यर्थ एष श्रमस्ते । सम्प्रत्यन्ये वयमुपरतं बाल्यमास्था भत्रान्ते, क्षीणो मोहस्तृणमिव जगज्जनमालोचयामः ॥ ८८ ॥." यद्वा कथय कहानकं तावत् । तओ अहोमुही कहिउमारद्धा, अह मयरदाढाकहाणयं—

जयंतीए धणावहो सत्थवाहो तस्स सुधणो नाम विहियविणओ तणओ। सो य सयलकलावपारावारपारीणो जाणिऊण पिउणा पेसिओ पराए रिद्धीए ववहारत्थमुज्जेणीए। तत्थ विविहं ववहरमाणो कयाइ कामपडायाए नाम निग्गयाए वेसाए पत्तो पासाए। तीए य तेहिं तेहिं पयारेहिं तहा विहिओ जहा थेवदिवसेहिं जाओ तम्मओ। जन्नुज्जाणियाइ कज्जसज्जाए य महामायाए मयरदाढाए अक्काए कमेणमाणाविओ सव्वंपि दव्वं सपासाए। अवहरियसव्वसारो जाओ त्ति जाणिऊण दिट्ठो अक्काए अवन्नाए। कामपडायाए पासाए पवेसंपि अपावमाणो गलियाभिमाणो निग्गओ गेहाओ। चिंतेइ य। नेहनिहाणं तीए लक्खा मुद्दाहिं मुद्दियंपि मए भरियंपी तहा जायं, (हा) ही रित्तं झत्ति कत्तो वि ॥८९॥ नेहेण व देहेण व, दव्वेण व अप्पिएण सव्वेण। कस्सवि न होइ एसा, वेसा वेसत्ति जुत्तमिणं ॥ २९० ॥ जुत्तं च वुत्तं केणवि—" अन्नु खाइ अन्नु गलि लग्गइ, अन्नु जंतु वेपन्नइं मग्गइ। कुडिलकालकोमलघणकेसहि, नालियमनपत्तिज्ज(सि)हि वेसहि ॥ ९१ ॥ " अंखिहि रोयइ मणि हसइ, जणु जाणइ सउ सच्चु। वेस विसिट्ठह तं करइ, जं कट्ठह करवत्तु ॥ ९२ ॥ जं कट्ठह करवत्तु करइ, खरदंतखिवंतउ। तं जि विसिट्ठह वेसलोउ, कवडिण जंपंतउ ॥ ९३ ॥ जणु जाणइ सउ सच्चु मूढु परमत्थु न जोयइ। हियइ मुलुकहि हसइ, वेसओ अंखिहि रोयइ ॥ ९४ ॥ परिवारेण हक्कारिज्जंतो वि लज्जाए जयंतीए जाइउं न पारेइत्ति। गासवासाइ मेत्तंपि अपावितो परिवारो धणावहस्स पासे ॥९५॥ असेसो वि वुत्तो, वुत्तंतो पुत्तस्स अइदुहिओ धणावहो आहंसु। अच्छउ दूरे दुरप्पा किं तेण, वेसावसणिणा परिभणियं परिवारेण ॥ ९६ ॥ अविनीतेष्वपि विमुखाः, सन्तो नो स्वोपजीवकेषु स्युः। वत्सव्यथितेऽप्यूधसि, सुरभिर्नोत्क्रमयति क्षीरम् ॥२९७॥ तओ चिंतियं तेण—अवसोत्तपत्तं सित्थंपि व दव्वमेयं मयरदाढाए गिलियं कह वालेयव्वंति, लद्धोवाएण अंतरंगपुरिसे पेसिऊण कयसम्माणो मन्नावेऊणमाणीओ अप्पणो पासे पुत्तो। पच्चइयपुरिसे सहाए दाऊणमइघणधणरिद्धिसमिद्धो काऊण, कन्ने किंपि कहेऊण पुणोवि पेसिओ अवंतीए। अप्पिओ सुसिक्खिओ मक्कडो एगो। सो य जावइयं दव्वं गिलावेऊण मुच्चइ मग्गिओ तावइयमप्पेइ। तत्थ पत्तो ववहरमाणो अइधणड्ढो सुधणो नाऊण निवेइओ मयरदाढाए दासीहिं विविहउत्तिजुत्तिभत्तिहिं मन्ना-

वेऊणमाणाविओ मंदिरे। जओ चेव वासराओ वत्तमकहंता पत्ता तुब्भे तओ चेव वेणिबंधाइ काऊण दुम्मणायमाणा पलायमाणे पाणे तुह पावणाऽऽसाए धारेमाणी, जावि याऽवत्था एत्तियं कालंति पत्तियावेऊण तीए भणिया कामपडाया। वच्छे! इयाणिं युज्जंतु ते मणोरहा। तओ पवत्ता पुव्वं व विविहोपयार पयारेहिं रंजिउमेसा। दत्रिणं मग्गिय अक्काए मक्कडं थडए पूईऊण मग्गिऊण य अप्पेइ एसो। तओ चमक्कियचित्ताए ताए कयाइ कामपडाया पुच्छाविया विन्नवेइ। अव्वो अउव्वो दव्वोवाओ कोवि एसो, ता पाणेस! पसायं काऊण कहेह एत्थ परमत्थं। भणियमणेण न पिए! पयासियव्वं कस्सइ, एयं मक्कडकामदुहा एसा। सयसहस्सलक्खकोडिकोडाकोडीणंपि पत्थिया न थक्केइ। तओ कयाइ अक्कावयणओ विविहोवयारपयारेहिं पल्हायमाणमाणसं सुधणं काऊण कामपडायाए जंपियं। 'मह नेहो जाणिज्जइ. तुह कज्जे जीवियंपि उज्झामि। तुह पिय! कहेसु को पुण, सिणेह-रेहाए कसवट्टो ॥ ९८ ॥ सुधणो भणइ महच्चिय, पाणपिए! पेम्ममम्ममत्थि धुवं। सिय–किण्हकारगो जेण, तुज्झ निच्चंपि चिट्ठामि ॥ ९९ ॥ भणियमिमीए न अत्थि एत्थ मज्झ संदेहो आउयाएवि एसो चेव पच्चओ। जेणेयाए जंपिअं वच्छे! एत्तियो तुहोवरि जामाउयस्स सिणेहो, जइ तुमं मक्कडकामधेणुंपि पत्थेसि ता तंपि ते न धरेइ। तओ—"येन प्राप्तेऽवसरे शत्रुषु मित्रेषु बन्धुवर्गेषु। नाऽपकृतं नोपकृतं न सत्कृतं किं कृतं तेन ॥ ३०० ॥" इय चिंतिऊण भणियं सुधणेण कंते! किमेत्तियमेत्त-गेण वि चोज्जमज्जुयाए हक्कारेहि, इह चेव जेण इयाणिमेव पूरेमि कोउगं। तओ तक्खणमेव हरिसविसंखलचलणगई वियडकडि-यडडोवा पत्ता मयरदाढा उच्चासणासीणा जोहारिया जामाउएण पभणिया य वच्छे! किमच्छेरं एयं निच्छिऊण मए तहा मंतियं तुह पुरओ किं दुक्करं पेम्मपोढिमाए। किं तए पुच्छि(सुत्ति)ओ पाणेसो, को पत्थणाविहाणमग्गो एयाए। भणियं तेण अम्मो अइदुक्करो पत्थणापयारो, जइ अंगीकरेसि ता कहेमो, भणियं च एयाए कामदुहालाहे वि किं नाम किं पि दुक्करमत्थि। जइ एवं ता चिरसंचियसव्वदव्वसारं नीसारेसु सगिहाओ। देसु जस्स कस्सइ पडिहासइ, पुव्विल्लधणस्स कणेवि विज्जमाणे न एसा फल-दायिणित्ति तेण भणिए, भणियमेयाए कस्स अन्नस्स घरसारमप्पिस्सं। किमन्नोवि कोवि गोरव्वो? अंगीकरेसु सव्वमेयंति अप्पिय-

मसेसं मणि–रयण–कणय–धण–वसणाइ कीलियापज्जंतं । अणेणवि पुव्वपउणीकयाणि वाहणाणि भरावेऊण कयाणि जयंतीए वहंत-याणि । तओ पूइऊण पणमिऊण खमाविऊण अ(प्पणा)प्पिया सपाणिणा मयरदाढा पाणिंमि गालियप्पदीणारा मक्कडकामधेणूं । भणिया य अक्का, इओ सत्तमदिणे दिणेसवासरे पढमपत्थणा कायव्वत्ति, भणिऊण य निग्गओ गेहाओ । वाहणाणुमग्गलग्गो पत्तो जयंतीए । मयरदाढावि रविवारे ण्हायाऽणुलित्तगत्ता होऊण थडए चडाविऊण मक्कडकामधेणुं पूइऊण पणमिऊण य पंचंगपणिवाएण मग्गेइ एगसयं, इमा वि मुद्दाओ उग्गीरिऊणमप्पेइ । वाराहिं दोहिं तीहिं अप्पिए पुव्वगिलिए सव्वसारे घरकुक्खी व । तक्कुक्खी जाया सव्वरित्ता । तओ मग्गिज्जंती वि न किंपि अप्पेइ । च(डि)ड्ढिज्जंती चिक्कारे चेव मुंचेइ । तओ सा खोट्टिया पोट्टं कुट्टेमाणी पोकारेइ । हा हा हया अहयं, वंचिया तेण धुत्तेण । पारउव्वपविट्ठं तदव्वं सव्वं पुव्वसंचियंपि गहाय गयं । कामदुहाए लोहेण, लंघियाऽहं विडंबिया एवंपि जणलग्गंपि गयं, संजाया रोरनारित्ति । “ पक्खी पासेसु जहा, जलंमि जालेसु जलयरा वावि । तह किं न लोहजंतंमि, निवडिया विणडिया एवं ॥ ३०१ ॥ ” इति मयरदाढाकहाणयं ॥ कहियं कहिऊण भणियं सिंधुमईए—भत्ताणुरत्ताओ विमोत्तुमम्हे, दिक्खाए सोक्खं परमीहमाणो । तं नाह ! किं मक्कडकामधेणु-लुद्धाए अक्काए समो न होसि ? ॥ २ ॥ भणियं च—इहलोकसुखं हित्वा, ये तपस्यन्ति दुर्धियः । त्यक्त्वा हस्तगतं ग्रासं, ते लिहन्ति पदाङ्गुली ॥ ३ ॥

जंबूनामा ततोऽवोचत्, ज्ञाता ज्ञातासि सुन्दरि ! । भोः सिन्धुमत्यवश्यं त्वं भौताचार्यसहोदरी ॥ ४ ॥ पुराऽभूत्परमाचार्यो, मूर्खचक्रैकशेखरः । सन्निवेशे क्वचित्प्राप्तो, जडिमा पिण्डितामिव ॥ ५ ॥ मुक्त्वा स्वस्य प्रतिच्छन्दं, मठिकारक्षपालकं । शिष्यं जगाम स ग्रामे, कदाप्यासन्नवर्त्तिनि ॥ ६ ॥ माहिषैर्दधिभिः सार्द्धमशित्वा कोद्रवौदनं । तुन्दं परिमृजन् सुप्तः, स्वप्नं साक्षादिवैक्षत ॥ ७ ॥ मठिका मोदकैः सा मे, सम्पूर्णा सिंहकेसरैः । क्षणात्प्रबुद्ध उत्तस्थौ, प्रीतिकण्टकितत्वचा ॥ ८ ॥ धावितस्तूर्णमभ्यर्णं, स्वभाममठिकामभि । शिष्यः कदाचिद्द्याद्वा, दद्याद्वाऽन्यस्य कस्यचित् ॥ ९ ॥ तत्रैत्य तालकं द्वारे, मठिकायामदाद्द्रुतं । शिष्यमाह मठी सेयं, दिष्ट्या मे मोदकैर्भृता ॥ ३१० ॥ शिष्यो नृत्यति तोषेण, द्विगुणं तद्गुरुस्ततः । शिष्यमादिष्यदद्य त्वं, समग्रं ग्राममाह्वय

( सत्वरम् ) ॥ ११ ॥ मया देयाऽचिरादद्य, सद्यो मोदकभक्षिका । ग्रामो निमन्त्रयामासे, ततः शिष्येण सर्वतः ॥ १२ ॥ मद्गुरुर्मोदकैरद्य, भोजयिष्यति सज्जनान् । सुप्रसन्नेन रुद्रेण, तैर्मठी निर्भरं भृता ॥ १३ ॥ समस्तेऽपि जने प्राप्ते, प्रौल्यां पङ्क्त्यां निवेशिते । मार्गमालोकमाने च, मोदकानामुपायताम् ॥ १४ ॥ तालमुद्घाटयामास, गुरुर्यावत्प्रमोदवान् । रिक्तां फुत्कुर्वन्तीं तावत्, मठीमालोकते कुधीः ॥ १५ ॥ ग्रामो हसन्नथोत्तस्थौ, दत्ततालः परस्परं । आह स्म भस्मभूल्लोकः, क्षणमेकं प्रतीक्षताम् ॥ १६ ॥ युष्मदागमहर्षेण, विस्मृतं स्थानमस्ति मे । सुप्त्वा प्रागिव यावत्तज्जानीयां भोजयाम्यथ ॥ १७ ॥ पादौ प्रसार्य सुप्तोऽसौ, तथा स्वस्नोपलब्धये । शिष्योऽपि वारयामास, लोककोलाहलं मुहुः ॥ १८ ॥ मूर्खः शिष्यो महामूर्खो, गुरुश्चाश्चर्यमेतयोः । संयोगः सदृशः सोऽयमन्धस्य बधिरः सुतः ॥ १९ ॥ युक्तं चोद्यते—श्वेताम्बरेषु सज्ज्ञानमज्ञानं भस्मवेश्मसु । ब्राह्मणेष्वक्षमा कुक्षि-पर्याप्तिर्दिक्पटव्रते ॥ ३२० ॥ न लक्ष्येते ( तौ द्वौ च ) लोकेन, हस्यमानावपि स्फुटं । कृत्वाऽट्टहासः स्वस्थानं, जगामाथ जनोऽखिलः ॥२१॥ ततः शुभे ! परिभावय—भौताचार्यशिरोमणिर्जगदिदं जाड्येन जिष्णुर्यथा, स्वप्नाऽऽसादितमोदकैः पुरजनानामन्त्र्य हास्योऽभवत् । भोगैः स्वप्नसमैस्तथा कतिपयैरेतैः क्षणध्वंसिभिर्भूयो लोभयमानिका मम मनः किं हस्यसे त्वं नहि ॥२२॥ इति भौताचार्यकथा ॥ अह पउमसिरी पभणइ, मोत्तूणाऽम्हे वयं पवन्नस्स । पिय ! ते पच्छुत्तावो, होही वाणरवरस्सेव ॥२३॥ अथ वाणरमिहुणकहाणकं—

एगाए अडवीए, वाणरमिहुणं अहेसि सुसिणेहं । परिअडमाणं पइतरु, तं सुरसरितीरमणुपत्तं ॥ २४ ॥ वंजुलसाले कीलेइ, तत्थ मंथरविसालसाहाले । कयफालो पालंबाउ, चुक्कओ मक्कडो पडिओ ॥ २५ ॥ खरधरणिवट्टनिट्ठुर पहारपीडाए पाविओ संतो। देवकुमारायारो, सो जाओ माणुसजुवाणो ॥ २६ ॥ तो वाणरी विचिंतेइ, तित्थमाहप्पसंपयाणप्पा । अहह इमा ता अयमिव, अहंपि पाडेमि अप्पाणं ॥ २७ ॥ विच्छोहछोहियाहं, करेमि एगागिणी किमिह रन्ने । होऊण माणुसी नणु, इमस्स अंकंमि कीलामि ॥ २८ ॥ तह पडिया सा जुवई, जाया जाया जहा अणंगस्स । हरिसभरनिब्भराइं, कीलेउं दोवि लग्गाइं ॥ २९ ॥ जुवइं जंपइ पुरिसो, जाओ हं वाणरो वि ताव नरो । जइ पुण पडेमि ता होमि, सुयणु नूणं सुरकुमारो ॥ ३३० ॥ भणियमिमीए मा

नाम, सामि ! अइलोहलालसो होसु । अमरमिहुणाणुगाराणमम्ह किं नूणमूणमहो ॥ ३१ ॥ पुण पडियाणं जाणेइ, को णु मा होज्ज मूलनासोवि । कुण भणियं मा लंघसु, महवाणिं दिव्ववाणिं व ॥ ३२ ॥ वारंवारं वारिज्जमाणमाणसवियप्पदप्पो वि । पडिओ पुणो वि जाओ, वाणरभावेण तेणेव ॥३३॥ अइदीणमणो अणुतावतावियंगो कुरंगनयणाए । पुरओ पत्तो झूरेइ, वारियं ते मए न कयं ॥३४॥ सा आगएण केणावि, रायकुमरेण नियपुरं नीया । विहिया जाया जाया य, भायणं भूरिभोगाण ॥३५॥ स पवंगो गंगाए, कयतुंगतरंगभंगिसंगाए । गोरंगिझाणझिज्झंतपत्तलंगो गओ निहणं ॥३६॥ इय नाह ! कहिउ मइं अप्पभाउ, परिभाविउ जं वाणरह जाओ । अइयारु न किज्जइ कहिंवि अत्थि, जिंव पडियइ नेयारिसि अणत्थि ॥३७॥ इति वाणरमिहुणकहा ॥ अथ जम्बूर्बभाषे—सुन्दरि ! शृणु ममापि भावं । " औचित्यचारि म(चित्त)थितं चतुरोऽपि लोभं, कान्ते ! करोति तदहं किमु मास्म कार्षं । लोभं विना न खलु कोऽपि कुतोऽपि कस्याप्यभ्यासमाश्रयति जातु तनूद्भवोऽपि ॥ ३३८ ॥ " न चैष दीक्षालोभो ममौचित्यातिक्रमकारी, तस्याः श्रेयःसिद्धिनिबन्धनत्वात् । यद्वा न करोम्येव लोभलाम्पट्यम् । न च न भाविदीक्षाशिक्षासाम्राज्यमस्य प्राक्पुण्यप्रभावादवश्यंभावित्वात् । भाग्यसौभाग्यभाजो हि भूयान् कोऽप्यर्थोऽप्राप्यमानोऽपि सिद्धदत्तस्येव सद्यः संपद्यते । तदभावे त्वतिलोभसंभवेऽपि वीरसेनस्येव विलीयते, तथाहि—चन्द्राभायां नगर्यामाशापुरी नामतोऽर्थतश्च क्षेत्रदेवताऽऽसीत्तस्याश्च मन्दिरोदरे द्यूतकारः कोऽपि क्षपायामुपेत्य तत्कालपक्वपूपांस्तद्दीपतैलेन खादति । ततस्तया स्वदीपच्छेदमुच्छिष्टतां स्पृष्टतां चामृष्यमाणया तद्भापनाय प्रसारितं ललल्लोललम्बजिह्वालं वक्त्रान्तरालं, तेन च निर्भयेन निःशूकेन चार्द्धजग्धपूपेन निष्ठ्यूतं जिह्वायाम् । ततः कथमुच्छिष्टनिष्ठ्यूताऽपूतामेतामन्तःक्षिपामीति तथास्थितजिह्वैव देवी प्रातर्ददृशे पौरलोकैः । अहो किमिदमाकूतमुत्पातः कोऽप्येष पौराणामित्याकुलैस्तैः क्रियमाणेष्वपि शान्तिकपूजाप्रकारेषु यावन्न संवृणोति वक्त्रान्तरालपातालं तावज्जल्पितं जनैर्भीतचेतोभिः । पुर्यां पर्याप्तुयात्कश्चिदेतदुत्पातप्रशान्तये, उदितं तेनैव–अहमत्रार्थे समर्थः, परं प्रथमं तावद्दीनारशतं पूजाप्रकारोपचाराय मत्करे कुर्वीध्वं, प्रयोजनसिद्धौ वस्त्रादिसन्मानः समुदायोचितः कोऽपि कार्यः, जनो मण्डलमण्डलैर्मन्त्रयामास । द्यूतकारमान्त्रिकोऽयं व्यसनविषन्नानस्मा-

नालोक्य बुभुक्षुर्विभक्षयिषति पूजाव्याजेन परं किं क्रियते व्यसनार्त्तचेतोभिः। "नैमित्तिकानां भिषजां द्विजानां, ज्योतिर्विदां मन्त्रकृतां च पुण्यैः। लक्ष्मीवतां वेश्मसु देहपीडाभूतग्रहादिव्यसनं समेति ॥ ३३९ ॥" इत्यर्पितं दीनारशतं तस्य हस्ते। रात्रौ भट्टारिकामन्दिरान्तः प्रविश्य प्रदत्तद्वारकपाटसंपुटः प्राह स्म। किमिति कृत्ये प्रकृत्या न भवसि ?। कृतपूतने ! मण्डितं विज्ञानं किंचिन्न करोषि मदुक्तं युक्तम्। तदस्तु वक्रवेधस्य वक्रा कीलिकेति यावज्जिह्वायां विष्टायै संरंभते तावन्न किंचिदेतस्य पापीयसोऽकर्त्तव्यमस्तीति, जाता यथावस्थितमूर्त्तिरेषा। जातमुपप्लवप्रशमात् पत्तने सौख्यम्। अन्यदा द्यूतहारितमस्तकपणः प्राप्तोऽसौ भट्टारिकायाः पुरः प्रोवाच।



देवि ! देहि पणितहारितमस्तकस्य मे तन्मोचनमूल्यं दीनारपंचशतीम्। भट्टा०—किं त्वया त्वत्पित्रा वा मत्पार्श्वे निक्षिप्तमासीत्। द्यूत०—मातर्न निक्षेपकः कोऽपि, किन्तु मस्तकच्छेदान्ते व्यसने स्मृता त्रायस्व माम्। भट्टा०—किं न त्रायिष्ये त्वद्भक्तेस्तादृशा यत्क्रियते तदत्यल्पम्। दुरात्मन्निदानीमेवं नाम दीनता दर्शयसि तदानीं तदकार्षी ॥ ३४० ॥ न चैतच्चिन्तितमेतया नैव मृत्युदशादीनां याचमानं विमानयेत्। स (न) खल्वाकुलितैः प्राणैः परप्राणान् क्षणात् क्षिपेत्।

द्यूत०—यदि न भक्त्या प्रसीदसि तदा यथा प्रसीदसि तथा करोमीति तद्भङ्गकारिपाषाणाय बहिर्निस्ससार। भट्टारिका क्षिप्रमेव द्वारं पिदधे। द्यूतकारो महतीं शिलामुत्पाद्य प्राप्तः पिहितकपाटं द्वारं प्रेक्ष्य, विलक्षः शिलया कपाटे आस्फोटयामास। तथापि तयोरनुद्घटितयोर्मन्दिरप्रदीपनाय प्रावृतत्। सर्वं सम्भाव्यते स्वर्भाणुस्वभावेऽस्मिन्निति भीतया तया सत्वरं द्वारमुद्घाट्य पूत्कृतम्—रे रे नष्टदुष्टचेष्ट ! मा मन्मन्दिरं दिदीपः। निष्कपतया कृताऽहं त्वया किंकरीव किं करोसीदानीं, याहि पुस्तिकामेतामादाय दीनारपञ्चशत्या ददीथाः (याः)। द्यूत०—यदि नैतावन्मूल्यं लप्स्ये तदा ते(न)दरास्ते च मेढकाः, क्व यास्यसि, मयाऽऽरब्धेत्युक्त्वा पुस्तिकां च गृहीत्वा प्राप्तोऽयं विपणिपङ्क्तौ। पुस्तिकां च प्रदर्श्य मूल्यमतुल्यं जल्पन्नुपहस्यमानः प्राप्तः पुरन्दरपुत्रस्य सिद्धदत्तस्य हट्टे। तेनापि पुस्तिकां

सिद्धदत्तेन पुस्तिका-क्रयणम् ।

प्रेक्ष्य मूल्यमुक्तस्तदैवावादीत् । सिद्धदत्तेन चिन्तयांचक्रे–किमिदं मर्कटस्य जयकुञ्जरमूल्यम् । तद्भवितव्यं हेतुना केनापि । तदन्तस्तावदालोकयामीति विसृत्य वीक्षते प्रथमं पत्रम्—"प्राप्तव्यमर्थं लभते मनुष्यः" इति । अये ! उपजातेरेक एवायं पादः । कटरे मम हृदयसंवादः । इयमेव परमार्थव्यवस्था । इति दीनारपञ्चशतीं प्रदायाऽऽदायि पुस्तिका । यावत्तमेव पादं परामृशन् कथमयं श्लोकः शेषपादत्रयीपवित्रः स्यादिति ध्यायंश्चिन्तारत्नप्राप्ते चात्मानं कृतार्थं मन्यमान आस्ते तावत्प्रातिवेश्मिकवणिक्पुत्रैस्तालोत्तालवाचालैरहो सदायप्रायापूर्वक्रयाणक्रयेण वर्द्धिता गृहवार्त्तेत्युपहसद्भिः प्रकाशितोऽयमर्थः पुरन्दरस्य, सकोपोऽयमुपागतस्तत्र दिनाय व्ययविलोकनाय । पुस्तिकाक्रये दीनारपञ्चशतीव्ययं विलोक्य प्रोक्तं पित्रा कुत्रार्थे व्ययोऽयमियान् । के वयं विद्वांसः पुस्तकसंग्रहाग्रहग्रहिलो यदि परं भवानेव विद्वान् । विक्रीयमाणयाऽप्यनया न कोऽपि पानीयमपि पाययति । तद्व्रज त्यज मद्गृहामेतावता वित्तेनोपात्तेनात्र प्रवेष्टव्यम् । तत एतावद्भिः सहस्रैरर्जितैर्मयाऽऽगन्तव्यमिति निश्चित्य निःसृतोऽयं प्रदोषे । स्थितः पत्तनान्तर्वर्तिनि देवकुले क्वापि क्षपाक्षेपणाय । तत्पादतात्पर्यं पर्यालोचयन्निश्चिन्तः सुखं सुष्वाप ।

इतश्च तस्यामेव पुर्यां राजामात्यपुरोधःपुत्रिकाणां रतिमञ्जरी–रत्नमञ्जरी–गुणमञ्जरीणां सहसंवाससंजातनिस्सीमसख्यानां विप्रयोगभीरूणामेकदा संलापः समजनि । किल बालकालभावादेतावन्तं कालं सहपांसुक्रीडासुखमन्वभूम, संप्रति पुनरलंक्रियामहे वैरिणा यौवनेन । न जानीमो विधिवात्ययोत्पाट्य क्वापि प्रक्षेप्स्यामहे, ततो राजाङ्गजया जजल्पे–यद्येवं नाम युष्माकमन्योन्यं स्नेहानुबन्धस्तदा यावदद्यापि जनकैः क्वापि कस्यापि न वितीर्यामहे तावद् भवामः कस्याप्येकस्य स्वयमेव स्वयंवरा येन यावदायुरवियुक्ता वर्त्तामहे । प्रतिपन्नमेतदशेषाभिः । ततो राजाङ्गजया दूरदेशायातो महाकुलीनः कोऽपि पृथ्वीपतिपुत्रः पितृसेवको वीरसेननामा समाकार्य प्रच्छन्नं प्रोक्तः प्रस्तुतार्थे । तेनापि तत्तरुणिमोद्भेदभिदुरहृदयेन प्रतिपन्नमेतत् । पुरीपरिसरसुरागारमण्डपमध्ये तरलतरतुरङ्गसाधनसध्रीचा त्वया तृतीयदिने निशीथिन्यां स्थातव्यं येन परिणीय पलायामहे इति कृतसङ्केतस्य तस्यागतं तद्दिनं । तत्र च तत्कालप्राप्तेन तत्तातवैरिवारेणाऽऽरुद्धोऽयं योद्धुम् । स्वल्पबलोऽनल्पबलेन परिभूतो गतः स्वदेशम् । राजाङ्गजाऽपि जातायां याममा-

त्रायां त्रियामायां परिणयोपकरणवस्तुविहस्तहस्तदासीसहिता प्राप्ता संकेतमण्डपान्तः, ददृशे सुखप्रसुप्तस्तत्र सिद्धदत्तः। पूर्वपरिचयोपजाता संधया चोक्तमेतया। अहो ईदृशप्रयोजनारम्भसंरम्भेऽपि निश्चिन्तैः प्रसुप्यते, ततः प्र(बोध्य)चोद्य स ग्राहितः स्वपाणिं पाणिना। निर्वर्त्तितगन्धर्वविवाहया कृतः कङ्कणबन्धः। स त्वं गृहीतसंकेतः किमप्यनुल्लपन् किमिदमिन्द्रजालं जायत इति विस्मयमानमानसः "प्राप्तव्यमर्थं लभते मनुष्यः" इति परामृशन्नुक्तस्तया कृता कृतार्थाहमन्ये अपि मद्वयस्ये विदधीथाः। कुत्र पुनः पलायनवाहनानि सन्निहितानि विहितानि। तेनोक्तम्—किमेवमाकुलाऽसि निद्रालवो वयं शयिष्यामहे तावदिति स्थितः सुप्ताऽपदेशेन, तया तु तं तथा निराधि-निराकुलमालोक्य, मा नाम न भवेद्वीरसेनोऽयमिति पूर्वानीतज्योतिः सरावसंपुटमुद्घाट्य यावद्व्यलोकि तावज्ज्ञातमज्ञातः कोऽप्येष धूर्त्तः प्राप्तः स्यात्। अस्तु यः कश्चित् सुकुमाराकारेणानेन कन्दर्प्परूपदर्प्पापहारी पुण्योपनीतः परिणीत एव किंचिदनुचितं ततो वीक्षिता मस्तकान्तन्यस्ता पुस्तिका। गृहीत्वा विवृत्यादितो वाचयति। "प्राप्तव्यमर्थं लभते मनुष्यः" इति। पादमात्रमप्येतत्कर्पूरपूरपरिमलवद् व्यापकं लोकानाम्। अहो समयाक्षराणीव एतदक्षराणि परमार्थप्रथाप्रथीयांसि। कथमन्यथेत्थमर्थोऽयमभूत्। आगमिष्यन्त्योरपि सख्योः प्रत्ययाय करतलघोलितकज्जलेन "किं कारणं दैवमलङ्घनीयमिति" द्वितियपादं लिखित्वा द्वितीययामान्ते जगाम रतिमञ्जरी स्वगृहान्। तृतीयप्रहरे प्राप्ता रत्नमञ्जरी। सापि कङ्कणबन्धलिपिसंवादौ रतिमञ्जर्याः पर्यालोच्य तेनात्मानं पर्यणाययत्। पादद्वयान्ते तथैव—"तस्मान्न शोको न च विस्मयो मे" इति तृतीयपादमालिख्य स्वस्थानमासीसदत्। एवं गुणमञ्जर्यापि तुरीययामे समागत्याऽऽत्मानं तेन परिणाय्य—"यदस्मदीयं न हि तत्परेषाम्" इति तुरीयपादं तत्पुरो निवेश्य स्वगृहमगात्। ततो मा वयमीदृगपराधाऽऽधानधामानि भूमेति न्यवेदितं सुताचेष्टितं चेटिकाभिस्तन्मातॄणां, ताभिरपि स्वस्वभर्तॄणाम्। ततोऽभाणि भूभुजा–देवि! दुहिता दुश्चापलतू(चू)ला शीलिता येन शून्याऽमर्त्त्यसद्मसुप्तः कोऽपि कार्पटिकः पादचारी परिणीतः स्यात्, किं क्रियते। देवी—देव! नापरः प्रकारः कोऽपि सम्प्रति "सकृत्कन्याः प्रदीयन्ते।" एतदेव तथा प्राप्तं–'प्राप्तव्यमर्थं लभते मनुष्यः'। किंच त्वत्पुत्रिकया स्वीकृतः कार्पटिकोऽपि पृथ्वीपतिरेव। यतः—"क्षाराम्भोधिभुवः कलङ्कि-

ततनोरिन्दोर्जडज्योतिषो, मुक्त्वा शम्भुशिरोनिवासमपरा का भूमिका के गुणाः। अभ्रात्किं नु पतन्ति कोऽपि गुणिनो राजप्रसादोचिता, यत्र स्वामिदृशो व(च)लन्ति धवलास्तत्रैव सर्वे गुणाः ॥ ३४१ ॥" तद्यावन्नाद्यापि क्वापि प्रयाति तावत्प्रधानपुरुषान् प्रेष्य प्रवेशयतां स्तम्बेरमारूढः पत्तनान्तः। ततः पार्थिवेन प्रेषितैः प्रधानपुरुषैरवार्यतूर्याडम्बरेण प्रबोधितः सिद्धदत्तः कङ्कणत्रयालङ्कृतेन दक्षिणपाणिना पुस्तिकामादय वाचयति-प्राप्तव्यमित्यादि। अये! जातोऽयं श्लोकश्चतुपादः। अहमप्यष्टपादोऽभूवम्। इयन्मात्रेऽपि प्रयाणे निर्व्यवसायस्याप्यनुकुलविधेर्मे जातश्चतुर्गुणो लाभः। यद्वा—"व्यवसायं दधात्यन्यः, फलमन्येन भुज्यते। पर्याप्तं व्यवसायेन, प्रमाणं विधिरेव नः ॥ ३४२" ततो राजकुञ्जरमारोप्य प्रापितः प्रधानैः पृथ्वीपतिप्रासादमेषः। कृतपादप्रणामो मम प्रसादपात्रस्य पुरन्दश्रेष्ठिश्रेष्ठिनः पुत्रोऽयमिति प्रत्यभिज्ञातः पृथ्वीभुजा। अमात्यपुरोहितावपि विदितवृत्तान्तौ प्राप्तौ स्वस्वपुत्रिकावृत्तान्तं राज्ञे व्यजिज्ञपताम्। सर्वेऽपि पुरन्दरपुत्रजामातृप्राप्त्या पुत्रिकाचापलचेष्टितेन तुष्टाः परिणयोत्सवाय प्रोत्सहन्ते स्म। पृथ्वीपतिना रतिमञ्जरी-रत्नमञ्जरी—गुणमञ्जरीणां तिसृणामपि प्रारेभे पाणिपीडनं प्रतिपादितवांश्चैष सहर्षम्।—"तत्तिल्लो विहिराया, जाणेइ दूरेण जो जहिं वसइ। जं जस्स होइ जोग्गं, तं तस्स बिइज्जयं देइ ॥ ३४३ ॥" प्रदत्ता पार्थिवेन जामात्रे ग्रामपञ्चशती, जातो महान् सामन्तः। पुरन्दरपादपर्युपास्तिपरायणः पालयामास समृद्धिः। "पुण्यप्रकर्षनिकर्षः खलु सिद्धदत्तः, सुप्तोऽप्यसुप्तमहिमप्रथिमानमापत्। त्रस्तैकहायनकुरङ्गविलोलनेत्रे, तद्वत् भविष्यति ममापि मतार्थसिद्धिः ॥४४॥ तओ पउमसेणाए, जंपियं पिय! किज्जए। पव्वज्जाउज्जमो किंतु, ऊसुगत्तं न जुज्जए ॥ ४५ ॥ थिराण होइ जं लच्छी, जहा सुंदरसेट्ठिणो। ऊसुगाण पुणो जाइ, हुंतीवि जह विट्ठुणो ॥ ४६ ॥ गामे गुणत्थले आसि, सिट्ठी नामेण सुंदरो। सुंदरी दइया तीए, जाओ पुत्तो पुरंदरो ॥ ४७ ॥ समाणकुलसीलाण, गेहे सो परिणाविओ। गामवासंमि सव्वाणि, सुहेणच्छंति ताणि य ॥ ४८ ॥ दुद्धं दहि घयं (निद्धं) नव्वं, सव्वं धन्नं घरोदरे। (पाणि) धासिंधणाइ निम्मोल्लं, गामवासो अहो सुहो ॥ ४९ ॥ भत्ता जुत्ताणुरत्ता य, एगा सिलप्पिया पिया। पुत्तो वुत्तकरो जंमि, सग्गो गामो वि सो धुवं ॥५०॥ उक्तं चान्यत्र—"एकु वल्लही अउरू अणुकूली एहज सग्गह मत्थइ तू(मू)ली।

वल्लहू माणुसु विणइ पयट्टइ सक्करसत्थरि चेवरु लोट्टइ ॥ ५१ ॥" कयाइ तस्स गेहस्स, अंगणग्गखडक्किया । वासासु पडिया जायं फोक्कवारमहो(ओ)गिहं ॥ ५२ ॥ सुंदरीए तओ सेट्ठी, वुत्तो किं न खडक्किया । काराविज्जइ अज्जेव, नाहं सक्केमि रक्खिउं ॥ ५३ ॥ वित्तिं न देसि कस्सावि बारपाहरियस्स वि । पसारिय (मु)सुहं दारं, वंचिओ जो न चोरए ॥ ५४ ॥ तेणुत्तं अत्थि वग्घि व्व, दुवारे कुक्कुरी कया । भसंती वारए सव्वमपुव्वं पविसंतयं ॥ ५५ ॥ कालेण कित्तिएणावि, सावि केणावि मारिया । उग्घाडं सव्वहा सुन्नं, दुवारमभविंसु तो ॥ ५६ ॥ सुंदरीए तओ वुत्तं, कावि किज्जउ कुक्कुरी । दुवारे सुन्नए कोवि, जाही मुसियमंदिरं ॥ ५७ ॥ सेट्ठिणा भणियं लच्छी, थिराणं होइ सुंदरि ! । होइ वा जाइ वा एवं, आह सा को णु जाणए ॥ ५८ ॥ अन्नया पुत्त-पत्तीवि, मया तो तीए भासियं । जुवाणं परिणावेसि, किं न पुत्तं पुणो वि तं ॥ ५९ ॥ एक्काऽहं केत्तियं काउं, कम्मं सक्केमि ते गिहे । पुत्तो वि तरुणो दव्वं, बाहिं फेडिस्सए फुडं ॥ ३६० ॥ सुंदरेण पुणो तीए, दिन्नं तं चेव उत्तरं । तीए वुत्तं नवो कोइ, लग्गो तुज्झ असग्गहो ॥ ६१ ॥ लच्छी गच्छिस्सए वस्समेवमेगग्गहस्स ते । मज्झं बुज्झेसु कज्जस्स, कस्सावि कुरु जंपियं ॥ ६२ ॥ गामस्स तस्स मग्गेणमेगया भामहो गओ । जंतस्स तस्स रत्तीए, तट्ठा वेगसरी वरा ॥ ६३ ॥ सेट्ठिगेहंगणे पत्ता, वीसं दीणारवासणे । पाडित्तु पुट्ठिदेसाओ, सत्थमज्झे पुणो गया ॥ ६४ ॥ दट्ठुं सेट्ठी तमंधारे, हक्कारेऊण सुंदरिं । तुट्ठो भीओ य कट्टेइ, निक्खिवेइ घरोदरे ॥ ६५ ॥ दीणाण कित्तियाणंते, नाउं जीरवियं धणं । एगंते मंतए तो सो, तोसोऽऽवेसेण सुंदरि ! ॥ ६६ ॥ लच्छी थिराण जा आसि, वुत्ता तुज्झ पुरो मए । सा एसा आगया कज्जे, तम्हा कुरु थिरत्तणं ॥ ६७ ॥ खडक्कियाए दिन्नाए, विसे वेगसिरी कहं । भसमाणी सुणी लच्छिं, तं वासेज्ज सयंवरं ॥ ६८ ॥ पेईहराण गंतूण, कहेज्ज वहुया धुवं । सव्वं निविग्घमो जायं, कज्जथेज्जे कए मए ॥ ६९ ॥ तुंगा खडक्किया एत्थ, दारे दोवारिओ वरो । कायव्वो पुत्तवीवाहो, दव्वेण बहुणाऽहुणा ॥ ३७० ॥ सुंदरो णूसुगो एवं, संजाओ कज्जसाहगो । ता पाणनाह ! तं देसु, थिरत्ते चित्तमुत्तमं ॥ ७१ ॥ सिद्ध कज्जं विणासित्ता, उत्तालो अणुतप्पई । जहा विट्ठू सुणेयं पि, पाणनाहकहाणयं ॥ ७२ ॥ कोडुंबिएण केणावि, विट्ठुणाऽऽरा-

हिओ सुरो। दव्वत्थिणा पसन्नो सो, विट्टुमेवं पयंपए ॥ ७३ ॥ होउं हेममओ मोरो, नच्चिरो पइवासरं। दाहामि पिच्छमेगंते, तेण तं होसि ईसरो ॥ ७४ ॥ तहत्ति तेण संलत्तो, लब्भंतो हेमपिच्छए। रिद्धिसमुद्धुरो जाओ, सव्वहा विलसेइ सो ॥ ७५ ॥ अन्नया चिंतियं तेण, को गंतूण दिणे दिणे। पिच्छं मग्गेइ सव्वंगं, मोरं तं चेव गिण्हिमो ॥ ७६ ॥ दिणे अन्नंमि नच्चंतं, पिक्खिउं तं स धाविओ। घेत्तुं पाणिहिं होऊण, वायसो स पलाईओ ॥ ७७ ॥ तत्तो दिणाउ नो देइ, दंसणंपि स विंतरो। तो जाओ विद्दुठुकोडुंबी, दरिद्दो दीणदुम्मणो ॥ ७८ ॥ उच्यते च—"अत्वरः कुरु कार्याणि, त्वरा कार्यविनाशिनी। त्वरमाणेन मूर्खेण, मयूरो वायसीकृतः ॥ ७९ ॥" एवं च—[1]पियसलिलालिभोगेहिं ताव, नणु अम्हि जाइ तारुण्णु जाव। अणुमग्गलग्गा अम्हेवि दिक्ख, जरजुन्न करेसहुं सव्वसिक्ख ॥ ३८० ॥

अथ जम्बूस्वाम्यवादीत्—भवदुदितमखिलमेतद्दयितेऽश्रूयत, तथापि न स्थैर्यमार्यैः कार्यम् [2]धर्म्यकर्मणि, पापे तु युक्तमिदम्। खरतरसमीरलहरीलोलत्पल्लवलवाग्रतरलेऽस्मिन्। जनजीविते विभास्यति, निशां नवा वेत्ति को भुवने ॥ ८१ ॥ किंच—"सम्पच्चम्पकपुष्परागति रतिर्मत्ताङ्गनापाङ्गति, स्वाम्यं पद्मदलाग्रवारिकणति प्रेमातडिद्दण्डति। लावण्यं करिकर्णतालति वपुः कल्पान्तवातभ्रमद्दीपच्छायति यौवनं गिरिणदी वेगत्यहो देहिनाम् ॥ ८२ ॥" स्थिरतायां हि कृतायामविहितसद्धर्मकर्मणोऽपि भवेत्। यदि पञ्चता तदा स्यात् कुगतिः सुकृते! त्वरध्वं तत् ॥ ८३ ॥ चरणं चिकीर्षितं चेद्भू(द्रु)तं, तदाऽऽचर्यतां चतुरमतिभिः। कालविलम्बेन तु विजयसुजयवद्विघ्न एव स्यात् ॥ ८४ ॥ विजयसुजयदृष्टन्तः—

लीलाललाटिकावद्वसुमत्यां वसुवतीति पूरासीत्। जयमित्रस्तत्राभूद् भूपतिरद्भुतगुणग्रामः ॥ ८५ ॥ अस्ति स्म सोमधर्मा, तस्य श्रेष्ठी वणिग्जनश्रेष्ठः। प्रादुरभुवंस्तनयाश्चत्वारस्तस्य सद्विनयाः ॥ ८६ ॥ विजय-सुजयौ सुजातो, जयन्त इति

हेममयमयूरो वायसीकृतः।

[1] पियालापीभोगेहिं B पियपालि लालि० C. D। [2] धर्म्मं B. D।

नामधेयविख्याताः । सुकुलोत्पन्नाः कन्यास्ते चोपायंसत चतस्रः ॥ ८७ ॥ द्वित्रिचतुरादिपुत्रैस्ते फलिताः प्रौढपनसपादपवत् । गृहभारधुराधारणधौरेयत्वं दधुः सुधियः ॥ ८८ ॥ अथ सोमधर्मणा धर्मराजराज्ये यियासुना सर्वैः । आकार्य गोत्रिकादिस्वजनजनो भोजयांचक्रे ॥ ८९ ॥ स जगौ—तस्य समक्षं चतुरश्चतुरसुनूद्भवांस्तान् स्वान् । मा वत्साः ! कार्षुः सर्वथा, मिथः कलहकालुष्यम् ॥ ३९० ॥ कीर्त्तिलता कूल्याम्भो, धर्माङ्कुरप्ररोहणैकमही । सौख्यसुधांशुशुधांशुः, संवित्तिर्यत्कुटुम्बस्य ॥ ९१ ॥ अथ कथमपि संवित्तिस्तुद्यत्यन्योन्यमङ्गना वचनात् । सुनयास्तथापि तनया, न विरोद्धव्यं न योद्धव्यम् ॥ ९२ ॥ यतः—"अपकीर्त्तिः सुरावासः, सुखप्रवासः कुवासनाभ्यासः । पापस्यैकनिवासः, परस्परं यः कुले कलहः ॥ ९३ ॥" अपि बन्धूनां द्वैधं, विदधानानां कुकर्णजापेन । मा कर्णे कार्ष्ट वचः सदाऽबलानां खलानां च ॥ ९४ ॥ यदि तु कुतोऽपि भवन्तो, विभेजिवांसो भवेयुरुपरोधात् । क्रमशः कोणचतुष्कात्, तदा निधानानि गृह्णीयुः ॥ ९५ ॥ कतिपयदिवसैर्जाते, ताते प्रेतेशवेश्मवास्तव्ये । प्राग्वत्प्रीत्या वर्त्तिषत ते प्रभूतानि वर्षाणि ॥ ९६ ॥ सुमहति कुटुम्बभारे, जाते यावन्न शक्नुवन्त्येव । वर्त्तितुमेकत्र ततो, विभक्तभावं विनिश्चिक्युः ॥ ९७ ॥ द्रव्यं दृश्यं विज्ञातमस्ति, यावद्विभाजयन्ति निधीन् । तावद्गवाश्वकेशाः प्रादुरभूवन्विजयकलशे ॥ ९८ ॥ क्षेत्रस्य मृदन्यस्मिन्, तदुत्तरस्मिन्पुराणवहिकास्ताः । मणिरत्नहेमदीनारसंचयस्त्वन्तिमनिधाने ॥ ९९ ॥ कलशं स्वकीयमालोक्य, मांसलामोदकंदलितहृदयः । नरिनर्त्ति स्म जयन्तः, शेषास्तु तपस्विनः शुशुभुः ॥ ४०० ॥ हहहा तातेनोच्चै किमवञ्चिष्महि तदा हि नाविद्म । प्रक्षिप्य कूपकुहरे, त्रीनत्रोत्स्यत वरत्रा द्राक् ॥ १ ॥ सर्वकनिष्ठः प्रागपि, पितुः प्रविष्टो मनस्यभूद्भूयः । कोऽपि विकारः केनापि, किन्तु नालक्ष्यतास्माकम् ॥ २ ॥ तदिदानीं किं कुर्म्मः, पूत्कुर्मः कस्य तातदैवहताः । यदि वा सर्वेषां सर्वमेव कुर्म्मश्चतुर्भागम् ॥ ३ ॥ वदति स्म जयन्तस्तानेतन्न कदापि लभ्यते कर्त्तुम् । स्वमुखविभक्ते तातेन, विभवजाते पुनः किमिदम् ॥ ४ ॥ कनकादितुल्यमासीद्भवदप्राप्त्या मृदादितामगमत् । तत्कुप्यत पापेभ्यः, स्वेभ्यस्ताताय मैव पुनः ॥५॥ अथ बहलकलहकोलाहलाः स्वकं स्वजनवर्गमुल्लङ्घ्य । अहमहमिकया जयमित्रपार्थिवं द्रागुपास्थिषत ॥ ६ ॥ सम्प्रतिपत्तिस्तेषां, तेनापि न पार्यते स्म कारयितुम् । अपरापरपुरपरिषत्पर्य-

टनैश्चिक्लिशुस्ते तत् ॥ ७ ॥ संवत्सरावसाने, जयमित्रनृपान्तिकं पुनः प्रापुः । पटहप्रदानपूर्वं, तेनाप्युद्घोषणाऽकारि ॥८॥ दास्यति विवादमेतं, यो दास्यति चित्तकलुषता चैषाम् । दास्यति तस्य नरेन्द्रो, [1]मन्त्रित्वं दास्यते तं च ॥ ९ ॥ कस्यापि वाणिजस्यांऽगजेन पटहः समुच्छुपे सपदि । नृपतिसमीपं नीतेन, तान् प्रति [2]श्रीनृपादेशात् ॥ ४१० ॥ भणितममुना न नामास्ति, कापि वः सर्वथा विवादाप्तिः । तातेन विवादः छिन्न एव यत्केशमृन्मुख्यैः ॥ ११ ॥ जन्मनि जातकशुद्धिः, सर्वेषां वो व्यधायि जनकेन । गणकेनाकथि यद्यस्य, कर्म निस्समसमृद्ध्यै स्यात् ॥ १२ ॥ वृष-करभ-सुरभि-सेरिभ-रासभ-तुरगादिविक्रया[3]करणे । विजयस्य करिष्येते, निरवधि[4]वृद्धिं न सन्देहः ॥ १३ ॥ सुजयस्य फलस्फात्यै, केदाराद्यं सदैव कृषिकर्म । धनतः कलान्तरादेराप्स्यति लक्ष्मीमिह सुजातः ॥ १४ ॥ मरकतदीनाराद्यैरनवद्यं व्यवहरन् विपणिवीथ्याम् । जगति जयन्तस्तु वणिग्ग्रामैकग्रामणीर्भविता ॥ १५ ॥ अत एव व्यवहारे पित्रा, परिभाव्य तत्र तत्रैव । प्रागेव च नियुक्ताः, स्व स्वं वः शङ्के समं चैतत् ॥ १६ ॥ आनाय्य ततो राजा, जयन्तकलशस्य कारिता संख्या । तिर्यग्धान्यकलान्तर-धनेष्वपि प्रायशः साऽभूत् ॥ १७ ॥ क्षितिपेन ततः कथयांचक्रे भो युक्तियुक्तमस्तीदम् । मन्यन्तां न [5]स्वेर्सिमथ, बान्धवाः क्वापि लभ्यन्ते ॥ १८ ॥ यत उक्तम्—"लहइ लीह सव्वो वि सहोयर परियरिउ, धरिबाहिरि वसणूसवि संगरि अवयरिउ। सेसु विडा विडु[6]सत्थु अत्थखायणमणउ, विहडइ वसणि कुमित्तु [7]जेव निग्घिणमणउ ॥ १९ ॥ सो जि दिवसु सुपसत्थु पसत्था सा रयणि, जहिं नियनयणिहिं दिसहि भाउय अरु भयणि। जहिं घरि पुत्त-पउत्त बंधु नवि संचरहिं, तहिं निरु पडणभयाउलथंभवि थरहरहिं ॥ २० ॥" वत्सरमेकं तावन्न्यायमिमं धीधनास्तत्कुरुध्वम् । यदि भवति वितथमेतन्मम दातव्यस्तदा दोषः ॥ २१ ॥ नृपवचसा संवित्तिं, विधाय ते गेहमागताः सर्वे। तदभिहितव्यवहारैरवाप्नुवन्नुद्धरा वृद्धिम् ॥ २२ ॥ धनमनिधनमर्जयतामन्योन्यगृहेषु जग्धिमाचरताम् । दिवसाः प्रयान्ति तेषां, परस्परप्रीतियुक्तानाम् ॥ २३ ॥

---

१ मित्रत्वं । २ 'श्री' नास्ति B प्रतौ । ३ क्रयणे B. कथेण D. C । ४ मृ । ५ स्वेस्निग्ध B. D । ६ अत्थु । ७ जेमुव B ।

अथ वसुमतीनगर्यामाचार्योऽनार्यकार्यवर्जयिता। विजहार श्रीवसुदत्तनामधेयो सतां ध्येयः ॥ २४ ॥ परिसरवसुन्धरायां तेषां सद्धर्मदेशनासुधया। निर्वापयतां भवतापतप्तचित्ताननेकजनान् ॥ २५ ॥ शुभचर्याः सोदर्याश्चत्वारस्तेऽप्युपेत्य सत्थगिरः। प्रणिपत्य धर्ममर्माणि, कर्मनाशाय श्रृण्वन्ति ॥ २६ ॥ वचनसुधाधाराम्भः, पायं पायं श्रवाञ्जलिपुटेन। चत्वारोऽपि बभूवुर्भावितमनसो विशेषेण ॥ २७ ॥ प्रणिपत्य गृहानीयुर्विजयोऽजल्पद्व्रतं ग्रहीष्यामि। वदति स्म जयन्तोऽहमपि बान्धव! प्रव्रजिष्यामि ॥ २८ ॥ किं त्वद्यापि न पुत्रः, पर्याप्तो वेश्मभारमुद्वोढुम्। कतिपयमासानन्तरमुभावपि प्रव्रजिष्यावः ॥ २९ ॥ क्वचिदवसरे व्यलोकयदागच्छन्ती पितुर्गृहात्सायम्। स्मरमिव भुजङ्गमेकं, युवतिर्जाया जयन्तस्य ॥ ४३० ॥ संजिगमिषा प्रकर्षात्तस्य तया मनसिजज्वरार्दितया। अतितनुपीडाव्याजोऽज्ञाप्यत भर्त्रे जयन्ताय ॥ ३१ ॥ आगच्छत्सु चिकित्सावित्सु चिकित्सासु कार्यमाणासु। न खलु मनागपि तस्याः, सा व्याजरुजा शममयासीत् ॥ ३२ ॥ व्याजप्राणाचार्यः स भुजङ्गः प्रापितो जयन्तेन। निजजायायाः पार्श्वे, चिकित्सितुं तनुरुजामुग्रम् ॥ ३३ ॥ उपपतिरिति विज्ञातः, कालात्कियतोऽपि तेन स स्वदृशा। परजनमुखेन तत्रागच्छंश्च निवारयांचक्रे ॥ ३४ ॥ यावत्तथापि न त्यजति, तां ततो मारणार्थमादिष्टाः। निजपत्तयश्छलंते, मृगयन्ते तस्य तात्पर्यात् ॥ ३५ ॥ बहुलनिशीथे तैः, क्वापि तस्य सदनाद्विनिस्सरन्निहतः। अहह भुजङ्गभ्रान्त्या, बन्धुर्विजयो जयन्तस्य ॥ ३६ ॥ असममसमंजसं जातमेतदाकर्ण्यकर्णकाकोलम्! बन्धुवियोगव्यथयाऽतिदुस्थितोऽजायत जयन्तः ॥ ३७ ॥ पूर्वविरक्तस्तस्मादतिवैराग्याद्दिदीक्षिषुः सुजयः। विजयो यथा द्विमासीं तेनैव विलम्बयामास ॥ ३८ ॥ कतिपयदिनावसाने, विविक्षवः केचनापि लुण्टाकाः। अर्दिदिषत सुजातेन, स्वपिति न भीतस्ततो रात्रौ ॥ ३९ ॥ सुजयोऽपि तत्र रात्रावेति स्वापाय नित्यमप्यभयः। लुण्टाकलोकरक्षानिबद्धकक्षः प्रदोषेऽपि ॥४४०॥ व्यग्रतयाऽथ कदाचिन्निशीथसमये स आपतन् ददृशे। सदनोपरि संचारेण, सत्वरं स्वानुजभ्राता ॥ ४१ ॥ उपसृत्य मण्डलाग्रप्रहारतः पञ्चतां ततो गमितः। प्रविशच्चौरभ्रान्त्या, ज्ञात्वा च शुशोच सुचिरमसौ ॥ ४२ ॥ व्यतिकरमेवं ज्ञात्वाऽनुतापपावकनिकामतप्ततनुः। सुबहुसुजातोऽशौचीद्विदितोदन्तो जयन्तोऽपि ॥ ४३ ॥ भयचकितकुरङ्गीलोचने पद्मसेने!, विदितमिदमशेषं मत्कथाया रहस्यम्।

विजयसुजययोर्निष्फलादीक्षाभिलाषा।

अजनि यदपमृत्योर्निष्फला स्थैर्यभाजोर्विजयसुजयबन्ध्वोर्जैनदीक्षाऽभिकाङ्क्षा ॥ ४४ ॥

अह भणइ कणयसेणा, तुमं समो होसि सामि! थेरीए। इय विसयगामलाभे वि, जो न संतोसमुव्वहसि ॥ ४५ ॥ एगम्मि सन्निवेसे, वसंति दो सेज्झियाउ थेरीउ। ताणेगा आराहेइ, खित्तरक्खाकरं जक्खं ॥ ४६ ॥ अणुदिणं मंदिरं संमज्जिऊण लिंपेइ सत्थिए देइ। भत्तीए धुवमुग्गाहिऊण पूएइ जहसत्ति ॥४७॥ भणइ सुरो स पसन्नो, वरसु वरं साऽऽह देसु दीणारं। पइदिवसमेत्तिएणं, पुज्जंति मणोरहा मज्झ ॥ ४८ ॥ लद्धेण तेण सारखाण-पाणनेवच्छलच्छिसच्छाया। कुणइ अतिहीण पूयं सम्माणइ सयणसहियाउ ॥ ४९ ॥ अह मच्छरछारच्छुरियमाणसा पुच्छए परा थेरी। हे थेरि! कहसु सव्वं, तुह कत्तो एत्तिया रिद्धी ॥ ४५० ॥ भणियं ए(चे)ईए अहं, कह न कहिस्सं नियाए भइणीए। संकरियाए पुव्वं, जह कहियं जोगराएणं ॥ ५१ ॥ तओ भणियं तीए कहेहि, ताव कहाणयं एयं। पच्छा पुच्छिय कहिज्जासु, तओ सा कहिउमारद्धा ॥ ५२ ॥

जोगरायनामाओ ठक्कुरो एगो कइवयपत्तिपरिवारिओ पत्तो पट्टणमेकं, परिसराऽऽरामवसुंधराए साहारतरुच्छायाए उवविट्ठो विसमिउं। पुरमज्झाओ निग्गओ तत्थागओ एगो पुरिसो। उववेसिऊण तंबोलदाणपुव्वं पुट्ठो य ठक्कुरेण। किंनामधेयमेयं नयरं ?। पुरुषः—कलिमहाराएणमप्पणो पाणवल्लहस्स पसायदाणेण दिज्जमाणमणायारं नामेयं पट्टणं। योग०—कीदृशोऽत्राऽऽचारप्रचारः ?। पुरुषः—अणायारे केरिसो आयारो होइ। तहवि सुणेहि—

जूयारपारदारिय-विडगंठिच्छोडखत्तहडपाया। पाएण एया निवसइ, एत्थ पुरे तुंगधवलहरे ॥ ५३ ॥

योग०—अहो आचारचातुरीचतुरस्रप्रजारामणीयकं नगरं धवलगृहाणाम्। कः पुनरत्र कलिमहाराजस्य प्रसादपात्रं पार्थिवः ?।
पुरुषः—अविचारो नाम।
योग०—युज्यते अनाचारस्याविचाराधिपत्यम्। अयोमुद्रिकायां हि काचमणिरेव योग्यो भवति ॥ ५४ ॥ के पुनस्तस्य गुणाः।

पुरुष०—नहु रक्खेइ देसु पुरु पट्टणु, कर करेइ नवनवा अभिक्खणु । मंडइ कूडुपजाहं जउप्परि, कोसु तहावि होइ रित्त उपरि ॥५५॥ कुसलि खेमि संजाइ विहाणइ, अज्जु जाउ नायरजणु जाणइ । दिवसु जाइ वरिसेण समाणउ, सो करेइ इयराणि वराणउ ॥५६॥
योग०—साध्वी राजलीला । काकोऽपि पार्थिवो राजहंसपरिवारः श्लाघ्यते तत्कथय कः पुनरमात्यः ? ।
पुरु०—अन्नाओ अमच्चो । जस्स पुरे पत्ताणं, रावा हत्थाण होइ परिताणं । उप्पिट्टणय पहारो, जारिसउ मालपडियाणं ॥ ५७ ॥ योग०—उचितमुचितेन योजयति विधिः । अविचारस्य खल्वन्याय एव संगच्छते । युक्तं चोद्यते—जूयारियस्स धूया, परिणीया गंठिछोडपुत्तेण । जुडियं वेवाहित्तं, मिलियं रयणस्स उ रयणं ॥ ५८ ॥ योग०—कः प्रतीहारः ? । पुरु०—पिसुणपयारो पडिहारो । पडिओ सुकालह पासि, एत्थु अत्थि मनभंतिकरि । जो पडिहारह पासि, धणकणलुद्धउ जाइ जणु ॥५९॥ योग०—कः पुनर्नगरारक्षः ? ।
पुरुषः—सव्वलूडि[1]नामो । चोरचरडबंदियहं न [2]भुक्कइ, [3]भासिउ भागु लेइ नहु संकइ । रक्खवालु खयकालु सुरज्जह, सव्वलूडि भुल्लइ न सकज्जह ॥ ४६० ॥ योग०—अहो माणिक्यानामेकावली । श्रेष्ठी कतमः ? ।
पुरुषः—लइवुडित्ति सेट्ठी । विहिमाणिहिं ववहरइ निच्चुसेई तुलकरिसिहिं । घयमहुगुग्गुलगुलीगुलिहिं, इयरेहिं विमिस्सिहिं ॥६१॥ पंचवीस बोल्लेइ बोल्लि पावियइ न एक्कहिं । तहवि धम्मतुल्ल एत्थु नयरि मन्निय‌इ सुलोक्केहिं ॥ ६२ ॥ परं पुत्तेण [4]गुणग्गलेण, मूलनासेण लहुणावि । विभिन्नी[5]भूएण संपइ, पच्छे पाडिउव्व सो जाओ ॥६३॥ जओ—उग्घाडइ फुक्काए तालय[6]मच्छीणमजणं हरइ । खणइ कुहणीहिं खत्तं, गंठिं छोडेइ पाएहिं ॥ ६४ ॥ योग०—अहो एकैकमेकार्गलम् । अस्ति मुनिरत्र कश्चिद्विपश्चित् ।
पुरुषः—अत्थि डलकावणसीसमित्तपरिवारो महातवस्सी सावगिली ।

[7]छारभरुकुंडियंगो वियडजडाजूडमंडियसिरग्गो । बगझाणं झायंतो, गसिउमणो सव्वपुरदव्वं ॥ ६५ ॥

---

१ डु । D २ चु B. D । ३ ना D । ४ गुणलग्गेण B । ५ सू । ६ इ । ७ छार B ।

योगराज्ञा विसंवादि राज्यस्थिति प्रेक्षणम् ।

योग०—यदि बकध्यानद्रव्यगाद्धर्यं तदा किमस्य भस्मजटाकू(जू)टाभ्याम् । का पुनर्वेश्या गणग्रामणीर्गणिका ? ।

पुरुषः—मयरदाढाए दुहिया बहुमाया ।

अंखिहिं एगि निरिक्खइ एगहं देइ मणु, अन्नि इब्भ बोलावइ अन्नहं देइ खणु ।
सिरि सिकिरिउ लग्गहिं केवि दुवारि तसु, रूलहिं अलत्तउ जेव मुक्क किवि लेवि रसु ॥ ६६ ॥

योग०—अहो एतस्य वैशिके प्रागल्भी । अमूदृशि सर्वसमवाये कीदृशी राज्यव्यवस्था । पुरुषः—कहं न कहिस्सं ।

एत्थु पट्टणि लोगु छुट्टंतु चउहट्टइ हट्टि पुण जेण तेण जं, तंजि [1]लिज्जइ घरि बीहइ बंदियह धीर कावि कासु वि [2]न किज्जइ ।

नियचक्कहं परचक्कहं तणउ न भउ फिट्टेइ, आयउ देवह पइजणु [3]कहिहि केव छुट्टेइ ॥ ६७ ॥ अविय—जो जेण भिट्टिओ सो तेण पिट्टिओ, जो जेण दिट्ठओ सो तेण मुट्ठओ । जो जेण पाविओ सो तेण [4]चाविओ, जो जेण वासिओ सो तेण नासिओ ॥६८॥

किंच—कोइ विक्कयकज्जि जइ एइ, इह लेविणु किंपि किर तासु तिज्जु निवदाणि दिज्जइ, तं डाहिवुडं गहणि जं सुहाइ तं लेइ निच्छइ । सेट्ठि बलाहिउ मंतिभडु बंभणु सेसहं धाइ, खेमिकुसलि सो जइ कहवि वाह विइज्जउ जाइ ॥ ४६९ ॥

योग०—अहो राज्यस्थितिसौख्यं तन्मध्ये प्रविश्य प्रेक्षामहे तावत् । इत्युत्थाय पुरुषं विसृज्य प्राप्तः श्रेष्ठिहट्टे, लयुवुडि श्रेष्ठी दृष्ट्वा–कहं जगए व पिया जोगराओ इति उट्ठेऊण जोहारेइ । आलिंगिऊण य उववेसेइ उच्चासणे । कणभत्तएसु पत्तीणमविज्ज-माणेसु पत्तो डलकावण चेल्लउ उल्लवेइ । मज्झ एत्तो जंतयस्स तुम्ह पडलग्गाओ लग्गं जडाजूडे तणखंडमेगमासि । तं सावगिलि-गुरुहिं गहेऊण पेसिओ हं अप्पणाय । जओ तिणकणोवि अकप्पणिज्जो णे अदिन्नो । करे करेह एयंति अप्पिऊण गओ सो नियट्ठाणे ।

१ लिप्पइ । २ तवि । ३ कलि B. D । ४ दामिओ D ।

योगराजेन विसंवादि राज्यस्थिति प्रेक्षणम् ।

योग०—(स्वगतं-) कथमतृणहिंसकः कोपि महातपस्वी स भविष्यति, भविष्यति च मच्चिन्तितोऽर्थप्रथासामर्थ्यमस्येत्युत्थाय गृहे गत्वा भुक्त्वा च जगाम तत्पार्श्वे। नासिकाग्रलग्नलोचनमक्षमालाव्याकुलाग्रपाणिं सावगिलिगुरुमभिवाद्यावादीत्। भगवन्नस्ति मे दीनारसहस्रमेतत्। क्वापि स्थाने कारयध्वम्। सोमेश्वरयात्राप्रत्यावृत्तः प्रत्यादास्ये। भणितमनेन—न वयं द्रव्यमग्रपाणिनापि स्पृशामस्तद्यद्यवश्यकार्योऽयमर्थस्तदा मठिकान्तः क्वापि कोणे स्वहस्तेन मुञ्चस्व स्वहस्तेन च गृह्णीथाः, इत्ययं तथा कृत्वा नत्वा च निष्क्रान्तः। तिचउरमासेहिं तित्थजत्तं काऊण दिसोदिसं गएसु सव्वेसु पत्तिसु, कलहपिंगेणेगेण छत्तधरेणाणुगमिज्जमाणो पत्तो सो रत्तीए अणायारपट्टणदुवारदेसे। घोडयं झाडजडाए बंधिऊण कलहपिंगं पहरए मोत्तण जामदुगं जग्गिऊण पसुत्तो। तइज्जजामंते जग्गिऊण वाहरिओ पाहरिको। जागर्षि रे कलहपिंग! त्रिचतुरवेलायामजल्पीत्। जग्गेमि जग्गेमि किं तु चिन्तं चिन्तेमि-चोरेहिं चोरिए चोरिए ए(प)यम्मि पल्लाणं तए वा मए वा पुट्ठेण वहियव्वं। योग०—मूर्खशेखर! मल्हणिकायां गतायां किं घण्टकेन कार्यम्।

प्राहरिकः—तुरीयप्रहरेऽप्यसौ तथा वादितः प्रोक्तवान्-चिंतं चिंतेमि-मह देहगामे प्राहज कोडुंबिओ उंघकंताए वल्लहो वसइ। तस्स जाया निद्दा नाम नंदणी। दु(द्ध)णुकएण परिणीया। तीए जाया ठिप्पा नाम बेट्टिया। तव्वरचिंताए वाउलोम्हि।

योग०—धिग्मूर्ख! ठिप्पायाश्चंदको वरः सुलभ एव, किमत्र चिन्तया। एवं च जाए पभाए पत्ता ते दोवि हिंडियपुरिसेहिं उद्दालिओ वाहणतुरंगो सुंकमदाऊण किणिओ तए एसोत्ति। कयमत्थयपल्लाणो कलहपिंगेण धारिज्जमाणछत्तो जोगराओ जाव पुरंतो पविसेइ, ताव बोल्लाविओ लइलइ तंडाहिवइणा मत्थए पल्लाणं पल्लाणोवरि छत्तंति, को एस विसरिसो संजोगो। ता देह मे ठाणं अहवा पल्लाणंति। न तस्स तत्थ कोइ ठाणंति अप्पियं पल्लाणं, जइ तं तुरंगं पावीहामो पल्लाणंपि पाविस्सामोत्ति। तओ अज्जु रत्तीए तुरंगो पल्लाणं च लूडियंति, रावाहत्थो पत्तो स सव्वलूडितलारपुरओ। विन्नत्तो वुत्तंतो तस्स सव्वो। जहा

अज्ज पुरदुवारे मज्झ केणइ गहिओ पाणहियाओ पाणहियाओ गलगट्टिया तलगट्टिया। चोरिओ चोरिओ। गसियं साइल्लाणं पल्लाणंति। भणियमणेण-महात्मन्! निगृह्य दुर्वृत्तांस्तान् प्रयोजनं साधयिष्याम्यवश्यमेतत्। किन्तु रिक्तहस्तानां रिक्तैव प्रयोजनसिद्धिः।

योग०—अहो नगरारक्ष! सत्यमस्त्येतदस्ति। किं पुनर्न साम्प्रतं किमपि मे पार्श्ववर्त्ति, सिद्धप्रयोजनः प्रयोजनौचित्येन पूजां करिष्ये।

सर्वलूडिः—कथय तावत् कौतस्कुतीयं तेन वाद्भुत(वस्तु)भूतभक्तिवासो वेषविशेषलक्ष्मीः। योगराजेनैकान्ते क्वाप्यन्यवासांसि निवस्य समर्पितानि संवर्त्य तस्मै प्रोक्तं तेन-अपराह्णे सिद्धप्रयोजनं त्वं करिष्यामीति।

योग०—आस्तदेतदस्यापहारस्यापि कलान्तरप्रदानं यदनेन मच्चित्रवस्त्रस्वीकरणं। भवतु किं क्रियते। आशापिशाचिकैवं वञ्चयति। अपराह्णेऽपि प्राप्ते परेद्युरागन्तव्यम्। पुनः परेद्युः पुनः परेद्युरित्याचक्षाणोऽयं गणरात्रमेवातिक्रामयति न पुनः किंचित्कर्त्तुकामः, केवलं प्रियालापमधुरकेण मां मिमारयिषति। गच्छामि श्रीकरणमिति गत्वा अन्यायमित्यस्य पूरस्तादशेषं यथावद्वयजिज्ञपत्। सचिव ऊचिवान्-कर्त्तास्मि ते महतीं साराम्। प्रातःकरणवेलायां सर्वमत्रैव समर्पयिष्यामीति स प्रत्याशान्तःकरणः करणोदराद्द्वारप्राप्तः प्रोक्तोऽमात्यप्रधानपुरुषेण प्रातरमात्याय दातुं दीनारशतं सहैवानीय ममैकान्तेऽर्पणीयं येन प्रयोजनसिद्धिर्भवति।

योग०—करिष्याम्यौचित्यं सचिवाय प्रयोजनसिद्धौ पदान्तरे मिलितौ पारिग्रहिकपुरुषौ। ताभ्यामपि तदेवादिश्यते ततस्तौ प्रतीहारकटुकादीनपि द्वात्रिंशत्षोडशादीनपि याचमानांस्तेनैवोत्तरेण प्रेरयन् प्राप्तो दारभूमिकाम्। वणिग्लोकपेटकं शृङ्खलायन्त्रितमालोक्य प्राहरिकमप्राक्षीदपराधमेषाम्। हस्तेन तेन निर्दिशता दिश्यते स्म। रायगोउलाओ अपुच्छियाऽऽणीय गोमयइंधणेण एयस्स गेहे रद्धं खद्धं च। तिचउरपाडिवेसियाणेयाण गेहेसु वीसमिओ तस्स धूमो। एयस्स कुक्कुरीए रायकुंजरस्स सम्मुहं भुकरियं। एयस्स गिहदुवारे गच्छंतस्स राइणो अगाहा अंगबाहा जायत्ति रायाऽवराहिणो सव्वस्सावहारेण दंडेयव्वा एएत्ति।

योग०—अहो अन्यायनिष्ठा। अहो अयुक्तिप्रतिष्ठा। कालरात्रिरुपस्थितेदानीं धनिनां धर्मिणां साधूनां वा, दीनारशतममात्यो

योगराजेन विसंवादि राज्यस्थिति प्रेक्षणम्।

मार्गति। पारिग्रहिकादयोऽपि यथारुचितं याचन्ते। तुरङ्गस्तु मे पञ्चाशतमेव लभते, प्रहारपार्श्वादवलम्बको भारिकः। ततो यदि जीवन्नितो निःसरामि तदा लब्धमेव मया सर्वमिति।

"काले कलौ राजनि चार्थलुब्धे, धनानि किं रक्षत जिवितानि। स एव लाभो ननु शौनिकेन, मुच्येत मेषो गतकर्णको यत् ॥४७०॥" इति निराशीभूय निर्गतोऽसौ कृताऽन्यतो मुखद्वारां शावगिलिगुरोर्मठिकां गवेषयमाणोऽपि यावन्न प्राप्नोति तावन्निराशोऽभ्यासीत्। सोऽयं क्षते क्षारावसेकः। मन्ये दीनारसहस्रस्याप्यश्वगतिरेवाभूत्। कदाचिद्विचरता चतुरेणोपलक्षितो भिक्षुवेषेण क्षुल्लकः सः। तत्पृष्ठलग्नो जगाम सावगिलिगुरुमठिकाम्। प्रणम्योपविष्टस्तत्पुरस्तात्प्रोवाच–भगवन्नर्पितं तद्दीनारसहस्रं न्यासीकृतम्।

सावगिलि—कस्त्वम्? क्व कदा दीनारसहस्रमर्पितं, धूर्त्तः कश्चिदस्मद्ध्वंसनाय प्राप्नोसि।

योग०—स्वामिन्? किमेवमुच्यते। तदा त्वद्वचनान्मठिकान्तर्मुक्तं मया तत्।

साव०—तत्किं परस्वमङ्गुल्यग्रमात्रेणाप्यस्पृशन्तो वयं लुण्टाकाः कल्पितास्त्वया पर्याप्तं त्वदुपास्त्या। याहि यथागतमित्युत्थाय चिन्ताचक्रचटितो भ्रमन् गृहीतपुष्पचतुस्सरः प्राप्तो मकरदंष्ट्रायाः पार्श्वे, पृष्टस्तया प्रयोजनमवोचत्। तयापि जल्पितम्–अहं ते पओयणं पसाहेमि जइ लद्धस्स अद्धं देसि।

योग०—'सर्वनाशे समुत्पन्ने, अर्द्धं त्यजति पण्डितः' इति मनस्याधाय प्रतिपन्नवानेतत्, कथितं च तस्य तया। मइ तत्थ गयाए तए एवमेवं च कायव्वंति। तओ पत्थरभरियपेडाभारियमत्थयाहिं दसहिं दासीहिं अवरेण वि पउरेण पाइक्कचक्काइ परिवारेण सद्धिं सुहासणासीणा धारिज्जमाणमाऊरायवत्ता पत्ता सा सावगिलिगुरुसमीवे पणमिऊण भणिउमाढत्ता—

कलिराज्यकथा—मह धूयाए बहुमायाए चंपाए गयाए बहूणि दिणाणि जायाणि, ता मए तदाणयणाय तत्थ गंतव्वं। तओ

एयाओ मणिमरगयमोत्तियमाणिक्ककंचणभूसणाइभरियाओ दसपेडाओ ठाणे ठविज्जंतु, जावाऽहमागच्छामि । अत्रान्तरे प्राप्तो योगराजोऽजल्पत्–स्वामिन्नर्प्यतां मे न्यासीकृतं दीनारसहस्रम् ।

साव०—त्वमेव जानासि । यत्र स्वहस्तेन न्यस्तमस्ति तत एवाददीथाः । आदेश इति मठिकान्तः कोणान् गृहीत्वा निष्कान्तो योगराजः । दासीओ जाव ताओ पेडाओ मज्झे मोत्तुमुज्झयाओ तावागंतूण वद्धाविया मयरदाढा एगाए दासीए । सामिणि समागया गणिया सिग्घमागच्छिज्जउ । तओ जहेवागया गया सा गहियपेडा । वा(धा)लियगिलियदव्वो सावगिली ठिओ पसारियमुहो । समप्पियाणि पंच दीणारसयाणि मयरदाढाए जोगराएण, सेसदव्वस्स सयं धारिऊण अप्पियाणि चत्तारिसयाणि मूलनाससेट्ठिणो रक्खणाय निक्खेवगो, सयं च ण्हाणभोयणाईणि कारविंतीए संकरियाए दासीए अप्पियं । उवभुत्ते तंमि जाव वसणभोयणाइकारणेण दीणारसयमेसो मूलनाससेट्ठि मग्गेइ । ताव सो साहिक्खेवमक्खिसु । को तंसि, किं तं दीणारसयं?, एवं वुत्तो सो आसीणो तस्स घरणगे लंघणंते समागओ तस्स ताओ लयवुडिसेट्ठी, भणिओ य तेणेसो वच्छ ! जं अत्थए एयस्स समप्पेसु । अन्नहा न छुट्टसि । अहवा गहिलत्तणं काऊण गमेसु दिवसाइं । अहमेयं निवारइस्सं । जीरवियाणि चत्तारि वि सयाणि अद्धद्धेण विभजिस्सामो । बीयदिणे वि जोगराएण मग्गिज्जंतो मूलनासो गहिलत्तणेण 'आवावाव' त्ति करेइ । सयणो परजणो य जो कोवि किंपि भणेइ तस्सवि सव्वस्स सम्मुहं आवावावत्ति करेइ । तओ भणिओ जोगराओ लयवुडिसेट्ठिणा सव्वेण असव्वेण वा तए पारद्धो पुत्तो गहिलत्तं पत्तो, तओ परव्वसाओ एयाओ कहं किं पिलेसि । ता तुण्हिक्को चिट्ठसु, उट्ठिऊण ठाणाउ एयाओ गच्छेसु । तओ तेण कहियइ राउलु खाइ, मइं रक्खसु जिव भुक्खियउं । जइ पुणु लियणह जाइ सेट्ठिज काल विलंबियइ । इय चिंतिऊण कालविलंबे आरद्धे कइवयदिणाऽवसाणे भणिओ मूलनासो जणएण, अप्पेसु दोन्नि दीणारसयाइं पुव्वपडिवन्नाणि । तओ तस्सावि संमुहं भणियमणेण–'आवावाव' त्ति । पुणोवि भणिए वुत्तं तं चेव तओ कुविएण ताएण भणिओ मूलनासो । अरे मए वि सद्धिं 'आवा-

वाव'त्ति करेसि। तओ भणियं तेण, तएवि तुह पिउणावि पियामहेणावि सद्धिं 'आवावावत्ति'। तओ उट्ठिऊण गओ सो नियगेहे, हक्कारिऊण भणिओ जोगराओ। वालेमि ते चत्तारि दीनारसयाणि जइ मे दोन्नि देसि, पडिवन्नं तेण, कहिओ कन्ने कज्जविसेसो। तओ गओ जोगराओ मूलनासस्स पासे जोहारिऊण भणिओ तेणेसो, नाहं किंपि मग्गेमि जए अणुजाणसि ता तुह पत्तित्तणेण जीवामित्ति। अणुन्नाओ सो तहा आराहिउं लग्गो, जाओ वीसासठाणं। कयाइ पओयणेण पट्ठावियाए सेट्ठिणीए दिन्नो सो चेव सहाओ। मुक्का य तेण नेऊण सेट्ठिणी कत्थइ पच्छन्नघरे। दिन्नं दुवारे तालयं। आगओ मूलनासस्स पासे, कहिं सिट्ठिणित्ति पुच्छिओ। न जच्छइ (जंपिज्जइ) उत्तरं। निबंधेण य पुच्छिज्जंतो जंपेइ, का सेट्ठिणी, को तंसि ?, भुज्जो भुज्जो चड्डिजंतो भणिइ 'आवावावत्ति,' सामभेयाइणा भणिज्जमाणो वि लोएण तं चेव वागरेइ। तओ भणिओ सो लयवुडिसेट्ठिणा। जइ एयस्स संतियं सव्वरसमप्पेसि ता लहेसि सेट्ठिणिं, अन्नहा गया चेव म(तु)हवहुया। तहा कए तेणऽप्पिया तस्स पिया। दिन्नाणि दोन्नि दीनारसयाणि लयवुडिसेट्ठिणो किंपि वसणभोयणकज्जेण धारिऊग सेसं निक्खयं खड्डाए जहा संकरिया न याणेइ। वसणभोयणाइदव्वव्वए विसेसं पिच्छंतीए तीए पुच्छिओ एसो, कओ ते एत्तिया वित्तसंपत्ती। कहिओ तेण सब्भावो, न उण दव्वगोवणट्ठाणं। तओ घरव्वयजोग्गं मग्गियं किंपि दव्वं। अह रत्तीए तीए सुत्तविड्ड(द्ध)एण ठियाए उट्ठिऊण तेण तओ ठाणाओ कड्ढियं किंपि। अणुमग्गलग्गाए जाणियं संकरियाए ठाणं। बीयदिणे बाहिरगयस्स तस्स उक्खणिऊण गया सा। आगओ जोगराओ जाव न संकरियं पेच्छइ ताव संकिओ गओ निहाणठाणे, तयंपि सुन्नं पिच्छंतो जाओ सव्वसुन्नो। भोयणमेत्तंपि अपावमाणो निग्गंतूण नयराओ गओ सट्ठाणं। चिन्तयति च—

यैरौदार्यमहोदयान्न विहिता वन्ध्यार्थिनां प्रार्थना, यैः कारुण्यपरिग्रहान्न गणितः स्वार्थः परार्थं प्रति।
ये नित्यं परदुःखदुखितधियस्ते साधवोऽस्तंगताश्चक्षुः संवृणु बाष्पवेगमधुना कस्याग्रतो रुद्यते ॥ ४७१ ॥

तथा—अस्माभिश्चतुरम्बुराशिरसनाविच्छेदिनीं मेदिनीं, भ्राम्यद्भिः स न कोऽपि निस्तुषगुणो दृष्टः श्रुतो वा क्वचित् ।
एकवार व्यधको दशवारान् विध्यते–एकवारमारको दशवारान्मार्यते। जघन्यतोऽपीत्यादि योजनीयमिति गाथाभावार्थः ॥१७७॥ “ तिव्वयरे उ ” गाहा। प्रद्वेषोत्कर्षाऽपकर्षविशेषस्य विचित्रत्वात्तत्कृतकर्मबन्धविपाकस्यापि नानारूपतेत्यभिप्रायः। तदिदमवेत्य यथा-मूलतोऽपि कर्म्मसंश्लेषो न भवति तथाऽप्रमादो विधेय इति ॥ १७८ ॥ ननु किमप्रमादेन ?। न हि तत्साध्यः-कर्मबंधाभावस्तत्क्षयो वा, किं तर्हि ?, यादृच्छिको मरुदेव्यादीनां तथैवोपलम्भादिति दुर्विदग्धबुद्धिवचनेन ये मुग्धबुद्धयः प्रतिबन्धं विदध्युस्तान् शिक्षयितुमाह—‘ के एत्थ” गाहा। ‘नियमा खवियंगि’त्ति। नियम्यते–वशीक्रियते आत्मा आभ्यामिति नियमौ तपःसंयमाऽनिष्टप्रशरीरेत्यर्थः। यथाहि—गजस्कन्धारूढाया मरुदेव्या भगवतश्छत्रातिच्छत्रदर्शनेन प्रमोदातिशयादुल्लसितजीववीर्यायाः कर्म्मक्षयः-केवलज्ञानमायुःसमाप्तिर्मोक्षप्राप्तिश्चाक्षेपेण प्रादुरभूदेवमस्माकमपि सर्वं स्यात्, किमप्रमादेन कार्यम्। मरुदेवीसिद्धिकथा च—‘ धम्मो मएण हुंतो ’ इत्यत्र बाहुबलि–कथानके प्रोक्तैव ॥ एतच्चालम्बनं दुर्विदग्धैः क्रियमाणमयुक्तमेव। अनन्तकालात्कदाचिदुद्भूतत्वेनाश्चर्यत्वात्। न खलु क्वाप्याकस्मिकाश्चर्यभूतेऽर्थे जायमाने सर्वमेव तथा समर्थनीयम्। मनुष्यस्त्रियोऽपि कदाचित्काकोदराद्युत्पत्तौ सर्वत्र तथोत्पत्तिव्यवहाराभावात्। श्रूयन्ते चागमेऽन्यान्यप्येतत्प्रकाराण्याश्चर्याणि—उवसग्ग–गब्भहरणं, इत्थीतित्थं अभाविया परिसा। कन्हस्स अवरकंका, अवयरणं चंदसूराणं ॥१॥ हरिवंसकुलुप्पत्ती, चमरुप्पाओ य अट्ठसयसिद्धा। अस्संजयाण पूया, दस वि अणंतेण कालेण॥ २ ॥

एवं करकण्ड्वादयः चत्वारः प्रत्येकबुद्धाः प्राग्भवस्मरणाऽऽविर्भूतश्रुतादेव स्वयं गृहीतव्रता अनाश्रितश्रीमहावीरतीर्था एव सिद्धा आश्चर्यभूता अभूवंस्तत्किमपरैरपि जातिस्मरणादिस्तन्मार्ग एव प्रतीक्षणीय इत्याह—“ किंपि ” गाहा। किमपि वस्तु वृषभादिकं प्राप्येति गम्यते, कस्मिन्नपि कदाचित्काले एके–करकण्ड्वादयो लब्धिभिस्तदावरणीयकर्म्मणां क्षय–क्षयोपशमोपशमरूपाभिः कैश्चिदपि निभैर्वृषभादेरेव वस्तुनो जराजीर्णत्वादिचिह्नः, किं प्रत्येकबुद्धलाभा भवन्त्याश्चर्यभूता इत्यतो न तन्निदर्शनेनाऽन्यैस्तपःसंयमयोः शै-

थिल्यं विधेयम् कदाचित्कभावरूपत्वात्तेषाम्, प्रत्येकबुद्धत्वं लभन्ते प्रत्येकबुद्धलाभाः 'कर्मण्यण'॥

यस्तु तपःसंयमयोः प्रमादात्प्रत्येकबुद्धमार्गमेव प्रतीक्षमाण आस्ते, तं दृष्टान्तोपदर्शनेन निराकुर्वन्नाह—"निहि" गाहा। यथा-निधिं संप्राप्तमधन्यो निर्भाग्यः प्रार्थयन्नपि 'निरुत्तप्पो'त्ति निरुद्यमस्तद्ग्रहणे बलिविधानादिक्रियाशून्यः, इहलोके तं नाशयत्यन्येन सोद्यमेन तस्य ग्रहणात्। तथा प्रत्येकबुद्धलक्ष्मीं प्रतीच्छन् प्रतीक्षमाणो निर्विकल्पं मोक्षं तपःसंयमादिविधानेनाऽगृह्णानो नाशयत्येवेति॥ करकण्ड्वादिकथा संक्षेपतश्चायम्—करकण्डुकलिंगेसुं, पंचालेसु य दोमुहो। नमीराया विदेहेसु, गंधारेसु य नग्गई॥ वसभे य इंद-केऊ, वलए अंबे य पुप्फिए बोही। करकंडु दुम्मुहस्स, नमिस्स गंधाररन्नो य॥ करकण्डुकहा ताव कहिज्जइ—

अंगाजणवए चंपानयरी। दहिवाहणो राया। तस्स चेडयधूया पउमावई महादेवी। तीसे गब्भाणुभावाओ डोहलो जाओ। जहा रायनेवच्छलंछिया हत्थिखंधारूढा उज्जाणकाणणाईसु विहरामित्ति। तओ डोहले अपुज्जंते उलुग्गा जाया। राया पुच्छइ निब्बंधे कए सिट्ठो। तओ देवी जयकुंजरमारोविया राया सयमेव छत्तं धारेइ। गया उज्जाणं पढमपाउसो वट्टइ। सो य मायंगो नवनीरधाराधोरणीविसट्टमट्टियागंधेण अब्भाहओ संभरिऊण विंझाडविं पयट्टो तदणुमग्गेण लग्गा विभग्गा सेणासामग्गी। न तरेइ गंतुं वलिया, दोवि पवेसियाणि अडवीए। राया वडरुक्खं पेक्खिऊण पभणेइ पउमावइं। एयस्स वडरुक्खस्स हेट्ठेण जइ कुंजरो जाइ, तो तुमं साहग्गे लग्गेज्जासुत्ति। तहत्ति पडिस्सुयमेयाए दक्खत्तणेण राइणा साहा गहिया। इयरी हरिया हत्थिणा। निवई निराणंदो उत्तरिऊण तओ गओ चंपाए। पउमावई वि पवेसिया निम्माणुसाए अडवीए। पिवासिओ हत्थी। पेच्छइ महइमहा-लयं दहमेगं। तत्थोइन्नो अभिरमिउं। इमा वि सणियमेयाओ य उयरिऊण दिसाओ अयाणंती, सागारं भत्तं पच्चक्खाइत्ता एगाए दिसाए पहाविया। जाव दूरं गया ताव तावसो एगो दिट्ठो। जाओ मणागं माणसे तोसो, गया तस्स समासे तेणावि नीया कुलवइस्स पासे। तीए अभिवाईओ, एसो संभासेइ। कओ अम्मो! इहागया। ताहे कहेइ जहा हं चेडगस्स धूया जाव हत्थिणा

आणीया। सो य तावसो चेडगस्स नियल्लगोत्ति। आसासिया तेण। मा बीहेहित्ति। ताहे वणफलाणि देइ। धारिया रोयंती कइवयवासराणि। अन्नया अडवीओ निप्फेडिऊण भणिया एत्तियओ चेव अम्हं गइविसओ, एत्तो परेण हलवाहिया महि त्ति न कप्पइ अक्कमिउं मे। जाहि एत्तो सयं चेव। एस दंतपुरस्स विसओ दंतवक्को य रायत्ति भणिऊण नियत्तो सो। सा वि तत्थ गंतूणमणन्नगई सीलवई अज्जाण मूले पव्वइया। अइअत्थिणीए गब्भो नाइक्खिओ। पच्छा पीवरगब्भा जाया, नाया पुच्छिया कहिं गब्भो। मयहरिगाए सब्वमालोएइ। पसूया समाणी सह नामंकमुद्दियाए कंबलरयणेण य वेढिऊण तणयं सुसाणे उज्झइ। दूरे पेच्छंती अच्छइ। जाव सुसाणपालगेण पाणेण सो दारगो गहिऊणमप्पणो पत्तीए पुत्तो अप्पिओ। सा अज्जा जाणिऊणेयं गया वसहीए। संजईहिं पुच्छिया कहिं गब्भो। भणइ मयगो जाओ। अओ उज्झिओ मसाणे मए। सा अज्जा तीए पाणीए समं मेत्तिं घडेइ। अवारवाराए दारगाजोग्गं मोयगाइ नेहेण अप्पेइ। सो विसंवड्ढइ। ताहे दारगरूवेहिं समं रमंतो दिक्करु(स)याणि भणइ। अहं तुब्भं राया। मह तुब्भे करं देह। सो सुक्ककंडूए गहिओ, ताणि भणइ तुम्हाणमेसो चेव करो एगमेगो ममं कंडुयउत्ति। ताहे से करकंडुत्ति नामं कयं दिक्करुएहिं। सोय तीए संजईए अणुसत्तो जेण सा से मोयगो देइ, जं बालट्ठं लहइ भिक्खं। संवड्ढिओ सो वि मसाणं रक्खइ। तत्थ य कयाइ केणइ कारणेण दो साहू समागया, एगत्थ वंसकूडंगे दंडगं पेच्छंति। तत्थेगो दंडलक्खणं जाणइ। सो पमाएण पासाइं अनिरिक्खिऊण भणइ। जो एयं दंडगं गेन्हइ सो राया होइ। किं पुण पडिक्खियव्वो जाव चत्तारिं अंगुलाणि अन्नाणि वड्ढंति। एयं च तेण मायंगदारगेण एगेण धिज्जाइएण य कुडंगाइ अंतरिएण सुयं। ताहे सो मरुगो अप्पसागारिए चउरंगुलं खणिऊण छिंदिऊण य गिन्हइ। तेण य पाणपुत्तेण दिट्ठो, मम मसाणस्स एसो त्ति उद्दालिओ। मरुगेण नीओ सो करणंमि। भणइ देहि मे दंडगं। सो भणइ मम मसाणस्स एसो न सव्वहा जीवंतो देमि। धिज्जाइओ भणिओ अन्नं गिण्ह। सो नेच्छइ, ममेएणेव कज्जं। सो वि दारगो नेच्छइ। पुच्छिओ किं न देसि ?, भणइ अहं एयस्स दंडगस्स प्पहावेण राया भविस्सामि। ताहे कारणिया हसिऊण भणंति। जया भविज्जासि तया एयस्स मरुगस्स गामं दिज्जाहि।

पडिवन्नमेएण। धिज्जाइएणऽन्ने धिज्जाइए विइज्जे काऊण भणियं, जहा मायंगे मारित्ता हरामो दंडगंति। तं तस्स पिउणा सुयं। ताहे तिन्नि वि नासिऊण कंचणपुरं पत्ताणि। तत्थ पत्थिवो पंचत्तं पत्तो। रज्जारिहो अन्नो नत्थि। आसो अहिवासिओ सो सुत्तस्स तस्स सयासमागंतूण तं पयाहिणिऊण य पासे ठिओ। जाव लक्खणपाढएहिं दिट्ठो, ताव लक्खणलक्खियंगोत्ति कओ जय-सद्दो। आहयाणि नंदितूराणि। इमो[illegible]यंभमाणो वीसत्थो उट्ठिउं आसं विलग्गो। कंचणपुरे पवेसिज्जइ। मायंगो त्ति धिज्जाइया न दिंति पवेसं। ताहे तेण दंडरयणं करे करेऊण जाव जोइयं ताव जायं जालाजालजडालं भयभीया नट्ठा ते दिसोदिसं। ताहे तेण वाडहाणगा हरि एसा धिज्जाइया कया। तथा च—दधिवाहनपुत्रेण, राज्ञा तु करकण्डुना। वाटधानकवास्तव्या-श्चण्डाला ब्राह्मणीकृताः ॥ १ ॥ एवं सो करकण्डु महाराओ जाओ। एयं सोऊण सो मरुगो आगओ, मग्गइ देहि मे पुव्वपडिवन्नं गामंति। भणियमेएणं रे बंभणा! भणेहि को ते गामो रुचइ। सो भणइ चंपाए मे मंदिरं। तहिं देहि। ताहे दहिवाहणस्स लेहं देइ। जहा देहि मे गाममेगं। अहं जं तुज्झ रुचइ गामं वा नगरं वा तं देमि। सो रुट्ठो आह—दुट्ठमायंगो अप्पाणं न जाणइ। मज्झ लेहं देइ। अवमाणिएण दूएण पडिआगएण सव्वं से कहियं। करकंडु रुट्ठो गओ गरुएण गंधव्वाइकडगचडगरेणं। सव्वओ उव-रोहिया चंपा। पइदिणमाउहणं महंतं वट्टइ। तीए संजईए सुयं। मा जणक्खओ पक्खदुगे वि होउ त्ति आगंतूण करकंडुस्स साहए रहस्सं भिंदियं। तुह दहिवाहणो जणओ। अहं जणणी। तहाविहकहासंविहाणओ अहं साहुणी, तं मायंगदारगो जाओ। तेण ताणि अम्मापिअराणि पुच्छियाणि। तेहिं सब्भावो कहिओ। नामंकमुद्दा कंबलरयणं च दाइयं। जायपच्चओ वि पभणेइ माणेण, नाहं मो सरामि। ताहे सा चंपाए पविसिऊण पत्ता पत्थिवस्स पासाए, नाया दासचेडीहिं पायवडियाओ परुन्नाओ। रन्ना निसुयं, सो वि आगओ वंदित्ता आसणं दाऊण पुरओ निसन्नो पुच्छइ। पुव्ववुत्तंतं एत्थाऽऽगमणपज्जंतं, विसेसओ ग-ब्भस्स वत्तं। सा सव्वं साहिऊण भणइ, जेण तुमं रोहिओ सो तणओ त्ति। तुट्ठो निग्गओ मिलिओ य। तस्स रज्जाइं दो वि दाऊण दहिवाहणो पव्वइओ। करकंडू पयंडसासणो संजाओ। सो उ किल गोउलप्पिओ तेण अणेगाणि पालावेइ। अन्न(एग)या

सरयकाले एगं गंगतरंगचंगवन्नं गोतन्नगं गोउले गओ पेच्छिऊण भणइ, एयस्स मातरं मा दुहेज्जाह। जया वड्ढिओ होइ तया अन्नगावीणं पि पेऊसं पाएज्जह। तहेव गोवालएहिं पालिज्जंतो सो उव्वत्तविसाणो पीणखंधो वसभो जाओ। राइणा जुज्झारो कओ पेच्छइ, पमोयपरायणो पुणो बहुणा कालेण गओ पेच्छइ, जराजज्जरसरीरं परिगलमाणलोयणजुयलं पड्डुएहिं परिघटिज्जंतं। गोवे पुच्छइ कहिं वसहो त्ति। तेहिं सो दाइओ। तं पेच्छंतो विसन्नचित्तो, चिंतइ धिरत्थु संसारासारत्तणस्स। जेण तारिसिं सरीरसिरिं संपाविऊण संपयमेयारिसो सव्वाऽऽवयाण मंदिरं संवुत्तो। यद्वा—व्याप्ता त्वग्वलिवीचिभिः परिचिता निःश्रीकता नेत्रयोरर्द्धं मूर्द्धनि ते कचा अपि चिताभस्माऽवकीर्णा इव। लालाजालविसंस्थुलस्थितिमुखं काशेन कामं क्वणन्, यन्नृणामपि वार्द्धके भवति तत्कोऽस्मिन्वृषे विस्मयः ॥ १ ॥ अवि य—सेयं सुजायं सुविभत्तसिंगं, जो पासिया वसभं गोट्ठमज्झे। रिद्धिं अरिद्धिं समुपेहियाणं, कलिंगराया विसमिक्ख धम्मं ॥ २ ॥ गोट्ठंगणस्स मज्झे, ढिंकियसद्देण जस्स भज्जंति। दरिया विदित्तवसभा, सुतिक्खसिंगा समत्था वि ॥ ३ ॥ पोराणयगयदप्पो, गलंतनयणो चलंतवसभोट्ठो। सो चेव इमो वसभो, पड्डुयपरिघट्टणं सहइ ॥ ४ ॥ इय एवमाइ बहुसो, संसारासारयं निएऊण। संभरियपुव्वजम्मं, निक्खंतो दिन्नसुरलिंगो ॥ ५ ॥ इति करकण्डुकथा ॥

एत्तो दुम्मुहकहा जहा—पंचालजणवए कंपिल्लपुरे दुम्मुहो महीसो। तस्स य सुकयकम्मजणियं तिवग्गसारं संसारसुहमणुहवंतस्स आणंदियरायहंसो संपन्नसव्वसासो संपत्तो सरओ। तओ तुरयवाहणियाए नीहरंतेण तेणमणेगकुडभीसहस्सपरिवुडो महाविभूईए पूइज्जमाणो दिट्ठो इंदज्झओ, पडिनियत्तंतेण दिवसाऽवसाणे दिट्ठो भूमीए पडिओ कट्ठावसेसो विलुप्पमाणो पागयमणुएहिं त्ति तं दट्ठूण चिंतियमणेण। एवं संसारियसव्वसत्ताण वि संपयाओ असंपयाओ य सया पासट्ठियाओ चेव ॥ तथा च—जो इंदकेउं सुअलंकियं तु, दट्ठुं पडंतं पविलुप्पमाणं। रिद्धिं अरिद्धिं समुपेहियाणं, पंचालराया विसमिक्खधम्मं ॥ १ ॥ संभरिय पुव्वजम्मो, निक्खंतो तो इमो वि नरनाहो। दिन्नंमि देवयाए, लिंगो विहरेइ महिवलए ॥ २ ॥ इति दुर्मुखकथा।

इओ 'नमिकहा' कहिज्जइ—विदेहाजणवए मिहिलानयरीए नयरीइ रंजियसज्जणो नमि नाम राया। तस्स जम्मंतरपुन्ननिव्वत्तियरज्जसुहमणुहवंतस्स समइक्कंतो कोइ कालो। अन्नया वेयणियकम्मोदएण जणियसिरोवेयणस्स पयडीहूओ दाहज्जरो। उवट्ठिया वेज्जा करेंति पडियारकिरिया। अइक्कंता छम्मासा। न जाओ कोइ विसेसो। कयाइ वेज्जोवएसाओ अंतेउरियाओ चंदणं घसंति। तओ उच्छलिओ मणिवलयाण झणक्कारो। राइणा तमसहंतएण भणियं कस्सेस दूस्सहो सद्दो। परियणेण भणियं। सिरिचंदणघंसणपरायणंतेउरियावलयाणं। तओ ताहिं एक्केक्कं वलयं कलाइयाहिंतो अवणीयं, तहावि नोवसंतो खणखणारवो। तओ मंगलिक्कमेक्केक्कं वलयं धरिऊण सेसाणि अवणीयाणि। नमिणा भणियं, किमिन्हिं उवसंतो पुरंतो सो सद्दो। परियणेण भणियं एक्केक्कं चेव संपयं कयं वलयं। तओ चिंतियं नमिणा। अव्वो जावइओ धणधन्नरयणसयणगामागराइसंगो तावइओ दुक्खपसंगो॥ तहा—"जह जह अप्पो लोभो, जह जह अप्पो परिग्गहारंभो। तह तह सुहं पवड्ढइ, धम्मस्स होइ संसिद्धी॥ १॥" तम्हा एगागित्तं चेव सुंदरं। तथाहि—एत्येकस्तनुमानसौ परभवात् क्वापि द्रूमे पक्षिवत्, गोत्रे मातृ-कलत्र-पुत्र-भगिनी-भ्रात्रादिभिः सज्यते। यात्येकः परतः परां तनुकुटीं स्वैः कर्म्मभिः कल्पितामित्येवं विदुषामिहास्तु विदुषां युक्ता क्व कर्त्तुं रतिः॥ २॥ एवं परिभावियवेयणियखओवसमाओ समद्धासिओ निद्दाए। विहायाए सुमिणे सुरसेलोवरि धवलकरिवरारूढो आलोइओ अप्पा। पडिबुद्धो नंदितूरघोसेण। चिंतिउं पवत्तो। कत्थ मए एरिसो सोवन्निओ सेलो दिट्ठोत्ति ईहापोहमग्गणगवेसणं करिंतस्स जायं जाईसरणं। सुमरेइ जहा अहं मणुयभवे कयसामन्नो उप्पन्नो पुप्फुत्तरविमाणे जिणजम्मंमि मेरुसिहरे महिमं करिंतो। तओ चविऊणमिहोववन्नो, एवं च पत्तेयबुद्धो सो जाओ। पुत्तं रज्जे ठविऊण य अभिनिक्खंतो। तओ मिहिला सपुरपरियणो रोहजाणवया पलवमाणी कंदमाणी कोलाहलगभूया आसि। तओ सक्को माहणरूवेणाऽऽगंतूण नमिपुरओ होऊणेवं वयासी—किं नु अज्ज मिहिला, कोलाहलगसंकुला। सुव्वंति दारुणा सद्दा, पासाएसु गिहेसु य॥ १॥

नमिः—मिहिलाए चेइए वच्छे, सीयच्छाए मणोरमे। पत्तपुप्फफलोवेए, सउणाणं बहुगुणे सया ॥ २ ॥ वाएण हीरमाणंमि, चेइयंमि मणोरमे। दुहिया असरणा अत्ता, एए कंदंति भो खगा ॥ ३ ॥

शक्रः—एस अग्गी य वाउ य, एयं डज्झइ मंदिरं। भंते! अंतेउरं तुज्झ, [1]कीसणन्नावयक्खह ॥ ४ ॥ नमिः—सुहं वसामो जीवामो, जेसिं मे नत्थि किंचणं। मिहिलाए डज्झमाणीए, न मे डज्झइ किंचणं ॥ ५ ॥ एवमाइ वायाहिं सक्को रायरिसिं जाव खोभेउं न सक्को। ताहे माहणरूवमुवसंहरिउण विउव्विउणमिंदत्तं वंदइ थुणेइ—अहो ते निज्जिओ कोहो, अहो माणो पराइओ। अहो निरिक्किया माया, अहो लोहो निवारिओ ॥ ६ ॥ एवमाइमहुराहिं वग्गुहि थोउण गओ नियट्ठाणं। नमी वि विहरिउं पवत्तो ॥ बहुयाण सद्दयं सोच्चा, एगस्स य असद्दयं। वलयाण नमिराया, निक्खंतो मिहिलाहिवो ॥ ७ ॥

अह नग्गइ नरिंदचरियं—गंधारजणवए पुरिसपुरे नगरे जयलच्छिलंभलंपडो सुनयमग्गो नग्गई राया। तस्स य संसारसारसोक्खअक्खित्तचित्तवित्तिस्स नाएण मेइणीमंडलं पालयंतस्स पत्तो तरुणीसमूहसूहवो वसंतूसवो। तंमि वसंते संते उज्जाणं पट्ठिएण नरवइणा। मंजरिनिवहसणाहो साणंदं पुलइओ अंबो ॥१॥ "कोउहलेण ताओ, एगा भूवेण मंजरी गहिया। तह खंधावारेण वि, एवं जाओ खाणुव्व ॥२॥" विणियत्त तो तत्तो, नग्गइराया स रायवाडीओ। पुच्छइ पुरिसे सो कत्थ, अत्थि अंबओ कहं हूओ ॥३॥ पुरिसेहिं जंपियं परियणेण एगेगमंजरी गहिया। ताओ तुब्भेहिं पिव, तो जाओ एस खाणुव्व ॥४॥ तओ सविसायं चिंतियं राइणा—करिकन्नचंचलाओ, जीवियजोव्वणकलत्तपुत्ताई। लच्छीओ ता इमाहिं अलं किलेसप्फलाहिं मे ॥ ५ ॥ तो जायजाइसरणो, जाओ पत्तेयबूद्धरिद्धिधरो देवोवुणीयलिंगो, सुमुणी सो विहरिउं लग्गो ॥ ६ ॥ जो चूयरुक्खं तु मणाभिरामं, समंजरीपल्लवपुप्फचित्तं। रिद्धिं अरिद्धिं समुपेहियाणं, गंधारराया विसमिक्खधम्मं ॥ ७ ॥ कमेण य सव्वे वि, पत्ता खिइपइट्ठिए नयरे। पविट्ठा य चउदुवारे

[1] कीसणं नाय वक्खह । B. C. D.

देउले। पुव्वदारेण करकंडुमुणी दक्खिणेण दुम्मुहो। अवरेण नमी। उत्तरेण नग्गई। कहं महामुणीणं पराहुत्तो चिट्ठामित्ति विउव्वियं वाणमंतरेण नियपडिमाए मुहचउक्कयं। एत्थंतरंमि मसिणकट्ठेण कन्न कंडुइऊण मुक्कं एगपासंमि कंडुयणं करकंडुणा। तं च दट्ठूण भणियं दुम्मुहेणं—जया रज्जं च रट्ठं च, पुरं अंतेउरं तहा। सव्वमेयं परिचज्ज, संचयं किं करेसि मं ॥ ८ ॥ जाव दुम्मुहेण भणिओ करकंडू पडिसंलावं न देइ, ताव भणिओ दुम्मुहो नमिणा—जया ते पेइए रज्जे, कया किच्चकरा बहू। तेसिं किच्चं परिच्चज्ज, अज्ज किच्चकरो भवं ॥ ९ ॥ तओ जाव दुम्मुहो नमिणो उत्तरं न देइ ताव भणिओ नग्गइणा—जया सव्वं परिच्चज्ज, मोक्खाय घडसी भवं। परं गरहसी केण, अत्तनीसेसकारए ॥ १० ॥ जाव य नमी नग्गइणो न देइ उत्तरं। एत्थंतरंमि नग्गई भणिओ करकंडुणा—मोक्खमग्गं पवन्नेसु, साहूसु बंभयारिसु। अहियत्थं निवारिंतो, न दोसं वत्तुमरिहसि ॥ ११ ॥ रूसउ वा परो मा वा, विसं वा परियत्तउ। भासियव्वा हिया भासा, सपक्खगुणकारिया ॥ १२ ॥ जहा जलंताइं कट्ठाइं, उवेहाए न चिरं जले। घट्टिया घट्टिया झत्ति, तम्हा सहह घट्टणं ॥ १३ ॥ एवं ते एगया सव्वे, जाया पव्वइया तहा। होऊणं केवली सिद्धा, महऽच्छेरकरा जणे ॥ १४ ॥ साम्प्रतं सोदाहरणं रागादीनामविश्वसनीयतामुपदिशति—

**सोऊण गइं सुकुमालियाए तह ससगभसगभयणीए। ताव न वीससियव्वं, सेयट्ठी धम्मिओ जाव ॥ १८२ ॥**

ससकभसकभगिन्याः सुकुमालिकायास्तथावस्थां श्रुत्वा तावन्न विश्वसितव्यं रागादीनामिति गम्यते यावत् श्रेयोऽर्थी—मोक्षार्थी धर्म्मिको यतिरित्यर्थः ॥ यद्वा तावन्न विश्वसितव्यं यावद्धर्मिको न श्वेतास्थिर्मृतो जात इति। अत्र च व्याख्याने नकारस्याध्याहारः कार्यः। सुकुमालिकाकथानकं चैतत्—

सिरिवासुपुज्जपुज्जेक्क—जम्मरम्मूसवुक्करिसियाए। अइचंगअंगदेसाऽवयंसकप्पाए चंपाए ॥ १ ॥ निज्जियसत्तू जियसत्तु—पत्थिवो तस्स धारिणी देवी। तदुदरसंजाया आसि ससग-भसगत्ति दोन्नि सुया ॥ २ ॥ कुसुमसिलीमुहपा(बा)णा, पाणपियारा सहोयरी ताण।

अणुया अहेसि सुकुमालियत्ति सुकुमालपाणिपया ॥३॥ इयर जुवईण भूसाहिं, रूवरेहाविसेसमावहइ। रूवाहिदेवयाए, तीए तिरोहिज्जए एसा ॥ ४ ॥ उरउररुहाणलोयण, मुहाण तीसे कउलकन्नाण। लोणिमरूवाणऽन्नोन्न-भूसणत्तं फुडं फुरइ ॥ ५ ॥ गोरीसु दोसु सोहग्ग, सारमद्धद्धमप्पियं विहिणा। गिरिजाए जाइ (यदं) दिंतीए, किंतु वट्टेइ तीए पुणो ॥६॥ सइ तरुणलोयलोयण-चउरमिहुणाइं तीए उवयंति। मुहचंदचंदिमापाणपारणाए व्व सव्वदिसं ॥ ७ ॥ अह विहरंता गामागरेसु पत्ता कयाइ तत्थ गुरू। सिरिधम्मघोससूरी, सुहं ठिया बाहिरुज्जाणे ॥ ८ ॥ वंदणवडियाए नरिंदनंदणा निग्गया समं पिउणा। पहुणा पारद्धा धम्मदेसणा दोससोसकरी ॥ ९ ॥ संसारखारपारावारावारीण पवहणप्पवणो। जइ-गिहिधम्मो रम्मो, परिसाए पयासिओ तीए ॥ १० ॥ सुणिऊणेयं सम्मं, कम्ममहासिहरिसंहरणअसणिं। लच्छीविच्छड्डुं छड्डिऊण ते दोवि पव्वइया ॥ ११ ॥ ससगभुणी भसगमुणी, मुणिऊणं समयसत्थपरमत्थं। गीयत्था संजाया, आया विहरित्तु तत्थ पुणो ॥ १२ ॥ सुकुमालियं पि पव्वाविउणमप्पिंति पत्तधम्मधुरं। सिरिरुद्दमईए पवत्तिणीए वरवत्तणीए सिवे ॥१३॥ पवयणपबलनिबलचित्ता चारित्तचारिमं चरइ। किं पुण उव्वणरूवेण, पत्थणिज्जा जुवाणाण ॥ १४ ॥ दूराओ वि दिट्ठीओ, तीए तरुणाणमावडंति फुडं। अरविंदविंदमयरंदमिच्छिरीओव्व भमरीओ ॥ १५ ॥ वसहिट्ठियमुवविट्ठो, मग्गे अणुमग्गलग्गओ लोओ। तं पिच्छंतो सिच्छाए, अच्छए च्छिदियऽच्छिदुहो ॥ १६ ॥ तब्भाउ पुरो परिभाविऊण भणियं पवत्तिणीए इमं। वसहिदुवारं दोवारियव्व ते दोवि रक्खंति ॥१७॥ पइदिणमणन्नवावारवाउलाणं दिणाणि गच्छंति। भइणीअदंभभव्वयस्स मा होउ भंगोत्ति ॥ १८ ॥ चिंतइ कयाइ एसा, पावाए पाडिया भए एए। हियनियनिम्मलसंजम-वित्थरपरमत्थपलिमंथे ॥ १९ ॥ मह बलि किज्जउ रूयं, अब्भुयभूयं किमेरिसं हूयं। जेण जणो पावइ पावभावमावइ वसहिमज्झे ॥२०॥ ससगभसगेहिं रुद्धो, कुद्धो लुद्धो य धावइ रणाय। मज्झवि ज्झाणऽज्झयणाण, झत्ति तो होइ पच्चूहो ॥ २१ ॥ कित्तियकालं आलंबणेणमेएण भाउणो एवं। चिट्ठिस्संति सकट्ठं, लट्ठं ता अणसणं काउं ॥ २२ ॥ इय वेरग्गुविग्गा, पच्चक्खइ असणखाणपाणाणं। बहुवासरेहिं अच्चंतखीणकाया गया मुच्छं ॥ २३ ॥ चेट्ठा नट्ठा दिट्ठा, पत्ता पंचत्तमिय वियाणित्ता। भाऊहिं सोयतत्तेहिं,

तेहिं मुक्का मसाणंमि ॥ २४ ॥ अइसिसिरनिसिसमीरणलहरीहिं लद्धसुद्धचेयन्ना । चिंतइ चत्ता हं भाउगेहिं ही जीवमाणी वि ॥२५॥ मह निव्विन्ना मन्ने, अह जाए पयडपंडुरपभाए । केणवि सत्थाहेणं, पलोइया पहपयट्टेण ॥ २६ ॥ रमणीयरूवरेहा-रंजियचित्तेण तरुणकरुणाए । सगडे चडाविऊणं, नीया निययंमि नगरघरे, ॥ २७ ॥ अब्भंगअंगमद्दण-मज्जणयविलेवणाऽसणाईहिं । तंबोलअलंकारंऽसुगेहिं पडिजागरावेइ ॥ २८ ॥ तिचउरवासरसारोवयारमित्ते सज्जिया जाया । नववियसंतसरोरुह-सोहासुकुमारफारंगी ॥२९॥ हरिहीरपुरंदरकामकामिणीणं पि गव्वसव्वस्सं । अवहरमाणी जाया, कइवयदिवसेहिं सा सुमुही ॥ ३० ॥ पइदिवसदंसणाओ, आलावाओऽसणाइदाणाओ । ताण परोप्परमणुरायसायरो सायरं खुहिओ ॥ ३१ ॥ उक्तं हि केनचित्—“ताम्बूलं कुसुमसुगन्धयः समीराः, सौधेषु प्रतिफलिताः शशाङ्कभासः । वाचश्च प्रणयरसामृतद्रवार्द्रा, दूतीनां बत न हरन्ति कस्य चेतः ॥ ३२ ॥” विसयसुहमणुहवंतीए, तीए सह तेण सत्थवाहेण । वोलीणो कालो कत्तिओ वि, अह दोवि कइयावि ॥ ३३ ॥ ते ससगभसगसाहू, सहेव सत्थाहमंदिरदुवारे । भिक्खट्ठाए पविट्ठा, दिट्ठा सुकुमालियाए लहुं ॥ ३४ ॥ तो ओलक्खिय उक्खुणिय, तिक्खदुक्खा विलक्खरुक्खा य । पणमिय पाए पोक्कारतारतारस्सरं रुयइ ॥ ३५ ॥ संबोहिया हियाहिं, गिराहिं परमत्थसत्थसाराहिं । सत्थाहाणुन्नाए, विहिणा पव्वाविया तेहिं ॥ ३६ ॥ परिपालियपव्वज्जा, समए मरिऊण सा गया सग्गं । इय मुणिय इंदियाणं, निययाण न वीससियव्वं ॥ ३७ ॥ इति ससकभसकभगिनी सुकुमारिकाकथा ॥ १८२ ॥ अथात्मनो दुर्दमत्वादिद्वारेण शिक्षां रूपकाष्टेनाह—

खरकरहतुरयवसहा, मत्तगइंदाऽवि नाम दम्मंति । इक्को नवरि न दम्मइ, निरंकुसो अप्पणो अप्पा ॥ १८३ ॥
वरं मे अप्पा दंतो, संजमेण तवेण य । माऽहं परेहिं दम्मंतो, बंधणेहिं वहेहि अ ॥ १८४ ॥
अप्पा चेव दमेयव्वो, अप्पा हु खलु दुद्दमो । अप्पा दंतो सुही होइ, अस्सिं लोए परत्थ य ॥ १८५ ॥
निच्चं दोससहगओ, जीवो अविरहियमसुहपरिणामो । नवरं दिन्ने पसरे, तो देइ पमायमयरेसु ॥ १८६ ॥

अच्चिय वंदिय पूइअ, सक्कारिय पणमिओ महग्घविओ । तं तह करेइ जीवो, पाडेई जहप्पणो ठाणं ॥ १८७ ॥
सीलव्वयाइं जो बहुफलाइँ हंतूण सुक्खमहिलसइ । धिइदुब्बलो तवस्सी, कोडीए कागिणिं किणई ॥ १८८ ॥
जीवो जहा मणिसियं, हियइच्छियपत्थिएहिं सुक्खेहिं । तोसेऊण न तीरई, जावज्जीवेण सव्वेण ॥ १८९ ॥
सुमिणंतराणुभूयं, सुक्खं समइच्छियं जहा नत्थि । एवमिमंपि अईयं, सुक्खं सुमिणोवमं होई ॥ १९० ॥

'तो देइ पमायमयरेसुत्ति'। ततो यथेष्टचेष्टारूपप्रसरलाभाद्दात्यनेकार्थत्वाद्धातूनां करोति जीवः । 'प्रमादं'–विषयकषायप्रवृत्तिलक्षणम्' 'अतरेषु'–दुस्तरेषु लोकागमविरुद्धेषु कर्त्तव्येष्विति गम्यते । यद्वा अतरेषु–समयभाषया सागरोपमेषु प्रमादं कार्ये कारणोपचारात् प्रमादजन्यमसातवेदनीयं करोति । नरके सागरोपमैर्यत्प्रमादोत्पाद्यं दुःखं वेद्यते तत्करोतीत्यर्थः ॥ १८३ तः ८६ ॥ "अच्चिय" गाहा–'अर्चितो'–गन्धचन्दनादिभिः, 'वन्दितः' सद्गुणोत्कीर्त्तनेन । 'पूजितो'–वस्त्रादिभिः 'सत्कारितो' मूर्ध्ना । अमीषां कर्म्मधारयः । महार्घितो महार्घः कृतः, आचार्यादिपदस्थापनेन तद्गुणपक्षपातिभिरिति गम्यते । स तु मूढो जीवस्तथा तत्करोति किमपि दुष्टचरितम् । यथाऽऽत्मनः सम्बन्धिस्थानमर्च्चनादिनिबन्धनं पातयति ॥ "सीलव्वयाइं" गाहा । 'शीलं'–मूलोत्तरगुणसमाधानम्, 'व्रतानि'–अहिंसादीनि, तेषां पृथग्ग्रहणं प्राधान्यख्यापनार्थं स कोट्या काकिणीं क्रीणातीति सशब्दोऽध्याहारः कार्यः "जीवो" गाहा ॥ 'जीवो यथामनीषितं'–यथाचिन्तितं हृदयेप्सितैः प्रार्थितैर्मनोऽनुकूलकलत्राद्युत्पादितैः सौख्यैस्तोषयितुं न पार्यते न दिनेन न मासेन नापि वर्षेण, किं बहुना ? 'जावज्जीवेण सव्वेणं' ति । जीवनं जीवो जीवितं तेन समस्ताऽऽयुषाऽपि यावदित्यर्थः । यावच्छब्दोपादानात् प्राग्दिनादयो गम्यते इति । एतदेवाह—"सुमिण" गाहा । यद्वैषयिकं सुखमनुभूतं तस्य स्वप्नसुखस्येवातीतत्वेन क्वाप्यसत्त्वात्, । सद्भावस्यासम्भवात्कथं तेनाऽऽहारादिनेव तृप्तिः स्याद्यतो जीवो विषयसुखैरसंख्यैरपि तोषयितुं न तीर्यतेति तात्पर्यम् । उक्तं हि—'उवभोगोवायपरो पसमेउं महइ विसयतण्हं जो नियछायक्कमणकए पुरो तुरंतो पहावइ

सो '। ततः स्थितमेतत्—क्षुत्क्षामः क्षणदा क्षणप्रगुणितस्वप्नार्पितैर्मोदकैः, कोऽपि क्वाऽपि कदाचनाऽप्यवितथं चेत्प्राप्नुयात्क्षुत्क्षयम् । तृष्णग्वा मृगतृष्णिकाचयमयैस्तृष्णान्तमीयाज्जलैर्भोगैस्तर्हि तवाऽपि तृप्तिरणुरप्यात्मन्नमीभिर्भवेत् ॥ इति व्याख्यातान्यष्टौ रूपकाणि ॥१९०॥

एवं विषयेष्वनास्था स्थापिता, तथाप्यास्थां यः कुर्यात्तद्दोषदर्शनायाह—

**पुरनिद्धमणे, जक्खो, महुरामंगू तहेव सुयनिहसो । बोहेई सुविहियजणं, विसूरइ बहुं च हियएण ॥ १९१ ॥**

गाथार्थः कथानकगम्यस्तच्चेदम्—महुराए नयरीए, जुगप्पहाणो सुयस्स य निही(हा)णो । अणवरय सिस्ससुत्तत्थ-कहणपडिबद्धवावारो ॥ १ ॥ अमुणियपरिस्समो भव्व-सत्तसद्धम्मदेसणाईसुं । सावज्जकज्जवज्जण-उज्जुत्तो उज्जयविहारो ॥ २ ॥ सामायारी सारण-वारणसंलीणयाइलीणमणो । नामेण अज्जमंगू, आसी सूरी जणपसिद्धो ॥ ३ ॥ जाओ कयाइ किरिया-कलाववियलो सुहा-ऽभिलासी सो । सावयकुलपडिबद्धो पग्गहिओ गारवतिएण ॥ ४ ॥ अणवरयभत्तजण-दिज्जमाणपाणऽन्नवत्थलोभेण । तत्थेव चिरं वुच्छो, चिच्चा अब्भुज्जयविहारं ॥ ५ ॥ अह सिढिलियसामन्नो, निस्सामन्नं पमायमुवचिणिउं । अकयनियदोससुद्धी, मरिऊणं आउ-विगमंमि ॥ ६ ॥ तीए चेव पुरीए निद्धमणासन्नजक्खभवणंमि । अच्चंतं किब्बिसिउ, संजाओ जक्खजोणीए ॥ ७ ॥ मुणिऊण विभंगेणं, पुव्वभवं तो विचिंतिउं लग्गो । हा हा पावेण मए, पमायमयमत्तचित्तेण ॥ ८ ॥ पत्तंपि विचित्ताइसयरयणपडिपुन्नजिणमयनिहाणं । तक्कहियपवित्तिपरम्मुहेण विहलत्तमुवणीयं ॥ ९ ॥ माणुस्सखित्तजाई-पमोक्खसद्धम्महेउसामग्गिं । चरणपमायब्भट्ठं, एत्तो कत्तो लहिस्सामि ॥ १० ॥ हा जीव ! पाव तइया, इड्ढीरसगारवाण विरसत्तं । सत्थत्थजाणगेण वि, न लक्खियं किं तए आसि ॥ ११ ॥ मायंगनिव्विसेसं, किब्बिसियसुरत्तणं इमं पत्तो । जाओसि चिरमजोग्गो, विरइपहाणस्स धम्मस्स ॥ १२ ॥ धी धी सत्थत्थपरिस्समो, ममं धी मईए सुहुमत्तं । धी धी परोवएसप्पयाणपंडिच्चमच्चंतं ॥ १३ ॥ धी भावविyलकिरिया-कलावमणुदिणमणुट्ठियं तंपि । वेसानेवच्छं पिव, परचित्तपसायणामेत्तं ॥ १४ ॥ इय एवं नियदुच्चरियमणुखणं परमजायवेरग्गो । निंदंतो

दिवसाइं, गमेइ गुत्तिनिहित्तोव्व ॥ १५ ॥ अह तेण पएसेणं, उच्चारमहिं पडुच्च वच्चंते । दट्ठूण नियसिस्से, तेसिं पडिबोहण-ट्ठाए ॥ १६ ॥ जक्खपडिमामुहाओ, दीहं निस्सारिउं ठिओ जीहं । तं च मुणिणो पलोइय, पइदियहं भणिउमाढत्तो ॥ १७ ॥ जो कोइ एत्थ देवो, जक्खो रक्खो व किन्नरो वावि । सो जंपउ पयडं चिय, न किंपि एयं वयं मुणिमो ॥ १८ ॥ तो सविसायं जक्खेण, जंपियं भो तवस्सिणो ! सोऽहं । तुम्भाण गुरु किरियाए, मंगुलो अज्जमंगुत्ति ॥ १९ ॥ तेहिं वुत्तं हा सुयनिहाण ! सिक्खादुगम्मि वि सुदक्ख । कह हीणजक्खजोणिं, गओसि चोज्जं महंतमिमं ॥ २० ॥ तेणं भणियं नो किंपि, चोज्जमिह साहुणो महाभागा ! । एसच्चिय होइ गई, सिढिलियसद्धम्मकम्माण ॥ २१ ॥ सावयपडिबद्धाणं, इड्ढीरससायगारवगुरूणं । सीयविहारीणं मारिसाण जिब्भिंदियऽजियाण ॥ २२ ॥ इय मह कुदेवजोणिं, जाणित्ता साहुणो महासत्ता । जइ सुगईए कज्जं, ता दुलहं संजमं लद्धुं ॥ २३ ॥ परिहरियपमाया निज्जियाणंगजोहा, चरणकरणरत्ता नाणवंताण भत्ता । कयपरमपयत्ता मोक्खमग्गे पसत्ता विहरह लहुभूया भूयरक्खं कुणंता ॥ २४ ॥ भो भो देवाणुप्पिय !, सम्मं संबोहिया तए अम्हे । इइ जंपिऊण मुणिणो, पडिवन्ना संजमुज्जोयं ॥ २५ ॥ अधुना गाथापूर्वार्द्धतात्पर्यमुच्यते—मथुरायां मङ्गुराचार्यो यथा श्रूयते तथैव श्रुतनिकष–आगमकषपट्टकोऽपि प्रमत्तो भूत्वा मृतः सन् किल्बिषिकतयोत्पन्नः पुरस्य जलनिर्गमस्थाने यक्षो यक्षस्य प्रतिमामधिष्ठाय तस्थाविति ॥ १९१ ॥

निग्गंतूण घराओ, न कओ धम्मो मए जिणक्खाओ । इड्ढिरससायगुरुयत्तणेण न य चेइओ अप्पा ॥ १९२ ॥
ओसन्नविहारेणं, हा जह झीणम्मि आउए सव्वे । किं काहामि अहन्नो, संपइ सोयामि अप्पाणं ॥ १९३ ॥
हा जीव ! पाव भमिहिसि, जाईजोणीसयाइं बहुयाइं । भवसयसहस्सदुलहं पि जिणमयं एरिसं लद्धुं ॥ १९४ ॥
पावो पमायवसओ, जीवो संसारकज्जमुज्जुत्तो । दुक्खेहिं न निव्विण्णो सुक्खेहिं न चेव परितुट्ठो ॥ १९५ ॥
परितप्पिएण तणुओ, साहारो जइ घणं न उज्जमइ । सेणियराया तं तह, परितप्पंतो गओ नरयं ॥ १९६ ॥

यद्वयसूरयत्तदाह—' अवसन्नविहारेण ' शीतलविहारितया कालगमनेन, हाशब्दो दैन्ये, यथाऽहं स्थितः पूर्वं तथैव क्षीणे आयुषि सर्वस्मिन् किं करोम्यधन्यः, सम्प्रति शोचाम्यात्मानं केवलं । 'काहामी'ति वर्त्तमानाऽर्थे प्राकृतत्वात् ॥ कथं शोचामीत्याह—" हा जीव " गाहा जातय-एकेन्द्रियाद्या, योनयः-शीतेतराद्याः ॥ अन्यच्च—" पावा " गाहा ॥ " परितप्पिएण " गाहा । परितपनं परितप्तं तेन परितप्तेन-निन्दागर्हारूपपश्चात्तापेन तनुको लघीयानेव साधारः परित्राणं स्यात् , यदि घनं गाढमप्रमत्ततया तपःसंयमयोर्नोद्यच्छत्युद्यमं करोति ॥ अत्रार्थे साधर्म्यदृष्टान्तमाह—श्रेणिकराजस्तथा आत्मनिन्दनादिप्रकारेण परितप्यमानोऽपि गतस्तं सीमन्तकाख्यं नरकमिति ॥ कथानकं च—' केसिं चि परो लोगो ' इत्यत्र कथयिष्यते ॥ १९६ ॥ यथाऽयं जीवो दुःखैर्न निर्विण्णस्तथा गाथाषट्केनाह—

**जीवेण जाणि विसज्जियाणि जाईसएसु देहाणि । थोवेहिं तओ सयलं पि तिहुयणं हुज्ज पडिहत्थं ॥ १९७ ॥**
**नहदंतमंसकेसट्ठिएसु जीवेण विप्पमुक्केसु । तेसुवि हविज्ज कइलासमेरुगिरिसन्निभा कूडा ॥ १९८ ॥**
**हिमवंतमलयमंदर-दीवोदहिधरणिसरिसरासीओ । अहिअयरो आहारो, छुहिएणाहारिओ होज्जा ॥ १९९ ॥**
**जं णेण जलं पीयं, घम्मायवजगडिएण तंपि इहं । सव्वेसु वि अगडतलायनईसमुद्देसु नवि हुज्जा ॥ २०० ॥**
**पीयं थणयच्छीरं, सागरसलिलाओ होज्ज बहुअयरं । संसारम्मि अणंते, माऊणं अन्नमन्नाणं ॥ २०१ ॥**
**पत्ता य कामभोगा, कालमणंतं इहं सउवभोगा । अप्पुव्वं पिव मन्नई, तहवि य जीवो मणे सुक्खं ॥ २०२ ॥**

' पडहत्थंति '-परिपूर्णम् ' 'नहदंते'त्यत्र तृतीयार्थे सप्तमी । नखादिभिः पिण्डितैः कैलासादिप्रमाणाः कूटाः स्युः 'ज णेणं'ति-यदनेन जीवेन । ' घम्मायवजगडिएणं ' ति-घर्म्मोऽन्तसम्बाधो वाताद्यभावात् , आतप-आदित्योष्मा, ताभ्यामभिभूतेन । ' पत्ताय ' त्ति-प्राप्ताश्च कामभोगा अनन्तं कालं यावत्सोपभोगा न पुनः कार्पण्यादिकारणादुपभोगरहिताः । काम्यन्त इति कामाः-शब्दरूपल-

क्षणाः । भुज्यन्ते इति भोगा–रसगन्धस्पर्शरूपाः । रूपं हीन्द्रियेण सम्बद्धमीक्ष्यमाणं काम्यते । शब्दोऽपि व्यवहारतो दूरस्थ एव काम्यत इति रूपं शब्दश्च कामौ ॥ अन्येत्विन्द्रियेण सम्पृक्ता भुज्यमानाः सुखायेति ते भोगाः । उभयशब्दोपादानेऽयं विभाग एकतरोपादाने त्वेकतरेणैव पञ्चानामपि ग्रहणं यथा–' कामे हि बहुविहे हि वि, जाणइ जहा भोगिड्ढियसंपया ' इत्यादौ ॥ २०२ ॥

**जाणइ अ जहा भोगिड्ढिसंपया सव्वमेव धम्मफलं । तहवि दढमूढहियओ, पावे कम्मे जणो रमई ॥ २०३ ॥**

**जाणिज्जइ चिंतिज्जइ, जम्मजरामरणसंभवं दुक्खं । न य विसएसु विरज्जई, अहो सुबद्धो कवडगंठी ॥ २०४ ॥**

**जाणइ य जह मरिज्जइ, अमरंतंपि हु जरा विणासेई । न य उव्विग्गो लोओ, अहो रहस्सं सुनिम्मायं ॥ २०५ ॥**

**दुपयं चउप्पयं बहुपयं च अपयं समिद्धमहणं वा । अणवकएऽवि कयंतो, हरइ हयासो अपरितंतो ॥ २०६ ॥**

**न य नज्जइ सो दियहो, मरियव्वं चाऽवसेण सव्वेण । आसापासपरद्धो, न करेइ य जं हियं बोज्झो(बोद्धो) ॥ २०७ ॥**

**संझरागजलबुब्बूओवमे, जीविए अ जलबिंदुचंचले । जुव्वणे य नइवेगसंनिभे, पाव जीव ! किमयं न बुज्झसि ? ॥ २०८ ॥**

भोगानामृद्धिरुत्कर्षस्तस्याः सम्पदा–सम्प्राप्तिः ॥ " जाणिज्जइ " गाहा । ' हा ' इति विस्मये, ' सुबद्धो '–दुर्मोचकत्त्वात्, कपटग्रन्थिर्मोहकाठिन्यरूपः । तथा चोक्तम्—

वैविध्यबाधाः प्रभवन्ति यत्र, न तत्र मिथ्यामतयश्चरन्ति । संसारमोहस्त्वयमन्य एव, दिग्मोहवत्तत्त्वधिया सहास्ते ॥ १ ॥ अन्यच्च " जाणइ य " गाहा । ' अहो ' इति विवेकिनामामन्त्रणे पश्यत यूयं ' रहस्यं '–गुह्यं ' सुनिर्मितं '–दुर्भेदमित्यर्थः ॥ एतदेव रूपकत्रयेणाह—" दुपय " गाहा, " नय " गाहा । 'संध्यारागरथोद्धत्ता' । ' अपरितंतो ' त्ति–अपरितान्तो–गतश्रमः । 'अवसेणे'ति–परायत्तेन । ' परद्धो ' त्ति क्रोडीकृतः । ' वज्झो ' त्ति–वध्यो, बाध्यो, बाह्यो वा । 'हंते' बाधेश्च वधं बाधां वाऽर्हतीत्यर्थे ।

'शकि च कृत्या' इति कृत्ये वध्यो बाध्यश्च। आशापाशपरवशा हि प्राणिनो वधबन्धादिभाजो भवन्तो दृश्यन्त एव। अत एव सर्वसत्पुरुषाणां बाह्या भवन्ति। तथा सन्ध्यारागादिवच्चञ्चले जीवितादौ सति। हे पापजीव! किमिदं ते मूढत्वं यत्पश्यन्नप्यनित्यतां न बुध्यसे। उक्तं च—प्रवर्द्धमानं पुरुषं, प्रथमं ग्रसते जरा। ततः कृतान्तस्त्वरते, धिगहो जन्म देहिनाम् ॥१॥ यद्यात्मानं विजानीयात्, कृतान्तवशवर्तिनम्। को ग्रासमपि गृह्णीयात्, पापकर्मसु का कथा ॥२॥ न गुणेष्वस्य दाक्षिण्यं, द्वेषो दोषेषु चास्ति न। दवाग्निवदरण्यानीं, विलुम्पत्यन्तको जनम् ॥ ३ ॥ इदं तु मा स्म शङ्किष्ठाः, कुशास्त्रैरपि मोहितः। कुतोऽप्युपायतः कायो, निरपायो भवेदिति ॥ ४ ॥ ये मेरुदण्डसात्कर्त्तुं, पृथ्वीं वा छत्रसात्क्षमाः। तेऽपि त्रातुं स्वमन्यं वा, न मृत्योः प्रभविष्णवः ॥ ५ ॥ २०८ ॥

अथ कामविडम्बनावैराग्योत्पादनायोपदेशमाह—

**जं जं नज्जइ असुइं, लज्जिज्जइ कुच्छणिज्जमेयंति। तं तं मग्गइ अंगं, नवरमणंगुत्थ पडिकूलो ॥ २०९ ॥**

यद्यज्ज्ञायते अशुचीति येन च लज्जते कुत्सितमेतदिति कृत्वा, तत्तदङ्गं योषिदवाच्यप्रदेशादि मार्गति केवलमनङ्गेऽत्र तस्यैव तत्प्रार्थनहेतुत्वात्पुरुषात्प्रार्थक्येन कर्तृत्वं प्रतिकूलो गाढविपर्ययरूपत्वात् ॥ उक्तं च—यल्लज्जनीयमतिगोप्यमदर्शनीयं, बीभत्समुल्बणमलाविलपूतिगन्धि। तद्याचतेऽङ्गमिह कामकृमिस्तदेवं, किंवा दुनोति न मनोभववामता सा ॥ अन्यत्राप्युक्तम्—यदेवाङ्गं कुत्सनीयं, गोपनीयं च योषिताम्। तत्रैव हि जनो रज्यन्, केनाऽन्येन विरज्यताम् ॥ १ ॥ सीमन्तिनीनां सीमन्तः, पूर्णः सिन्दूररेणुना। पन्थाः सीमन्तकाख्यस्य, नरकस्येति लक्ष्यताम् ॥ २ ॥ भङ्गुरान्नयनापाङ्गानङ्गनानां निरीक्षते। हतबुद्धिर्न तु निजं, भङ्गुरं जातु जीवितम् ॥ ३ ॥ स्त्रीणां विप्रोषितमतिर्मुखं पश्यत्यनुक्षणम्। क्षणोऽपि हन्त नास्त्यस्य, कृतान्तमुखवीक्षणे ॥ ४ ॥ स्त्रीणां भुजलताबन्धं, बन्धुरं बुध्यते कुधीः। न कर्मबन्धनैर्बद्धमात्मानमनुशोचति ॥ ५ ॥ कुचकुम्भौ समालिङ्ग्य, स्त्रियाः शेते सुखं जडः। विस्मृता नूनमेतस्य, कुम्भीपाकोद्भवा व्यथा ॥ ६ ॥ एतदेव गाथाकदम्बकेनाह—

सव्वगहाणं पभवो, महागहो सव्वदोसपायट्टी। कामग्गहो दुरप्पा, जेणभिभूयं जगं सव्वं ॥ २१० ॥
जो सेवइ किं लहइ, थामं हारेइ दुब्बलो होइ। पावेइ वेमणस्सं, दुक्खाणि अ अत्तदोसेणं ॥ २११ ॥
जह कुच्छुल्लो कच्छुं, कंडुयमाणो दुहं मुणइ सुक्खं। मोहाउरा मणुस्सा, तह कामदुहं सुहं बिंति ॥ २१२ ॥

'ग्रह'–उन्मादः, 'प्रभव'–उत्पत्तिस्थानम्, 'पायट्टी'–प्रवर्त्तकः ॥ "जो" गाहा। यः सेवते विषयान् स तृप्त्यादिकं लभते नैवेत्यर्थः। तच्छब्दोऽत्र दृश्यः ॥ 'स्थाम'–बलम्, 'वैमनस्यं'–चित्तोद्वेगम्, 'दुःखानि'–क्षयव्याध्यादीनि ॥ "जह" गाहा ॥ 'कच्छुलो'–कच्छुरः, पामनो यथा कच्छूं कण्डूयमानो दुःखं सुखं मुणति–जानातीति दृष्टान्तः तथाहि—

"अत्युद्दामशिखैर्नखैर्विलिखनं सम्पादयन्ती तनौ, सीत्कारानपि मीलितेक्षणपुटानाऽऽसूत्रयन्ती मुहुः।
प्रागल्भ्यं करपीडनेन दधती संयोजितोरुक्लमा, पामा प्रेमवतीव किं न कुरुते दुःखानुविद्धं सुखम् ॥१॥"

दार्ष्टान्तिकमाह—"मोहाउरा' इति। तदुक्तम्—कण्डूयन् कच्छुरः कच्छूं, यथा दुःखं सुखीयति। दुर्वारमन्मथावेशविवशो मैथुनं तथा ॥ २ ॥ पीतोन्मत्तो यथा लोष्टुं, सुवर्णं मन्यते जनः। तथा स्त्रीसंगजं दुखं, सुख मोहान्धमानसः ॥ ३ ॥ २१२ ॥

विसयविसं हालहलं, विसयविसं उक्कडं पियंताणं। विसयविसाइन्नंपिव, विसयविसविसूइया होई ॥ २१३ ॥
एवं तु पंचहिं आसवेहिं रयमायणित्तु अणुसमयं। चउगइदुहपेरंतं, अणुपरियट्टंति संसारे ॥ २१४ ॥
सव्वगईपक्खंदे, काहिंति अणंतए अकयपुण्णा। जे य न सुणंति धम्मं, सोऊण य जे पमायंति ॥ २१५ ॥
अणुसिट्ठा य बहुविहं, मिच्छद्दिट्ठी य जे नरा अहमा। बद्धनिकाइयकम्मा, सुणंति धम्मं न य करंति ॥ २१६ ॥
पंचेव उज्झिऊणं, पंचेव य रक्खिऊण भावेणं। कम्मरयविप्पमुक्का, सिद्धिगइमणुत्तरं पत्ता ॥ २१७ ॥

विषमिव विषं विषयाश्च तद्विषं च विषयविषं, विषोपमा विषया इत्यर्थः । विषशब्दोऽत्र जलार्थः । ततोऽयमर्थः विषयानुत्कटानन्यायोत्कृष्टान् जलमिवावारितप्रसरतया पिबतामुपभुञ्जानानां जीवानां विषये युक्ते स्थाने विषविसूचिका–दुर्गतिपातरूपा मरणहेतुर्वासिकवान्तिर्भवति । अत्र दृष्टान्तः—यथा हालाहलं विशदविषं पिबतां विशदविषसत्कमजीर्णं जायते, मन्त्रतन्त्रादिभिरपि न जरजितुं शक्यते, वैशद्यं च विषस्य मारणैकात्मकत्वेन विपक्षानाक्रान्तत्वात् । अयं भावार्थः—यथा विशदविषं हालाहलं पीतं न कथंचिज्जीर्यत्यजीर्णं च मरणादिदुःखाय जायते, एवं शब्दादिविषया अप्युत्कटतया भुज्यमानाः सन्तो दुर्गतिपातरूपविषविसूचिका भवति, सा चानन्तसंसाररूपदुःखाय जायते इति ॥ “ एवं तु ” गाहा ॥ एवमनेन प्रकारेण पञ्चभिराश्रवैः कर्म्मोपादनद्वारैरिन्द्रियैर्हिंसादिभिर्वा रजः–पापमादाय जीवाः संसारे तु पर्यटन्तीति सम्बन्धः । चतुर्गतिर्दुःखानां पर्यन्तस्तदनुभवरूपा सीमा यस्मिन् पर्यटने तत्तथेति क्रियाविशेषणमेतत् । एतदेवाह—“ सव्व ” गाहा । सर्वगतिषु नारकादिषु प्रस्कन्दान्–पर्यटनानि करिष्यन्त्यनन्तके संसारे अकृतपुण्याः सन्तो जीवाः के इत्याह—‘ जे ’ इत्यादि ॥ तदेष प्राप्तधर्म्माणां शैथिल्येऽपायः प्रोक्तोऽधुना तमादित एव येन प्रतिपद्यन्ते तेषां विशेषतोपायमुपदिशन्नाह—“ अणुसिट्ठा य ” गाहा ॥ ‘ अनुशिष्टा ’ अपि धर्माचार्यैर्धर्मदेशनया धर्मे बहुविधं प्रेरिता अपि मिथ्यादृष्टयश्चातितरां सर्वगतिप्रस्कन्दान् करिष्यन्तीति योगः ॥ ये नराः किं विशिष्टाः बद्धनिकाचितकर्म्मत्वेनाऽधमाः शृण्वन्ति धर्म्मं, न च कुर्व्वन्ति ॥ २१६ ॥ ये पुनः कुर्व्वन्ति तेषां गुणमाह—पञ्चैव हिंसादीन्युज्झित्वा पञ्चैवाहिंसादिमहाव्रतानि परिपाल्य पञ्चैवेन्द्रियाणि च रक्षित्वा उच्छृंखलप्रवृत्तेः सकाशाद्भावेन–परमार्थेन । कर्मेत्यादिसुगमम् ॥ २१७ ॥ इदं संक्षेपेण मोक्षकारणमुक्त्वा विस्तरतः प्राह—

**नाणे दंसणचरणे, तवसंजमसमिइगुत्तिपच्छित्ते । दमउस्सग्गववाए, दव्वाइअभिग्गहे चेव ॥ २१८ ॥**

**सद्दहणायरणाए, निच्चं उज्जुत्त एसणाइ ठिओ । तस्स भवोअहितरणं, पव्वज्जाए य ज(स)म्मं तु ॥ २१९ ॥**

ज्ञानादिषु यः स्थितस्तस्य भवोदधितरणं जन्मेतिसंक्षेपार्थः। 'चरणं'–क्रियारूपम्, 'संयमः'–सर्वसंवरः, 'दम'–इन्द्रियलौल्यनिरोधः। द्रव्यक्षेत्रकालभावैरभिग्रहो द्रव्याद्यभिग्रहः। श्रद्धानप्रधानाः–आचरणश्रद्धानाचरणा॥ उद्युक्तैषणानिरवद्याहारगवेषणा–ग्रहणग्रासैषणारूपा॥ एतेषु नित्यं स्थितो यस्तस्य जन्म–मनुष्यतयोत्पत्तिर्भवोदधितरणं संसारसमुद्रोत्तारकमेव भवति। कया कृत्वेत्याह—'पव्वज्जाएत्ति' प्रव्रज्ययैव ज्ञानादयो हि गुणास्तयैव निर्वहन्ति। साऽप्येतेषु स्थितस्यैव सफला। इह च चरणग्रहणे सति तपःप्रभृतीनां ग्रहणं तस्यैव व्याख्यानार्थं। दर्शनग्रहणेऽपि पुनः श्रद्धानोपादानं–सर्वमिदमाचरणीयं चरणकरणसामर्थ्याभावे तु श्रद्धेयमिति ॥२१८–१९॥

ज्ञानादिषु स्थितः संसारसमुद्रं तरति।

अथैतद्विपरीतानां मन्दधर्म्मश्रमणानां चर्यां गाथैकादशकेनाह—

जे घरसरणपसत्ता, छक्कायरिऊ सकिंचणा अजया। नवरं मुत्तूण घरं, घरसंकमणं कयं तेहिं ॥ २२० ॥
उस्सुत्तमायरंतो, बंधइ कम्मं सुचिक्कणं जीवो। संसारं च पवड्ढइ, मायामोसं च कुव्वइ य ॥ २२१ ॥
जइ गिण्हइ वयलोवो, अहव न गिण्हइ सरीरवुच्छेओ। पासत्थसंकमोऽविय, वयलोवो तो वरमसंगो ॥ २२२ ॥
आलावो संवासो, वीसंभो संथवो पसंगो अ। हीणायारेहिं समं, सव्वजिणिंदेहिं पडिकुट्ठो ॥ २२३ ॥
अन्नुन्नजंपिएहिं, हसिउद्धसिएहिं खिप्पमाणो अ। पासत्थमज्झयारे, बलाऽवि जइ वाउली होइ ॥ २२४ ॥
लोएऽपि कुसंसग्गीपियं जणं दुन्नियच्छमइवसणं। निंदइ निरुज्जमं पिय–कुसीलजणमेव साहुजणो ॥ २२५ ॥
निच्च संकिय भीओ गम्मो सव्वस्स खलियचारित्तो। साहुजणस्स अवमओ, मओ वि पुण दुग्गइं जाइ ॥ २२६ ॥
गिरिसुअपुप्फसुआणं, सुविहिय ! आहरणकारणविहन्नु। वज्जेज्ज सीलविगले उज्जुयसीले हविज्ज जई ॥ २२७ ॥

'गृहं'–सद्म, 'शरणं'–तदाच्छादनम्, तत्प्रसक्तास्तदारम्भयुक्ताः॥ गृहं मुक्त्वा लिङ्गग्रहणच्छद्मना गृहान्तरसङ्क्रमणं च मह-

तेऽनर्थाय तेषां यत आह—" उस्सुत्त " गाहा ॥ उत्सूत्रमागमानपेक्षमाचरन्नाधाकर्म्मान्नाद्यादिषु वर्त्तमानः ॥ मायां मृषावादं च करोत्येव । सूत्रोक्तं करिष्यामीति मायया प्रथमं प्रतिपद्य पश्चात्तदकरणात् ॥ उत्सूत्राऽऽचारप्रचाराश्च पार्श्वस्थादयो भवन्ति, तन्मध्ये च सुसाधुना न स्थेयं यतस्तत्र तिष्ठन् ॥ " जइ " गाहा ॥ यदि गृह्णात्यशन–वस्त्रादि तत्सत्कं तदा व्रतलोप आधाकर्म्मादिदोषदुष्टत्वादागमनिषिद्धत्वाच्च । 'अहवे'त्यादि व्यक्तम् । किंच पार्श्वस्थसंक्रमः परमार्थेन व्रतलोप एव, ततो वरं श्रेयस्करोऽसंगस्तैः सहादित एवामीलकः ॥ तथा " आलावो " गाहा ॥ ' संवास '–एकोपाश्रयता, ' विश्रम्भ '–श्चित्तमीलकः, 'संस्तवः'–परिचयः, 'प्रसंगश्च'–वस्त्रादिदानग्रहणव्यवहारः ॥ तत्र वसतः को दोषः स्यादिति चेत्तत्राह—" अन्नोन्न" गाहा ॥ ' हसितोद्घुषिते'–हास्यहर्षरोमाञ्चैर्धर्मध्यानात्प्रेर्यमाणः व्याकुलीभवति–स्वधर्मस्थैर्याच्च्याव्यत इत्यर्थः ॥ स्वाचारचारिम–सुनिश्चलचेतसोऽपि न स्यात्कदापि कुशलाय कुशीलसंगः । शाकम्भरीपतितमस्त्यपि शस्तवस्तुतद्रूपताऽनुपगतं हि कियन्त्यहानि ॥ अयं तन्मध्यवासिनो दोषो दर्शितः । यस्तु सुसाधुमध्यवास्यपि मन्दपरिणामतया तत्संसर्गं विदध्यात्तमधिकृत्याह—" लोए वि " गाहा ॥ 'लोए वि' त्ति आर्षे प्रथमान्तस्यैकारः । कयरे आगच्छइ दिन्नरूवे इत्यादिवत् ॥ लोकेऽपि कुसंसर्गप्रियं दुर्निवसितं खिड्गवेषं द्यूताद्यतिव्यसनाभिभूतं जनं निन्दति । एवं सुसाधुमध्यस्थितनिरुद्यमं धर्म्मे प्रियकुशीलजनं–प्रियः कुशीलजनः पार्श्वस्थादिलोको यस्य स तथा तं साधुजनोऽपि निन्दति । एवशब्दानुस्वारलोपात् ॥ स कदाचिद्दुष्टपरिणामोऽकार्यमपि कुर्यात्ततश्च ॥ " निच्चं " गाहा ॥ कुसंसर्गदोषदृष्टान्तमाह—"गिरिसुअ" गाहा ॥ अत्रेयं कथा—

कादम्बर्यामटव्यामेकस्मिन् न्यग्रोधतरुकोटरे द्वौ शुकौ सौदर्यौ संजज्ञाते । तत्रैको म्लेच्छैः स्वगृहं नीतः, स च पर्वतपल्लीसंवर्द्धितत्वात् गिरिशुक इत्युच्यते । स च साङ्गत्यवशात्क्रूराध्यवसायो जातः । अन्यस्तु कुसुमसमृद्धतापसाश्रमसंवर्द्धितत्वात् पुष्पशुक इति । सोऽपि संगतिवशाद्धर्मपरोऽभूत् । अन्यदा विपरीतशिक्षाश्चापहृतो वसन्तपुरात्कनककेतू राजा तत्पल्लीसमीपे समाजगाम । ततो म्ले-

च्छभावितमतिना शुकेन वृक्षोपरि स्थितेन कथंचनाऽपि दृष्टो सौ। ततः प्रोक्तं तेन—अरे अरे पुलिन्दका ! इह स्थितानामेव भवतां राजा आययौ। तदेनं शीघ्रं गृह्णीध्वम्। ततो राज्ञा चिन्तितम्—यत्र पक्षिणोऽपीदृशाः, स देशो दूरतस्त्याज्य इति मत्वा प्रपलायितः प्राप्तस्तापसाश्रमे। तदवलोकनात्पुष्पशुकोऽवादीत्—भो भोस्तापसकुमारकाः ! अतिखिन्नोऽतिथिरागच्छति। चतुराश्रमगुरुश्चैषोऽतः शीघ्रं दद्ध्वमासनं कुरुताऽऽतिथेयीकृत्यमिति कुमारकान् प्रोत्साहितवान्। सम्पादिते च तैर्भोजनादौ विनोदितखेदो नृपतिर्गिरिशुकवृत्तान्तं निवेद्य, तस्मै किमेकजातीययोर्भवतोरेतावदन्तरमिति पप्रच्छ। सोऽवोचत्—संसर्गगुणादेतत् तथाहि—माताऽप्येका पिताऽप्येको, मम तस्य च पक्षिणः। अहं मुनिभिरानीतः, स च नीतो गवाशनैः ॥ १ ॥ गवाशनानां स गिरः शृणोति, अहं च राजन् मुनिपुङ्गवानाम्। प्रत्यक्षमेतद्भवताऽपि दृष्टं, 'संसर्गजा दोषगुणा भवन्ति' ॥ २ ॥ ततस्तुष्टो राजाऽवोचदस्त्येतत्तथाहि—संतप्तायसि संस्थितस्य पयसो नामाऽपि न ज्ञायते, मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते। व्यक्तं सागरशुक्तिसंपुटगतं सम्पद्यते मौक्तिकं, प्रायेणाधममध्यमोत्तमगुणः संवासतो जायते ॥ ३ ॥ अंबस्स य निंबस्स य, दोन्हंपि समागयाइं मूलाइं। संसग्गीए विणट्ठो, अंबो निंबत्तणं पत्तो ॥ इति ॥ ४ ॥ एवं च मत्वा दुःशीलसांगत्यं च हित्वा सुशीलैः सहान्येनापि संवासो विधेयः ॥ गाथायां सुविहितेति सुसाधोरामन्त्रणम्। गिरिपुष्पशुकयोः सत्कस्योदाहरणस्य दृष्टान्तस्य कारणं संसर्गदोषोत्प्रेक्षणलक्षणं तद्विधिज्ञः सन् वर्जयेः शीलविकलान्, उद्यतशीलश्च स्वयमपि भवेरिति ॥ २२७ ॥

तदेवं कारणाऽभावे पार्श्वस्थादिसंसर्गत्यागोऽभिहितः, कारणे तु तद्वन्दनाद्यपि कार्यमित्याह—

**ओसन्नचरणकरणं, जइणो वंदंति कारणं पप्प। जे सुविइयपरमत्था, ते वंदंते निवारंति ॥ २२८ ॥**

**सुविहिय वंदावंतो, नासेई अप्पयं तु सुपहाओ। दुविहपहविप्पमुक्को, कहमप्प न याणई मूढो ॥ २२९ ॥**

कारणे पार्श्व-स्थादीनां वन्दनम् ।

शिथिलचरणकरणमपि सुसाधवः कारणे 'सुबहुं पासत्थजण'मित्यादौ वक्ष्यमाणे वन्दन्तेऽपि कदाचित्। तत्र ये सुविदितपरमार्था 'वंदइ न य वंदावइ' इत्यादिवक्ष्यमाणलक्षणाः संविग्नपाक्षिका भवन्ति, न ते तान् वन्दापयन्ति ॥ व्यतिरेकमाह—"सुविहिय" गाहा ॥ सुविहितान्–वन्दापयन्नाशयति–भ्रंशयत्यात्मानं सुपथात्–सुगतिमार्गात्, यत उक्तम्—जे बंभचेरभट्ठा, पाए उड्डुंति बंभयारीणं। ते हुंति कुंटमंटा, बोही य सुदुल्लहा तेसिं ॥ द्विविधपथविप्रमुक्तः साधु–श्रावकानुष्ठेयमार्गभ्रष्ट इत्यर्थः ॥ तथाहि—नासौ यतिः क्लिष्टपरिणामत्वान्न गृहस्थो लिङ्गदर्शनादतः कथमात्मानं न जानाति मूढो येन सुसाधून् वन्दयतीति ॥ २२८–२९ ॥ ग्रं० ८९९०

## ॥ इति श्रीरत्नप्रभसूरिविरचितायामुपदेशमालाविशेषवृत्तौ तृतीयो विश्रामः ॥

# ॥ अथ चतुर्थो विश्रामः ॥



एतावता ग्रन्थेन प्रायेण साधूनां क्वापि गृहस्थानां क्वचिदुभयसाधारण्येन धर्मोपदेश उक्तः । साम्प्रतं गृहस्थानामेव विशेषतो धर्म उपदिश्यते, स च सामान्येन गृहस्थधर्माध्यासितस्यैव सम्यग्भवतीति स एव तावदुच्यते—

श्रीभूपालकुमारपालकृतिनो यैर्धर्म्ममर्मार्पणान्मारिद्यूतमदाद्यदन्तदलनान्नित्योत्सवा भूरभूत् ।
वाक्शुद्धयै वरवाङ्मयामृतमयी सृष्टिं व्यधुर्यैर्न वान्तैरर्थोऽयमवादि सूरितिलकैः श्रीहेमचन्द्रैर्यथा ॥ १ ॥

[१]न्यायसम्पन्नविभवः, [२]शिष्टाचारप्रशंसकः । [३]कुलशीलसमैः सार्द्धं कृतोद्वाहोऽन्यगोत्रजैः ॥ १ ॥ [४]पापभीरुः [५]प्रसिद्धं च, देशाचारं समाचारन् । [६]अवर्णवादी न क्वापि, राजादिषु विशेषतः ॥ २ ॥ [७]अनतिव्यक्तगुप्ते च, स्थाने सुप्रातिवेश्मिके । अनेक निर्गमद्वार–विवर्जितनिकेतनः ॥ ३ ॥ [८]कृतसंगः सदाचारैर्मातापित्रोश्च [९]पूजकः । [१०]त्यजन्नुपप्लुतं स्थानमप्रवृत्तिश्च [११]गर्हिते ॥ ४ ॥ [१२]व्ययमायोचितं कुर्वन्, [१३]वेषं वित्तानुसारतः । [१४]अष्टाभिर्धीगुणैर्युक्तः, [१५]श्रृण्वानो धर्ममन्वहम् ॥ ५ ॥ ग्रं० ९००० [१६]अजीर्णे भोजनत्यागी, [१७]काले भोक्ता च सात्म्यतः । [१८]अन्योन्याऽप्रतिबन्धेन, त्रिवर्गमपि साधयन् ॥ ६ ॥ [१९]यथावदतिथौ साधौ, दीने च प्रतिपत्तिकृत् । [२०]सदाऽनभिनिविष्टश्च, [२१]पक्षपाती गुणेषु च ॥ ७ ॥ [२२]अदेशाकालयोश्चर्यां, त्यजन् [२३]जानन् बलाबलम् । [२४]वृत्तस्थज्ञानवृद्धानां, पूजकः [२५]पोष्यपोषकः ॥८॥ [२६]दीर्घदर्शी [२७]विशेषज्ञः [२८]कृतज्ञो [२९]लोकवल्लभः । [३०]सलज्जः [३१]सदयः [३२]सौम्यः, [३३]परोपकृतिकर्मठः ॥ ९ ॥ [३४]अन्तरङ्गारिषड्वर्गपरिहारपरायणः । [३५]वशीकृतेन्द्रियग्रामो, गृहिधर्माय कल्पते ॥ १० ॥ सामान्यगृहिधर्म्मेण, युक्तस्यैवं महात्मनः । सत्कलत्रादिसंयोगः, पुण्यैरेवोपजायते ॥११॥ यदुक्तम्—" पत्नी प्रेमवती सुतः सविनयो भ्राता गुणालङ्कृतः, स्निग्धो बन्धुजनः सखाऽतिचतुरो नित्यं प्रसन्नः प्रभुः । निर्लोभोऽनुचरः परार्त्तिसमये प्राप्तोपयोगं धनं, पुण्या-

नामुदयेन सन्ततमिदं कस्यापि सम्पद्यते ॥ १२ ॥" एवं च सामान्यतो गृहस्थधर्माधारस्य विशेषतो गृहस्थधर्मं-'वंदइ उभओ कालं पी'त्यादि गाथासप्तदशकेनाह—एताश्च गाथाः सुश्रावकस्य प्रातरुत्थानाच्छयनं यावद्दिनचर्यामाख्याय व्याख्यास्यामः ॥

सम्ममवगम्मजिणमयमणुदिणवट्टंतसुद्धपरिणामो । परिणामममंगुलं जाणिऊण घरवासवासंगं ॥ १ ॥ पडुपवणंदोलिय-केलिपत्तपडिबद्धतोयबिंदुं व । सुविणिच्छिऊण भंगुरमाउं तारुन्नमत्थं च ॥ २ ॥ पयइ विणीओ पयईए, भद्दओ पयइपरमसंविग्गो । पयई उदारचित्तो, पयइ जहुक्खित्तधुरधवलो ॥ ३ ॥ निच्चं कयसाहम्मियवच्छल्लो जुन्नचेइउद्धारी । परपरिवायच्चाई, सुसावओ निसिविरामंमि ॥ ४ ॥ अइगोसे पडिबुद्धो, सम्मं कयपंचमंगलविहाणो । अणुसरणपुव्वयं उट्ठिऊण उचियं च काऊण ॥५॥ संखेवेणंपि हु वीयरायपडिमाउ वंदिउं सगिहे । गच्छेज्ज साहुवसहिं, करिज्ज आवस्सयाइ तहिं ॥ ६ ॥ एवं हि कीरमाणे, जिणाणमाणा कया हवइ सम्मं । गुरुपरतंतत्तं सुत्तअत्थसविसेसनाणं च ॥ ७ ॥ जहठियसामायारी, कुसलत्तमसुद्धबुद्धिविगमो य । गुरुसक्खिओ य धम्मो, संपुन्नविही य होइ कया ॥ ८ ॥ साहूण असइ वसही-संकिन्नत्ताइकारणेहिं वा । गुरुणा समणुन्नाओ, पोसहसालाइसु वि कुज्जा ॥ ९ ॥ सज्झायं काऊण य, खणं अपुव्वं पढेइ सुत्तं पि । तत्तो य विणिक्खमिउं, होऊण य दव्वभावसुई ॥ १० ॥ पढमं नियगेहेच्चिय, निच्चं चिइवंदणं समयविहिणा । विहवाणुसारिपूया, पुव्वमणुट्ठिज्ज गोसंमे ॥ ११ ॥ तयणंतरं तु जइ ता, तहाविहं तस्स नत्थि गिहकिच्चं । ता तव्वेलंचिय कयसरीरसुद्धी सुनेवत्थो ॥ १२ ॥ पुप्फाइपवरपूयंग-वग्गहत्थेण परियणेण समं । वच्चेज्ज जिणिंदगिहे, विसेज्ज पंचाभिगमपुव्वं ॥ १३ ॥ सच्चित्तविओसरणा, अविओसरणा अचित्तदव्वाणं । एगल्लसाडियाए, विमलाए कयउत्तरासंगो ॥ १४ ॥ जिणदंसणे सिरंमि, करंजलीपग्गहो जयजयत्ति । मणएगत्तीकरणं, इय एसो पंचहाऽभिगमो ॥ १५ ॥ पुप्फामिसत्थुईहिं, तिहाऽहवा पूयमट्ठहा कुज्जा । फल-जल-धूव-क्खय-वास,-कुसुम-नेवज्ज-दीवेहिं ॥ १६ ॥ तिनिसिहियाइदहतिय-जुत्तं इरियं पडिक्कमेऊण । चिइवंदणं करेज्जा, पणिहाणं तं सुसंविग्गो ॥ १७ ॥ अह कारणेण केणइ, जिणवरभवणंमि अहव नियगेहे । पोसहसालाए वा, हवेज्ज सामाइयाइकयं ॥ १८ ॥ तो साहुसमीवंमि गंतुं, किइकम्मपुव्वगं सम्मं । कुज्जा पच्चक्खाणं, खणं च

जिणवयणसवणाई ॥ १९ ॥ भत्तीए तहा काउं, बालगिलाणाइगोयरं पुच्छं। तक्किच्चं च समग्गं, संपाडिज्जा जहाजोगं ॥ २० ॥
अणइक्कमेण कुलक्कमस्स लोगोववायविरहेण। तत्तो वित्तिनिमित्तं, ववहारमणिंदियं कुज्जा ॥ २१ ॥ भोयणकाले य गिहं, आगम्म
तहाविहाए पूयाए। पुप्फमिसाइयाए, थोत्तेहिं य भावसारेहिं ॥ २२ ॥ संपूइऊण विहिणा, जिणबिंबं तयणु साहुमूलंमि। गंतूण
भणइ एवं, अणुग्गहं कुणह मे भंते ! ॥ २३ ॥ असणाईदव्वाणं, गहणेण भवाऽगडे निवडियस्स। जयजीववच्छलेहिं, दिज्जउ
हत्थावलंबो मे ॥ २४ ॥ संपट्ठिय संघाडग-पट्ठिठिओ जाइ जाव घरदारं। एत्थंतरंमि अन्नेवि, गिहठिया अभिमुहं इंति ॥ २५ ॥
वंदंति य तो सड्ढो, बिजायसड्ढो पमज्जिउं पाए। दाउणमासणं कुणइ, संविभागं जहाविहिणा ॥ २६ ॥ वंदणपुव्वं अणुगच्छिऊण,
तत्तो गिहे समागम्म। भुंजाविय जणयाई, चिंतिय गोणाइ पेसाई ॥ २७ ॥ देसंतरऽऽगयाणं, चिंतं काऊण सावगाणंपि। पडिज-
ग्गिउं गिलाणे, ताहे उचियप्पएसंमि ॥२८॥ उच्चियासणोवविट्ठो, पच्चक्खाणं सरित्तु जहगहियं। कयपंचनमोक्कारो, सुसावगो तयणु
भुंजेज्जा ॥ २९ ॥ भोत्तूण तओ विहिणा, पुरओ घरचेइयाण ठाऊण। तव्वंदणं करित्ता, पच्चक्खइ दिवसचरिमाई ॥ ३० ॥ खण-
मेत्तं सज्झायं, अपुव्वपढणं च किंपि काऊण। पुणरवि वित्तिनिमित्तं, ववहारमणिंदियं कुज्जा ॥ ३१ ॥ संझासमयंमि पुणो, पूयं
काऊण जिणवरिंदाणं। सारथुइथोत्तपुव्वं, सगिहंमि वंदणं कुज्जा ॥ ३२ ॥ तो जिणभवणे गंतुं, वंदिज्जा पूइऊण जिणबिंबे। सा-
माइअपडिक्कमणाइ, गोससमयं पिव करेज्जा ॥ ३३ ॥ साहुसमीवे अकए य, तंमि गच्छेज्ज साहुवसहीए। वंदणमालोयणयं, खाम-
णयं पिय तहिं काउं ॥ ३४ ॥ गिण्हिज्ज पच्चक्खाणं, खणमह सवणं च धम्मसत्थस्स। विस्सामणाइ विहिणा, भत्तीए करेज्ज
साहूणं ॥ ३५ ॥ संदिद्धपए पुच्छिय, सावगवग्गस्स काउमुचियं च। गिहिगमणं विहिसयणं, विहिज्ज गुरुदेवसरणं च ॥ ३६ ॥
उक्कोसबंभयारी, परिमाणकडो व होज्ज नियमेण। कंदप्पाइविमुक्को, पइरिक्कंमि य तुयट्टेज्जा ॥ ३७ ॥ उद्दाममोहवसओ पयट्टिउं
कह वि अहमकम्मंमि। उवसंतमोहवेगो, चिंतेज्जा भावसारमिमं ॥ ३८ ॥ मोहो दुहाण मूलं, मूलं च विवज्जयस्स सव्वस्स।
एयस्स वसं पत्ता, सत्ता मन्नंति हियमहियं ॥ ३९ ॥ जस्स वसेणं किर कामिणीण वयणाइयं असारंपि। चंदाई हुवमिज्जइ धिरत्थु

ही तस्स मोहस्स ॥ ४० ॥ इत्थीकलेवराणं, स तत्तचिंतं तओ तहा कुज्जा । जह मोहाऽरिजयाओ, संवेगरसा समुच्छलइ ॥४१॥ तहाहि—जं ताव कामिणीणं, मणोहरं हरिणलंछणच्छायं । वयणं तंपि हु मलगलिर–विवरसत्तयसमाउत्तं ॥ ४२ ॥ विल्थिन्नथोरथणया, मंसचया पोट्टमसुइमंजूषा । मंसट्ठि–नसा सोणियमेत्तं सेसंपि हु सरीरं ॥ ४३ ॥ जंपियं पयईए च्चिय, दुग्गंधिमलाऽऽविलं विलीणं च । पयइए अहोगइदारं, बीभच्छं कुच्छणिज्जं च ॥ ४४ ॥ अइलज्जगीयमंगुल–रूवंति ठइज्जई य किर रमणं । तंमि विरमिज्ज जो नणु, स केण अव्वो विरज्जेज्जा ॥ ४५ ॥ एवं गुणाण सीमंतिणीण रमणंमि जे विरत्तमणा । जम्मजरामरणाणं, दिन्नो हु जलंजली तेहिं ॥ ४६ ॥ स जयइ सणंकुमारो, अमरकुमारोव्व चक्कवट्टी सो । जेण खणेण तणं पिव, तेत्तियमंतेउरं चत्तं ॥ ४७ ॥ संजोगविओगावेग–वाउलत्ताणभिन्नया जेसिं । निच्चंपि चित्तवित्ती, कुमारसमणाण ताण नमो ॥ ४८ ॥ ते धन्ना ताण नमो, दासो हं ताण संजमधराण । अद्धच्छिपेच्छिरीओ, जाण न हियए खुड्डक्कंति ॥ ४९ ॥ ताण नमो नमो भावेण, पुणो वि ताण चेव नमो । जाण न जाया विसयाऽभिलासदुव्वासणा एसा ॥ ५० ॥ इय जेण जेण बाहा, हवेज्ज तं तस्स तस्स पडिवक्खं । पुव्वावरनिसिसमए, सम्मं भावेज्ज किं बहुणा ॥ ५१ ॥ सुयइ सुदेणं निदंतरेसु जग्गेइ धम्मजागरियं । कयकायव्वं धम्मं, विहिय सो चेव गोसाओ ॥ ५२ ॥

वंदइ उभओ कालं पि चेइयाइं थइथुई (थवत्थुई) परमा । जिणवरपडिमाघरधूवपुप्फगंधच्चणुज्जुत्तो ॥ २३० ॥
सुविणिच्छियएगमई, धम्मम्मि अनन्नदेवओ अ पुणो । न य कुसमएसु रज्जइ, पुव्वावरबाहियत्थेसु ॥ २३१ ॥
दट्ठूण कुलिंगीणं, तसथावरभूयमद्दणं विविहं । धम्माओ न चालिज्जइ, देवेहिं सइंदएहिं पि ॥ २३२ ॥
वंदइ पडिपुच्छइ पज्जुवासई साहुणो सययमेव । पढइ सुणइ गुणेइ अ, जणस्स धम्मं परिकहेइ ॥ २३३ ॥
दढसीलव्वयनियमो, पोसहआवस्सएसु अक्खलिओ । महुमज्जमंसपंचविहबहुबीयफलेसु पडिक्कंतो ॥ २३४ ॥

श्रावकधर्म-
विधि-कर्त-
व्यानि च ।

नाहम्मकम्मजीवी, पच्चक्खाणे अभिक्खमुज्जुत्तो। सव्वं परिमाणकडं, अवरज्झइ तं पि संकंतो ॥ २३५ ॥
निक्खमणनाणनिव्वाणजम्मभूमीउ वंदइ जिणाणं। न य वसइ साहुजणविरहियम्मि देसे बहुगुणेऽवि ॥ २३६ ॥
परतित्थियाण पणमण, उब्भावण थुणण भत्तिरागं च। सक्कारं सम्माणं, दाणं विणयं च वज्जेइ ॥ २३७ ॥
पढमं जईण दाऊण, अप्पणा पणमिऊण पारेइ। असई अ सुविहिआणं, भुंजइ कयदिसालोओ ॥ २३८ ॥
साहूण कप्पणिज्जं, जं नवि दिन्नं कहिंपि किंचि तहिं। धीरा जहुत्तकारी, सुसावगा तं न भुंजंति ॥ २३९ ॥
वसहीसयणासणभत्तपाणभेसज्जवत्थपत्ताइं। जइऽवि न पज्जत्तधणो, थोवाऽविहु थोवयं देई ॥ २४० ॥

इतो गाथानामर्थलेशः कथ्यते—" वंदइ " गाहा। उभयतः कालं प्रातःसायं सन्ध्ययोरपिशब्दान्मध्याह्ने च। 'स्तवा'–भक्तामराद्याः। 'स्तुतयः'–कायोत्सर्गान्तरं भण्यमानाः। 'जिनवरप्रतिमागृहेषु'–चैत्यास्पदेषु धूपादिभिरर्चनोद्युक्तः॥ यः कल्पयत्यविकलोद्गतरागताम्रमात्मानमस्तमलकेवलजातरूपम्। केषामपि प्रवरपुण्यभृतां स सिद्धः, पूजारसो विजयते जिनराजराज्यम्॥ " सुविणिच्छिय " गाहा न विद्यते वीतरागाद्देवादन्यो दैवतो यस्य सोऽनन्यदैवतः॥ उक्तं च—जिनो देवः कृपा धर्मो, गुरवो यत्र साधवः। श्रावकत्वाय कस्तस्मै, न श्लाघेत विमूढधीः ॥ ५३ ॥ सरागोऽपि हि देवश्चेत् गुरुरब्रह्मचार्यपि। कृपाहीनोऽपि धर्म्मः स्यात् कष्टं नष्टं हहा जगत् ॥ ५४ ॥ " दट्ठूण " गाहा कुलिङ्गिनां शाक्यादीनां त्रसस्थावरजीवमर्दनं दृष्ट्वा जिनधर्म्मादशेषजन्तुसूक्ष्मरक्षणाभिधायकात्सेन्द्रैरपि देवैर्न चाल्यते॥ " वंदइ " गाहा दूराद्दर्शनमेव मङ्गलमयं प्रौढप्रमोदस्पृशां भक्त्या वन्दनकं तु कल्मषमषीकालुष्यमुत्प्लुष्यति॥ श्रेयःपुण्यपरम्परां प्रतनुते, सेवा प्रसन्नात्मनाम्। साधूनां वचनानि तु प्रसुवते, वाचां व्यतीतं फलम् ॥ ५५ ॥ " दढ " गाहा। 'शीलं'–चतुर्थव्रतं प्राधान्यादन्यव्रतेभ्यः पृथगुपात्तम्। 'व्रतानि'–प्राणातिपातविरत्यादीनि 'नियमा'–विचित्राऽभिग्रहाः। 'पौषधम्'–आहाराङ्गसंस्कार। ब्रह्माव्यापाररूपं चतुर्द्धा। 'आवश्यकं'–सामायिकप्रतिक्रमणानि। 'मध्वादीनि' नवनीतस्योपलक्षणम्।

‘ पञ्चविधफलानि ’–वट्टपिप्पलोदुम्बरकायोदुम्बरीप्लक्षाणां गृह्यन्ते, पिप्पलग्रहणात् पिम्पर्या अपि ग्रहणम् । ‘ बहुबियफलानि ’–वृन्ताकादीनि ‘ पडिकंतो ’ त्ति मध्वादिभ्य- प्रतीपं क्रान्तो–निवृत्त इत्यर्थः । मध्वादीनां नियमेभ्यः पृथग्गृहणं बहुदोषतासूचनार्थम् । यदुक्तम्—अनेकजन्तुसङ्घात–निर्घातनसमुद्भवम् । जुगुप्सनीयं लालावत् कः स्वादयति माक्षिकम् ॥ ५६ ॥ भक्षयन्माक्षिकं क्षुद्रजन्तुलक्षक्षयोद्भवम् । स्तोकजन्तुनिहन्तृभ्यः, शौनिकेभ्योऽतिरिच्यते ॥ ५७ ॥ एकैककुसुमक्रोडाद्रसमापीय मक्षिकाः । यद्वमन्ति मधूच्छिष्टं, तदश्नन्ति न धार्मिकाः ॥ ५८ ॥ अप्यौषधकृते जग्धं, मधु श्वभ्रनिबन्धनम् । भक्षितः प्राणनाशाय, कालकूटकणोऽपि हि ॥ ५९ ॥ रसोद्भवा हि भूयांसो, भवन्ति किल जन्तवः । तस्मान्मद्यं न पातव्यं, हिंसापातकभीरुणा ॥ ६० ॥ पिबन्नपि मुहुर्मद्यं, मद्यपो नैव तृप्यति । जन्तुजातं कवलयन्, कृतान्त इव सर्वदा ॥ ६१ ॥ श्रूयते किल शाम्बेन, मद्यादन्धकविष्णुना । हतं वृष्णिकुलं सर्वं, प्लोषिता च पुरी पितुः ॥ ६२ ॥ लौकिका अपि मद्यस्य, बहुदोषत्वमास्थिताः । यत्तस्य परिहार्यत्वमेवं पौराणिका जगुः ॥ ६३ ॥ अवद्यमूलं नरकस्य पद्धतिं, सर्वापदां स्थानमकीर्त्तिकारणम् । अभव्यसेव्यं गुणिभिर्विगर्हितं, विवर्जयेन्मद्यमुपासकः सदा ॥ ६४ ॥ मांसलुब्धैरमर्यादैर्नास्तिकैः स्तोकदर्शिभिः । कुशास्त्रकारैर्वैयात्याद् गदितं मांसभक्षणम् ॥ ६५ ॥ नान्यस्ततो गतघृणो, नरकार्चिष्मदिन्धनम् । स्वमांसं परमांसेन, यो वर्द्धयितुमिच्छति ॥ ६६ ॥ मांसभक्षयिताऽमुत्र यस्य, मांसमिहाद्म्यहम् । एतन्मांसस्य मांसत्वं, प्रवदन्ति मनीषिणः ॥ ६७ ॥ आयुःक्षयो भवति तस्य दरिद्रता च, नैवान्यजन्मनि भवेत्कुलजातिलाभः । मांसशिनो हतमतेर्विफलक्रियस्य, स्यान्नीचकर्मकरणोदरपूरणं च ॥ ६८ ॥ मांसखादकगतिं विमृशन्तः सस्यभोजनरता इह सन्तः । प्राप्नुवन्ति सुरसम्पदमुच्चैर्जैनशासनजुषो गृहिणोऽपि ॥ ६९ ॥ उदुम्बरवटप्लक्ष–कायोदुम्बरशाखिनाम् । पिप्पलस्य च नाश्नीयात्, फलं कृमिकुलाकुलम् ॥ ७० ॥ अप्राप्नुवन्नन्यभक्ष्यमपि क्षामो बुभुक्षया । न भक्षयति पुण्यात्मा, पञ्चोदुम्बरजं फलम् ॥ ७१ ॥ अन्तर्मुहूर्त्तात्परतो, निरन्ता जन्तुराशयः । यत्र मूर्च्छन्ति तं नाद्यं, नवनीतं, विवेकिभिः ॥ ७२ ॥ एकस्यापि हि जीवस्य, हिंसने किमघं भवेत् । जन्तुजातमयं तत्को, नवनीतं निषेवते ॥ ७३ ॥ वृन्ताक पनसाऽऽलाबु, सर्वं चानन्तकायिकम् । फलमज्ञातमन्यद्वाऽनुचितं

श्रावकस्त्यजेत् ॥७४॥ "नाहम्म" गाहा ॥ अधर्म्मकर्म्माणि 'इंगाली वणसाडी' इत्यादिनोक्तानि पञ्चदश कर्म्मादानानि, तैर्जीविकां वर्जयति । चतुःपदादिपरिग्रहं च सर्वं कृतपरिमाणमेव करोति । तदपि प्रमाणीकृतं चतुष्पदादि शङ्कमान एव यतनया न पुनर्निर्ध्वंसतयाऽवरध्यति–भारवाहादिभिर्व्यथयति व्यापारं कुर्वाणः, कर्णच्छेदादिभिः पीडयति 'रध' हिंसायामिति वचनात् ॥ 'अविरज्झइ' त्ति पाठे रध्यतेऽपि यदन्नादिकं तदपि शङ्कमान एव रन्धयति, मुत्कले मुक्तेऽप्यारम्भे पापभीरुतया स शूक एव सर्वं करोतीत्यर्थः ॥ " निक्खमण " गाहा । गाथार्थसंवादश्च । जम्मणनिक्खमणाइसु तित्थयराणं महाणुभावाणं । गमणागमहिमाहिं, आगाढं दंसणं होइ ॥ ७५ ॥ जत्थ पुरे जिणभवणं, समयविऊ साहू सावया जत्थ । तत्थ सया वसियव्वं, पवरजलं इंधणं जत्थ ॥ ७६ ॥ तथा—निवसेज्ज तत्थ सड्ढो, साहूणं जत्थ होइ संपाओ । चेईहराइं जम्मि वित(न)यन्नसाहम्मिया चेव ॥ ७७ ॥ " पर " गाहा । 'प्रणमनं'–शिरसा । 'उद्‌भावनं'–परेषां पुरतो गुणोत्कीर्त्तनम् । 'स्तवनं'–तेषामेव पुरः । 'भक्तिराग'–श्चेतसोऽनुबन्धः 'सत्कारो'–वस्त्रादिभिः । 'सन्मानो'ऽ–नुव्रजनादिः । 'दानम्'–अशनादेः 'विनयः'–पादप्रक्षालनादिस्तान् वर्जयति [अन्यतिर्थिकानां] ॥ "पढमं" गाहा "साहूण" गाहा "वसही" गाहा ॥ "प्रौढप्रीतितरङ्गसङ्गि हृदयं वाणी गुणग्राहिणी, कायो कैतववन्ध्यवन्दनकवान् दुश्चेष्टिताऽलोचनम् । प्रायश्चित्तपवित्रपालनविधिर्वस्त्रान्नपानाश्रय-प्रावारप्रमुखप्रदानमिति सत्पूजा गुरोर्गीयते ॥ ७८ ॥ श्राद्धः श्रद्धानुबन्धाद्वसतिमवसतिं कीटिकाकण्टकादेः, पात्रं पात्रं गुणानां सदशनमशनं पानकं पानकम्रम् । वस्त्रं शीतादिशस्त्रं समधिकविधिना स्वल्पमप्यत्र कल्प्यं, काले भिक्षोरभिक्षे त्वपरमपि ददन्निर्जराभाग्भृशं स्यात् ॥ ७९ ॥ २४० ॥

**संवच्छरचाउम्मासिएसु, अट्ठाहियासु अ तिहीसु । सव्वायरेण लग्गइ, जिणवरपूयातवगुणेसु ॥ २४१ ॥**

सांवच्छरिकपर्वणि चातुर्मासिकेषु अष्टाहिकासु चैत्राश्वयुक्पूर्णिमापर्यन्तासु शाश्वतीष्वशाश्वतीषु च तिथिष्वष्टमीचतुर्दशीज्ञानपञ्चम्यादिपुण्यतिथिषु जिनवरपूजायां तपसि गुणेषु दानज्ञानाभ्यासावश्यकादिविशेषेषु, तथाहि—घटयति विकटाभिः संगमं श्रीभिरुच्चैरप-

चयमुपधत्ते दुर्विपाकैनसां च । जनयति शरदिन्दूद्योततुल्यं यशस्तद्विधिविहितसपर्यं पादपद्मं जिनानाम् ॥ ८० ॥ यत्पूर्वार्जितकर्मशैलकुलिशं यत्कामदावानलज्वालाजालजलं यदुग्रकरण-ग्रामाहिमन्त्राक्षरम् । यत्प्रत्यूहतमः समूहदिवसं यल्लब्धिलक्ष्मीलता, मूलं तद्विविधं यथाविधि तपः कुर्वीत वीतस्पृहः ॥ ८१ ॥ शूराः सन्ति सहस्रशो नहि कलाशालिष्वियत्ता स्थिता, ज्योतिर्ज्ञाः प्रतिमन्दिरं प्रतिपदं पद्यादिविद्याविदः । शोण्डीरान् कतिनाम वच्मि बहवो वाक्याटवादुद्भटाः, स्वं दातुं पुनरुद्यता यदि परं द्वित्राः पवित्राः क्षितौ ॥ ८२ ॥ २४१ ॥

साहूण चेइयाण य, पडिणीयं तह अवण्णवायं च । जिणपवयणस्स अहिअं, सव्वत्थामेण वारेई ॥ २४२ ॥
विरया पाणिवहाओ, विरया निच्चं च अलियवयणाओ । विरया चोरिक्काओ, विरया परदारगमणाओ ॥ २४३ ॥

हिंसादिभ्यो विरमणम् ।

'सव्वत्थामेणं' ति सर्वसामर्थ्येन प्राणव्ययेनापि वारयति । तदुन्नतिकरणस्य महोदयहेतुत्वादिति ॥ "विरया" गाहा ॥ ये प्राणिवधाद्विरताः करुणैकचित्तास्ते श्राद्धाः स्युस्तथाहि—दक्षा नारकवेश्मनां प्रतिहतौ पट्वी कुयोनिक्षतौ, हन्त्री रोगचयस्य सर्वदुरितातङ्कक्षयैकक्षमाः । कीनाशोद्धतबाहुयुग्ममथनी सम्प्रापितस्वः-शिवा, साध्वी जीवदया जयत्यपमला मूर्ध्नि स्थिता श्रेयसाम् ॥८३॥ वपुरिव वदनविहीनं, वदनमिव विलुप्तलोचनाम्भोजम् । एतद्विकलं सकलं, न शोभते धर्म्मकर्म्म नृणाम् ॥ ८४ ॥ व्यासोऽप्याह—श्रूयतां धर्म्मसर्वस्वं, श्रुत्वा चैवावधार्यताम् । आत्मनः प्रतिकूलानि, परेषां न समाचरेत् ॥ ८५ ॥ मातृवत्परकलत्राणि, परद्रव्याणि लोष्टवत् । आत्मवत्सर्वभूतानि, यः पश्यति स पश्यति ॥ ८६ ॥ अलीकवचनाच्च ये, नित्यं विरताः सत्यवाचस्ते च श्राद्धा, यथा—सत्यमेव वदेत्प्राज्ञः, सर्वभूतोपकारकम् । यद्वा तिष्ठेत्समालम्ब्य, मौनं सर्वार्थसाधकम् ॥ ८७ ॥ धर्मध्वंसे क्रियालोपे, स्वसिद्धान्तार्थविप्लवे । अपृष्टेनापि शक्तेन, वक्तव्यं तन्निषेधितुम् ॥ ८८ ॥ दवानलेन ज्वलता, परिप्लुष्टोऽपि पादपः । सान्द्रीभवति लोकोऽयं न तु दुर्वचनाऽग्निना ॥ ८९ ॥ चन्दनं चन्द्रिका चन्द्रमणयो मौक्तिकस्रजः । आह्लादयन्ति न तथा, यथा वाक् सुनृता नृणाम्

॥ ९० ॥ कुर्वन्ति देवा अपि पक्षपातं, नरेश्वराः शासनमुद्वहन्ति । शान्तीभवन्ति ज्वलनादयो यत्, तत्सत्यवाचां फलमामनन्ति ॥ ९१ ॥ चौर्याच्च विरताः श्राद्धाः स्युस्तथाहि—तमभिलषति सिद्धिस्तं वृणीते समृद्धिस्तमभिसरति कीर्त्तिर्मुञ्चते तं भवार्त्तिः । स्पृहयति सुगतिस्तं नेक्षते दुर्गतिस्तं, परहरति विपत्तं यो न गृह्णात्यदत्तम् ॥ ९२ ॥ अदत्तं नादत्ते कृतसुकृतकामः किमपि यः, शुभश्रेणिस्तस्मिन्वसति कलहंसीव कमले । विपत्तस्माद्दूरं व्रजति रजनीवाम्बरमणेर्विनीतं विद्येव त्रिदिवशिवलक्ष्मीर्भजति तम् ॥ ९३ ॥ परजनमनःपीडाक्रीडावनं वधभावना, भवनमवनिव्यापिव्यापल्लताघनमण्डलम् । कुगतिगमने मार्गः स्वर्गापवर्गपुरार्गला, नियतमनुपादेयं स्तेयं नृणां हितकाङ्क्षिणाम् ॥ ९४ ॥ परदारविरताश्च श्राद्धाः स्युर्यतः—चक्षुर्दिक्षु क्षिपन्ती क्षपयति झगिति प्रेक्षकाक्षीणि साक्षाल्लीलालोलाऽलसाङ्गी जगति वितनुतेऽङ्गसङ्गाङ्गभङ्गान् । खेदस्वेदप्रभेदान् प्रथयति दवथुस्तम्भसंरम्भगर्भान्, बाला व्यालावलीव भ्रमयति भुवनं चेतसा चिन्तिताऽपि ॥ ९५ ॥ नाऽऽसक्त्या सेवनीयास्तत्स्वदारा अप्युपासकैः । आकरः सर्वपापानां, किं पुनः परयोषितः ॥९६॥ स्वपतिं या परित्यज्य, निस्त्रपोपपतिं भजेत् । तस्यां क्षणिकचित्तायां, विश्रम्भः कोऽन्ययोषिति ॥ ९७ ॥ नारीं नितम्बजघनस्तनभूरिभारामारोपयन्त्युरसि मूढधियो रताय । संसारवारिनिधिमध्यनिमज्जनाय, जानन्ति तां नहि शिलां निजकण्ठबद्धाम् ॥ ९८ ॥ भवोदन्वद्वेलां मदनमृगयुव्याधहरिणीं, मदावस्थाहालां विषयमृगतृष्णामरुभुवम् । महामोहध्वान्तोच्चयबहलपक्षान्तरजनीं, विपत्खानीं नारीं परिहरत हे श्राद्धसुधियः! ॥ ९९ ॥ २४३ ॥

**विरया परिग्गहाओ, अपरिमिआओ अणंततण्हाओ । बहुदोससंकुलाओ, नरयगइगमणपंथाओ ॥ २४४ ॥**

परिग्रहाच्चापरिमिताद्विरताः श्राद्धाःस्युरनन्ततृष्णारूपमूर्च्छाविच्छेदात्तथाहि—वित्तं वाञ्छति निर्धनस्तदपि च प्राप्तः समस्तक्षितिं, क्षोणीशत्वमवाप्य चाभिलषति स्फीतं स सम्राट्पदम् । सम्राडप्यमराधीशस्य पदवीमित्येवमेषा नृणां, लब्धेऽपि ध्रुवमुत्तरोत्तरपदे तृष्णा न विश्राम्यति ॥ १०० ॥ परिग्रहनिषण्णोऽपि, योऽपवर्गं विमार्गति । लोहोडुपनिविष्टोऽसौ, पारावारं तितीर्षति ॥ १ ॥ तृष्णाखनि-

रगाधेयं, दुष्पूरा केन पूर्यते । या महद्भिरपिक्षिप्तैः, पूरणैरेव खन्यते ॥ २ ॥ धर्मप्रभावप्रभुवा, अपि बाह्याः परिग्रहाः । स्युर्धर्मस्य विनाशाय, समिधामिव वह्नयः ॥ ३ ॥ निर्दोषा वा सदोषा वा, सुखं जीवन्ति निर्धनाः । बाध्यन्ते धनिनो लोके, दौषैरुत्पादितैरपि ॥ ४ ॥ वाक्येनेकेन तद्ब्रूमि, यद्वाच्यं वाक्यकोटीभिः । आशापिशाचीशान्ता च, प्राप्तं च परमं पदम् ॥ ५ ॥ आकांक्षा परमं दुःखं, संतोषः परमं सुखम् । एतदुक्तं समासेन, लक्षणं सुखदुःखयोः ॥ ६ ॥ सर्वा संपत्तयस्तस्य, संतुष्टं यस्य मानसं । उपानहूढपादस्य, ननु चर्मावृतैवभूः ॥ ७ ॥ आशापिशाचविवशं कुरु मा स्म चेतः, संतोषमुद्वह परिग्रहनिग्रहेण । श्रद्धां विधेहि यतिधर्मधूरीणतायामन्तर्भवाष्टकमुपैति यथापि ॥ ८ ॥ तदयं संग्रहः । हिंसा त्याज्या नरकपदवी नानृतं भाषणीयं, स्तेयं हेयं सुरतविरतिः सर्वसंगान्निवृत्तिः । जैनो धर्मो यदि न रुचितः पापपङ्कावृतेभ्यः सर्पिदुग्धं किमिदमियता यत्प्रमेही न भुङ्क्ते ॥१०९॥२४४॥

एवं च व्रतादिगुणान् धारयद्भिस्तैर्यत्कृतं भवति तदाह—

**मुक्का दुज्जणमित्ती, गहिया गुरुवयणसाहुपडिवत्ती । मुक्को परपरिवाओ गहिओ जिणदेसिओ धम्मो ॥ २४५ ॥**

**तवनियमसीलकलिया, सुसावगा जे हवंति इह सुगुणा । तेसिं न दुलहाइं, निव्वाणविमाणसुक्खाइं ॥ २४६ ॥**

**सीइज्ज कयावि गुरु, तंपि सुसीसा सुनिउणमहुरेहिं । मग्गे ठवंति पुणरवि, जह सेलगपंथगो नायं ॥ २४७ ॥**

तादृशां च फलमाह—"तव" गाहा 'तवनियमसीलकलिया' इत्यनेन संक्षेपात् प्राक्तनाशेषगुणग्रामारामांस्ताननूद्य 'तेसिं'-मित्यादिना फलमुक्तम् ॥ २४६ ॥ साम्प्रतं शिष्येणापि गीतार्थेन गुरुः सदुपायैः प्रमादात्कदाचिन्मोच्यते इत्याह—"सीएज्ज" गाहा। 'सीदेत्'-संयमयोगेषु प्रमत्तो भवेत् । 'सुनिपुणमधुरैः'—सुनिगूढसुकुमारैरुपायैरिति गम्यते । शेलकाचार्य-पन्थकशिष्योदाहरणं चैतत्—

सेलगपुरंमि नयरे, आसि निवो सेलगो पुरा तस्स । पउमावइ त्ति देवी, ताण सुओ मद्दुगो नाम ॥ १ ॥ थावच्चापुत्तसु-

णिंद-चलणसेवोवलद्धजिणधम्मो । सो राया नयसारं, भुंजइ निरवज्जरज्जसुहं ॥ २ ॥ एगंमि य पत्थावे, थावच्चापुत्तसूरिपयवत्ती । सूयसूरी विहरंतो, समागओ तत्थ नयरंमि ॥ ३ ॥ मिगवणउज्जाणंमि य, समोसढो मुणिजणोचियपएसे । मुणियाऽऽगमो य राया, समागओ वंदणनिमित्तं ॥ ४ ॥ तिपयाहिणापुरस्सरमह तच्चलणुप्पले नमंसित्ता । हरिसवसपुलइयंगो, आसीणो धम्मसवणत्थं ॥ ५ ॥ सुयसूरिणावि संसारपरमनिव्वेयकारिणी तस्स । विसयविरागुप्पायण-पवरा सम्मोहनिम्महणी ॥ ६ ॥ संसारसमुत्थसमत्थ-वत्थुवित्थारनिग्गुणत्तगुणा । धम्मकहा सुइसुहवयण-वित्थरेणं कया सुचिरं ॥७॥ जह बंधो बंधणकारणाणि मोक्खो य मोक्खहेऊ य । पुन्नं पावं जह निज्जरा य सव्वं तहा कहियं ॥ ८ ॥ पडिवुद्धो नरनाहो, परमपमो(धम्मसवण)उब्भवंतरोमंचो । गुरुचरणे पणमित्ता, जंपिउमेवं समाढत्तो ॥ ९ ॥ भयवं! पुत्तं रज्जंमि, जाव ठावेमि तावं तुह पासे । उज्झिय रज्जं सज्जो, पवज्जं संपवज्जामि ॥ १० ॥ जुत्तमिणं जाणिय भवठिईण तुम्हारिसाण नरनाह ! । ता एत्तो पडिबंधं, मा काहिसि थेवमवि एत्थ ॥ ११ ॥ एवं गुरुणा अणुसासिओ य राया गओ सगेहंमि । नियय पयंमि निवेसइ, मद्दुगनामं वरकुमारं ॥ १२ ॥ तत्तो कयसिंगारो, सहस्सनरवाहिणीए सिवियाए । आरूढो पंथगपमुह-मंतिसयपंचाणुगओ ॥ १३ ॥ गंतूण गुरुसमीवे, उज्झियसंगो पवज्जई दिक्खं । संवेगसारमणुदिणमुज्जमइ य धम्मकम्मेसु ॥ १४ ॥ कालक्कमेण एक्कारसावि अंगाणि सो अहिज्जेइ । दुक्करतवकरणपरे, विहरइ वसुहाए नीसंगो ॥ १५ ॥ सूरिपए ठविउं से, सूयसूरी पंथगाइपंचसए । परिवारं देइ सयं, साहुसहस्सेण परियरिओ ॥ १६ ॥ विहरित्ता बहुकालं, पुंडरियमहानगे कयाऽणसणो । असुरसुरविहियपूओ, निव्वाणपयं पवन्नोत्ति ॥ १७ ॥ सो पुण सेलगसूरी, तवोविसेसेहिं अरसविरसेहिं । पाणेहिं भोयणेहि य, जाओ चम्मट्ठिमेत्ततणू ॥ १८ ॥ अप्पडिबद्धो महिमंडलंमि, विहरइ तहा वि वाउव्व । पंथगपमुहाण पुरो, निच्चं चिय इय परूविंतो ॥ १९ ॥ पडिबंधो लहुयत्तं, न जणुवयारो न देसविन्नाणं । नाणाराहणमेए, दोसा अविहारपक्खंमि ॥ २० ॥ तथा—दंसणसोही-थिरकरण-भावणा, अइसयत्थकुसलत्तं । जणवयपरिच्छणा विय, अणिययवासे गुणा हुंति ॥ २१ ॥ निक्खमण-नाण-निव्वाणठाण चिइबिंब जम्मभूमीओ । पेच्छंताउ जिणाणं, सुविसुद्धं दंसणं

कुणइ ॥ २२ ॥ संवेगमसंविग्गाण, जणइ इह सुविहिओ सुविहियाणं । अथिरमणाणं पुण संजणेइ धम्मंमि थिरकरणं ॥ २३ ॥ संविग्गयरे पासिय, पियधम्मयरे य ऽवज्जभीरु य । सयमवि पियथिरधम्मो, पायं विहरंतओ होइ ॥ २४ ॥ चरिया छुहा य तिण्हा, सीयं उण्हं च भावियं होइ । अहियासिया य सेज्जा, सम्मं अणिययविहारेण ॥ २५ ॥ सुत्तत्थथिरीकरणं, अइसइयत्थाण होइ उवलंभो । अइसइयसुयहराणं, पलोयणे विहरमाणस्स ॥ २६ ॥ निक्खमणपवेसाइसु, आयरियाणं बहुप्पयाराणं । सामायारी-कुसलो, जायइ गणसंपवेसेण ॥ २७ ॥ साहूण सुहविहारो, निरवज्जो जत्थ सुलहवित्ती य । तं खेत्तं परियाणइ, अनिययचरियाए विहरंतो ॥ २८ ॥ तणुतणुबलोऽवि ता भो, विहरामि न परिहरामि नियसत्तं । इय अंतपंतभत्ताइएहिं जाओ गिलाणो सो ॥२९॥ जइवि हु गहिओ रोगेहिं, तहवि सत्ताहिओ त्ति विहरंतो । सेलगपुरे पहुत्तो, समोसढो मिगवणुज्जाणे ॥ ३० ॥ पिउपडिबंधेण य मद्दु(द्दु)गो निवो वंदणट्ठमणुपत्तो । सोऊण य धम्मकहं, पडिबुद्धो सावगो जाओ ॥३१॥ अह दट्ठुं सो सूरिं, सरोगमच्चंततणु-सरीरं च । जंपेइ अहं भंते !, अहापवत्तेण तेगिच्छं ॥ ३२ ॥ करेमि तुम्ह एसणियभत्तपाणोसहाइएणंति । पडिसुणियं मुणिवइणा, कराविया तयणु से किरिया ॥ ३३ ॥ अह पगुणीभूयतणू वि, पबलरसगारवाइपडिबद्धो । सूरी मुणिगणविमुहो, तत्थेव य ठाउ-मारद्धो ॥ ३४ ॥ पंथगवज्जेहिं तओ, परिचत्तो सेसएहिं साहूहिं । अह चउमासगरयणीए, निब्भरं सुहपसुत्तो सो ॥ ३५ ॥ चउ-मासियाइयारं, खामेउं पंथगेण सीसेणं । छिक्को चलणेसु तओ, झत्ति विउद्धो भणइ कुद्धो ॥ ३६ ॥ को एस दुरायारो, मं पाएसु सिरेण घट्टेइ । तेणं भणियं भंते !, पंथगनामो अहं साहू ॥ ३७ ॥ खामेमि चउम्मासिगमेकसि खमेह न पुणो इमं काहं । अह संवेगोवगओ, सूरी इय भणिउमारद्धो ॥ ३८ ॥ रसगारवाइविसविहुयचेयणो सुट्ठु बोहिओ तुमए । पंथय ! ता कयमेत्तो, एत्था-वत्थाण सोक्खेण ॥ ३९ ॥ अह विहरिउमारद्धो, स महप्पा अणियाए चरियाए । विहरंतो परियरिओ, पुणरवि पोराणसीसेहिं ॥ ४० ॥ कालंतरेण निद्धुणिय--रयमलो मलियदलियमोहबलो । सेत्तुंजपव्वयंमि, निव्वाणमणुत्तरं पत्तो ॥ ४१ ॥ २४६ ॥

ननु कथमागमज्ञोऽपि शेलकः शिथिलतामगमत्, उच्यते कर्म्मवैचित्र्यात् । तद्धि जानतामपि जन्तूनां महतेऽनर्थाय यत आह—

**दस दस दिवसे दिवसे, धम्मे बोहेइ अहव अहिअयरे । इअ नंदिसेणसत्ती, तहविय से संजमविवत्ती ॥ २४८ ॥**

'संजमविवत्ति'त्ति-चारित्रस्याभावः । नन्दिषेणाख्यानकं चेदम्—रायगिहे सेणियरायअंगओ आसि नंदिसेणो त्ति । तारुन्नयंमि तारुन्नयंमि लायन्नपुन्नतणू ॥१॥ सिरिवीरसामिसद्धम्मदेसणं सो कयाइ सुणमाणो । पडिबुद्धो पत्थइ तित्थनाह ! मह देह दिक्खं ति ॥ २ ॥ भवओ भग्गमभग्गं, भोगफलं अत्थि नत्थि वयसमओ । इय भुवणभाणुणा सो, भणिओ तो देवयाए वि ॥ ३ ॥ निय-पुरिसयारसाहस-निहिस्स पुरिसस्स । किं कुणइ कम्ममेयं पि, पहु कयं नणु सयं चेव ॥ ४ ॥ सयमेव सुदट्ठु तानि-ठवेमि तं लट्ठकट्ठचेट्ठाहिं । हे कडपूयणि ! को गणइ, तं तु किं वा विजाणेसि ॥ ५ ॥ इय नवतरुणिमरमणीय-रत्तअंतेउरेण सह सव्वं । सिवयं च लग्गलग्गं, तणं व रज्जं परिच्चज्ज ॥ ६ ॥ पडिवज्जिऊण पव्वज्जमागमं आगमित्तु तत्तरुई । विहरइ एगल्लविहारे-पडिम-पडिवन्नओ स तओ ॥ ७ ॥ कहमवि कयाइ वेसापासाए सो गओ अणाभोगा । पिंडवडियाए पभणइ, गुरुधुणिणा धम्मलाभो त्ति ॥ ८ ॥ अह उट्ठिऊण सविलास-मांसलामोय-मणहरंगीए । परिहासपेसलाए, भणियं भण दम्मलाभोत्ति ॥ ९ ॥ किं कुणइ अम्ह धम्मो, दम्मो चिय एत्थ अग्घइ मुणिंद ! । अक्खरवित्तपवित्तो, वि तुलइ दम्मेण नहु धम्मो ॥ १० ॥ गणियंगणाण गेहे, धणचंगा चेव गोरविज्जंति । निद्धणचंगा रायंऽगया वि गरुहं चिय लहंति ॥ ११ ॥ ता सामरिसो सो, नंदिसेणसाहू करे करेऊण । पडलाउ तणं पभणेइ, पडउ पडउत्ति झत्ति तओ ॥ १२ ॥ मरगयमोत्तिय माणिक्क-अंकहीराइरयणधणवुट्ठी । नियलद्धीए तेणं । निवडिया देवयाए य ॥ १३ ॥ भणियं मुणिणा एसो, हासपरे होइ दम्मलाभो ते । केत्तियमेत्तं सत्तं व, निहीण धम्मो य दम्मो य ॥ १४ ॥ चिंतियमिमीए एसो, अहह महप्पा धीमहानिही कोइ । मह पुव्वजम्मनिम्मिय, पुन्नपवंचेणभुवणीओ ॥१५॥ खोहेमि य बोहेमि य, ता तत्तं मारसारसोक्खाणं । जउगोलो कढिणो ताव, जाव जलणं न पावेइ ॥ १५ ॥ नीहरमाणो परिहास-पेस-लाऽऽलावमासलाए तओ । तीए वुत्तं भाडिं, दाऊण न लब्भए गंतुं ॥१७॥ कुरु पाणपिय ! पसायं, पायविलग्गाए निययदासीए । मह पाणेहिं पयाणं, पारद्धं सह सए चेव ॥ १८ ॥ भवियव्वयावसाउ, अणुसयपरवंतरीपवंचाउ । विसयाणुसंगमग्गे, लग्गो चित्ते

विचिंतेइ ॥ १९ ॥ जुगविगमे वि जिणेसेण, भासियं होइ नन्नहा नूणं । नायं तया न एयंपि, मूढमइणा मए हि हहा ॥ २० ॥ गुरुकुल तायकुलाणं, कलंकपंको अ संकमेइ इओ । पुण एत्तो निसुलमत्त-मयणकरिकेलिउच्छाहो ॥२१॥ ततो जातोऽयं धृत्तान्तः— एगत्तो रुयइ पिया, अन्नत्तो समरतूरनिग्घोसो । नेहेण रणरसेण य, भडस्स दोलाइयं चित्तं ॥ २२ ॥ अपि च—अकर्त्तव्येष्वसाध्वीव, तृष्णा प्रेरयते जनम् । तमेव सर्वपापेभ्यो, लज्जा मातेव रक्षति ॥ २३ ॥ किंच—लज्जां गुणौघजननीं जननीमिवार्यामत्यन्तशुद्धहृदयामनुवर्त्तमानाः । चेतस्विनः सुखमसूनपि संत्यजन्ति, सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम् ॥ २४ ॥ मम तु तीव्राणि तपांसि तप्यमानस्यापि अपद-विपदमाप्स्यन्मानमुद्रां त्यजन् द्राक्, प्लवगपतिवदुच्चैश्चित्तमुन्मत्तमेतत् । वदनजघननाभिनेत्रवक्त्राग्रपाणिष्वनुसमयममुष्याः फालकेलीं करोति ॥ २५ ॥ ता ताव हावभावाणु-भावभासुरसरीरमेयमहं । माणेमि न नूरमिस्सं, संजमलच्छि तु पच्छावि ॥ २६ ॥ दस दस दिवसे दिवसे, बोहिस्सं संजमंमि अहिए वि । एगो वि न पुज्जइ जइ, कयाइ ताहं भविस्सामि ॥ २७ ॥ इय कयनियमो सव्वंग-संगिसिंगारचंगअंगीए । वसइ विसएक्कचित्तो, बारसवासाइं सह तीए ॥ २८ ॥ रयहरणपडिग्गह-कंबलाइसंजमियमुकमेगंते । पइदियहं वंदिय विन्नवेइ देदेसु सुमइं मे ॥ २९ ॥ भावियमई वि तवसोसिओ वि विन्नाय विसयदोसो वि । कम्मवसाओ चलिओ, मेरुसरिच्छो वि नियमाओ ॥ ३० ॥ भोगविवागं कम्मं, निकाइयं जाव वेइयं ताव । वेरग्गमग्गलग्गो, चिंतेउमिमं समाढत्तो ॥ ३१ ॥ बारसवरिसेहिं तए, किमज्जियं जीव ! वज्जिया लज्जा । नडिओ नूणमणाए, गु(मु)णिजणवेसाए वेसाए ॥ ३२ ॥ मयणअभु(बु)ल्लिरदुल्ललिय-भिल्लसुमहल्लतिक्खभल्लीहिं । सो विज्झइ जो गिज्झइ, रमणीरमणीयतणुफासे ॥ ३३ ॥ " जह अणुरज्जासि तरुणीयणंमि तह जइ जिणिंदधम्मंमि । तो तेणेव भवेणेवं, भवक्खओ तुह भवे जीव ! " ॥ ३४ ॥ को अणुराओ का तंमि, चंगिमा वल्लहंमि रे जीव ! । जंमि चलो सब्भावो, गयणंमि व तडितडक्कारे ॥ ३५ ॥ अद्धट्ठपिच्छरीहिं, अबला वि चंचलविवेयनेहाहिं । असुइगुरुकोट्ठियाहिं वि जे भंसिज्जंति सत्ताउ ॥ ३६ ॥ ताण फुसिज्जइ लीहा जीहा विउसाण थुणउ किं ताण । पुरिसायारधराणं, चंचापुरिसाण व नराणं ॥ ३७ ॥ ही ही अणज्जकज्जुज्जयस्स रे जीव ! तुज्झ

किं भणिमो । जिणसासणंपि कहमवि, लद्धं हारेसि मुहियाए ॥ ३८ ॥ जं विसएसु पसज्जसि, भंजसि सुहसीलवणराइं । मत्त-करिव्व न वेयसि, देसणतिक्खंऽकुसपहारं ॥३९॥ वट्टं(ड्डुं)तरंमि भुल्लं, रे हियय ! हयास जिणमयं लध्धुं । विसए सुहाय वंछसि, जीयट्ठी ! पियसि हालहलं ॥ ४० ॥ विसधारिओसि धुत्तूरिओसि मोहेण किं व ठगिओ सि । विसएसु वि जं सोक्खं, मग्गसि रे जीव ! जाणंतो ॥ ४१ ॥ धी तुज्झ तुंगिमा चंगिमा वि, धीगुणकलाणमाहप्पं । जं किर लद्धविवेओ वि, ववसिओ भुंजिउं विसए ॥ ४२ ॥ इय भावितो पडिबोहियाए वेसाए सो थुणिज्जंतो । दसमंमि अपुज्जंते, जई सयं चेव संजाओ ॥ ४३ ॥ परि-पालियपव्वज्जो, आलोइय निंदिउ गुरुसगासे । खरतरतवचरणं चरिय, मरिय तियसत्तमणुपत्तो ॥ ४४ ॥ २४८ ॥ इति श्रेणिकसुत-नंदिषेणकथा ॥ किमित्येतादृशसामर्थ्योऽप्यसौ संयमात्प्रच्यावितः ? उच्यते—

**कलुसीकओ अ किट्टीकओ अ खयरीकओ मलिणिओ अ । कम्मेहिं एस जीवो, नाऊणऽवि मुज्झई जेणं ॥ २४९ ॥**

**कम्मेहिं वज्जसारोवमेहिं जउनंदणोऽवि पडिबुद्धो । सुबहुंपि विसूरंतो, न तरइ अप्पक्खमं काउं ॥ २५० ॥**

**वाससहस्संऽपि जई, काऊणं संयमं सुविउलंपि । अंते किलिट्ठभावो, न विसुज्झइ कंडरीउ व्व ॥ २५१ ॥**

**अप्पेणऽवि कालेणं, केइ जहागहियसीलसामण्णा । साहंति निययकज्जं, पुंडरियमहारिसि व्व जहा ॥ २५२ ॥**

'कलुषीकृतो'—जलमिव पार्थिवरेणुभिः । अनेन बद्धावस्थां लक्षयति—'किट्टीकृतो'ऽन्योन्यानुवेधद्वारेणैक-लोलीभूतः सुवर्णता-म्रमिश्रतावत् । अनेन निधत्ताऽवस्थामाचष्टे । 'खउरीकृतो'—नितान्तं तद्भावमापन्नोऽग्निध्मातायसोऽणुवत् । अमुना निकाचितावस्थां सूचयति—'मलिनितो' बहिर्जातमलः शुष्करजोगुंडिताङ्गवत्, अनेन स्पृष्टदशां दर्शयति । अस्याश्च पश्चादुपादानं वीतमोहदशायामेव भावात् ॥ २४९ ॥ "कम्मेहिं" गाहा । 'प्रतिबुद्धो'ऽपि ज्ञान्यपि विष्णुः 'सुबह्वपि विसूरयन्' मनसा खिद्यमानो न तरति न

शक्नोत्यात्महितं नरकाद्विमोक्षं कर्तुं ॥ २५० ॥ क्लिष्टाक्लिष्टकर्म्मसामर्थ्यमेव दृष्टान्तेनाह—"वास" गाहा । "अप्पेण" गाहा । द्वितीयगाथान्ते यथेति कथानकोपक्षेपार्थः ॥ कथानकं चेदम्—

पुंडरिगिणीपुरीए, पयंडभुयदंडखंडियविवक्खो । आसि पुंडरियनिवो, जिणिंदधम्मेक्कनीसंको ॥ १ ॥ सो य महप्पा तडिदंड-भंगुरं जाणिऊण रज्जसिरिं । खरपवणाहयदीवय-सिहं व जीयंपि तरलतरं ॥ २ ॥ किंपाकफलं व विवागदिन्न-दुक्खं सया विसय-सोक्खं । लक्खित्ता सविसेसं, सुगुरुसमीवंमि पडिबुद्धो ॥ ३ ॥ पव्वज्जं काउमणो, कणिट्ठनियभायरं दढप्पणयं । कंडरियनामधेयं वाहरिउं भणिउमाढत्तो ॥४॥ हे भाय ! रज्जलच्छिं, उवभुंजसु संपयं तुमं एत्थ । भववासाओ विरत्तो, अहमिन्हिं पव्वइस्सामि ॥५॥ कंडरिएणं भणियं, दुग्गइमूलं ति जइ तुमं रज्जं । मोत्तूणं पव्वज्जं, वंछसि घेत्तुं महाभाग ! ॥६॥ ता किं मज्झ वि रज्जेण, सव्वहाऽहं गुरुस्स पामूले । इन्हिं चिय नीसंगो, जिणिंददिक्खं गहिस्सामि ॥७॥ भणियं निवेण हे वच्छ !, सव्वसावज्जजोगचागो जो । माणु-स्सयस्स एयस्स, सव्वहा सो फलं नऽन्नं ॥८॥ किं पुण सुदुक्करो सो, तारुन्नं कारणं वियाराण । मणमणवट्ठियमप्पा, पमायवं इंदिया वि(अ)वसा ॥९॥ धरियव्वाणि वयाणि य, उवसग्गपरीसहा दुरहियासा । हेयव्वो गिहिसंगो, भूयाहिं सिंधू तरेयव्वो ॥१०॥ इय नरवइणा सुवहुप्पयारहेऊहिं वारिओ वि दढं । अचंततरलयाए, सूरिसमीवे स निक्खंतो ॥११॥ गुरुकुलवासोवगओ, पविहरमाणो पुरा-ऽऽगराईसु । उचियाहारविहाराऽभावे संजायगेलन्नो ॥१२॥ चिरकालाओ पुंडरिगिणीए नयरीए आगओ संतो । उवयरिओ विज्जोस-हविहीए पुंडरिय नरवइणा ॥१३॥ जाओ पउणसरीरो, रसगिद्धीए तहावि अन्नत्थ । विहरिउमणुच्छहंतो, रन्ना उच्छाहिओ एवं ॥१४॥ धन्नो तुमं महायस !, निस्संगो जो न दव्वपभिईसु । थेवं पि हि पडिबंधं, करेसि तवसुसियदेहो वि ॥ १५ ॥ तुममेव अम्ह कुलनहयलंमि संपुन्नपुन्निमायंदो । सच्चरियपहापसरेण, जस्स धवलिज्जए भुवणं ॥ १६ ॥ अप्पडिबद्धविहारो, तुमए चियऽणुट्ठिओ महाभाग ! । जो मज्झऽणुवित्तीए वि, ठासे नो एत्थ ठाणंमि ॥१७॥ इय उच्छाहगवयणेहिं, राइणा तह कहंपि पन्नविओ । जह सीयविहारी विहु, कंडरिओ विहारिओ तत्तो ॥ १८ ॥ संजमपडिभग्गमणो, भूसयणाऽसारभोयणाईहिं । सीलमहाभारुव्वहण-

भंगुरो चत्तमज्जाओ ॥ १९ ॥ विसयाभिसंगगुरुओ, कुलवासाओ सो विणिक्खमिउं। रज्जोवभुंजणट्ठा, समागओ पुण स नयरीए ॥ २० ॥ निवकाणणंमि सुद्दसाहि-[?]हलंबिय धम्मउवगरणो। हरियाउलधरणियलंभि संनिसन्नो य निल्लज्जो ॥२१॥ तं च तहट्ठिय-मायन्निऊण राया समागओ नमिउं। चिरसंजमुज्जमत्थं, एवं भणिउं समारद्धो ॥ २२ ॥ तुममेक्को च्चिय धन्नो, कयपुन्नो लद्धजी-वियफलो य। पालेसि निरइयारं, जो पव्वज्जं जिणुद्दिट्ठं ॥ २३ ॥ दुग्गइनिबंधणेणं, रज्जेणं निबिडबंधणेणं व। बद्धोऽहं पुण न लभामि, धम्मकज्जं किमवि काउं ॥ २४ ॥ एवं वुत्तो वि हु रुक्खचक्खुखेवो न जाव सो किंपि। जंपेइ ताव रन्ना, वेरग्गं उव्वहंतेण ॥ २५ ॥ पुणरवि भणिओ हे मूढ !, पुव्वकाले वि वारिओ बाढं। पव्वज्जापडिवत्तिं, तुमं कुणंतो मए तइया ॥२६॥ दिंतो य रज्जमिन्हिं च, तस्स दाणे वि किं सुहं तुज्झ। उज्झिय नियपइन्नस्स, तिलवाउ वि लहुयस्स ॥ २७ ॥ एवं भणि-ऊण नराहिवेण रज्जं पणामियं तस्स। काऊण सयं लोयं, गहिओ सव्वो वि तव्वेसो ॥ २८ ॥ मोत्तूण विससरिच्छं, रज्जं अमयं व लेइ सामन्नं। पुंडरिओ इयरो पुण, पावमई कुणइ विवरीयं ॥ २९ ॥ तो सयमवि पडिवज्जिय, पव्वज्जं अइगओ गुरुसमीवे। तत्थ पुण गहियदिक्खो, छट्ठक्खमणस्स पारणए ॥ ३० ॥ अणुचियं आहारवसा, बाढं संजायपेट्टसूलत्ति। मरिऊणं उववन्नो, देवो सव्वट्ठसिद्धंमि ॥ ३१ ॥ इयरो वि मंतिसामंत-दंडनाहाइसयललोगेण। हीलिज्जंतो पव्वज्ज-च्चायकारित्ति पावोत्ति ॥ ३२ ॥ कुविओ चित्ते चिंतइ, इंति न मे पायपज्जुवासाए। एए पावा सव्वे, मारेयव्वा मएऽवस्सं ॥ ३३ ॥ जेमेमि जा चिराओ, नीसेसविसे-सरसमसणमिय सो। घयपुन्नपमुहवल्लंतरसवइं काउमाइसइ ॥ ३४ ॥ पिच्छणगपेच्छगाणं, निदरिसणेणं अणेणमुवभुत्तं। पढमम-इरुक्खवल्लाइ तदणुघयपुन्नखंडाइ ॥ ३५ ॥ अच्चंतविसयगिद्धोए, पउररसपाणभोयणासत्तो। रोद्दज्झाणोवगओ, विसूइया दोसओ अचिरा ॥ ३६ ॥ मरिऊणं नेरइओ, उप्पन्नो सत्तमाए पुढवीए। एवमपावियविसया वि, विसइणो जंति परमदुहं ॥ ३७ ॥ मोत्तूण महारयणं, पहाविओ कायमणिय तन्हाए। मोहेण अंतराले, जा पडिओ अंधकूवंमि ॥ ३८ ॥ विसयविरत्ता सत्ता, सत्त-मसत्ताओ भवसुहुकरिसं। अकयकिरिया वि पाविंति, कम्मगुरुलाघववसाओ ॥ ३९ ॥ इति पुंडरिक-कंडरिककथा ॥ २५२ ॥

नन्तु यः क्लिष्टतां गतोऽपि म्रियते तस्येदमादिष्टं, यस्तु तस्याः शुद्धिं विदध्यात्तस्य का वार्त्ता? उच्यते—अस्त्येतत् किन्तु दुष्करा शुद्धिः कर्त्तुमित्याह—

**काऊण संकिलिट्ठं, सामण्णं दुल्लहं विसोहिपयं। सुज्झिज्जा एगयरो, करिज्ज जइ उज्जमं पच्छा ॥ २५३ ॥**
**उज्झिज्ज अंतरि च्चिय, खंडिय सबलादओ व्व हुज्ज खणं। ओसन्नो सुहलेहड न तरिज्ज व पच्छ उज्जमिउं ॥ २५४ ॥**
**अवि नाम चक्कवट्टी, चइज्ज सव्वंपि चक्कवट्टिसुहं। न य ओसन्नविहारी, दुहिओ ओसन्नयं चयई ॥ २५५ ॥**
**नरयत्थो ससिराया, बहु भणई देहलालणासुहिओ। पडिओमि भए भाउअ! तो मे जाएह तं देहं ॥ २५६ ॥**

संक्लिष्टं श्रमणभावं कृत्वा पश्चाद्दुर्लभं विशुद्धिपदं कर्त्तुमिति गम्यते ॥ २५३ ॥ पश्चाद्दुर्लभतामेव विशुद्धेराह—"उज्झेज्ज" गाहा ॥ संक्लिष्टसंयमो हि कदाचिदन्तराल एव संयमं त्यजेत्। अपरित्यक्तेऽपि खण्डता–शबलतादयो दोषाः क्षणं भवेयुः। खण्डता–एकादिमूलगुणविराधनं। शबलता–लघुअतिचारता। आदिशब्दात्सर्वोऽभावो वा भवेत्। एवमवसन्नश्चैव 'सुहलेहडत्ति' वैषयिकसुखलम्पटः सन्नशक्नुयात्पश्चादुद्यंतुमिति ॥ तथाहि—"अवि" गाहा–'दुहिओत्ति' अत्रापि शब्दो द्रष्टव्यः। दुःखितोऽप्यवसन्नतां न त्यजति मोहोपहतत्वात् ॥ तदेवमिहभवे संक्लिष्टस्याप्यस्ति कदापि शुद्ध्युपायो भवान्तरे तु दुर्गति(तौ) नास्तीत्याह—"नरय" गाहा। "को तेण" गाहा। गाथार्थः कथानकावगमे सुगम इति तदेवोच्यते—

नयरे कुसुमपुरंमि, जियारिरन्नो अहेसि दोन्नि सुया। ससिपह सूरपहक्खा, वंकअवंका सहावेण ॥ १ ॥ जह बोरिकंटया ताण, तत्तओ जेट्ठओ अहोगामी। अणुओ उड्ढंगामी, पढमपरोहावत्तीयस्स ॥ २ ॥ चउनाणि सूरिणो वि, जयघोसनामस्स पासमल्लीणा। कोउगभत्तीहिं कयाइ, कहइ सूरी वि धम्मफलं ॥ ३ ॥ हरिलहरिमुद्धमुध्धुरबंधुरसिंधुरमणेगरहसोहं। धम्मेणमेगछत्तं, भुवि रज्जं अज्जिणेइ जणो ॥ ४ ॥ तरलतरतिक्खअक्खय–कडक्खविक्खेवदक्खचक्खूओ। घणपीणपओहरपेसलाओ महिलाओ हुंति

तओ ॥ ५ ॥ अइसुरहिकुसुमकुंकुम–कप्पूरप्पभिइभोगसामग्गी । धम्मेण मिलइ निच्छियमिच्छियमेत्तो वि सव्वो वि ॥६॥ दोग-च्चदुग्गदोहग्ग–दुग्गई दुक्खलक्खअक्खेवो । जो कोइ होइ कस्सइ, जियाण सो फलमहम्मस्स ॥ ७ ॥ सम्मत्तमूलबंधो, अणन्न-सामन्नविरइवरखंधो । मोक्खफलो धम्मतरू, पाविज्जइ पावलाघवओ ॥ ८ ॥ इच्चाइदेसणा हलुयकम्मुणो परिणमेइ सूरस्स । वाहिं वहिऊण गया, ससिणो पुण मुग्गसेलस्स ॥ ९ ॥ अन्नंमि दिणे सूरप्पहेण भणिओ ससिप्पहो भाय ! । सूरीण वंदणत्थं, वच्चेमो सुकयमज्जेमो ॥ १० ॥ भणियं ससिणा एरिसो सि जो इंदियालिएणावि । वेयारिज्जसि एएण, नत्थि पुन्नं च पावं च ॥ ११ ॥ किंच—को हि सयन्नो दिट्ठं, लद्धं सुहमुज्झिऊण दूरेण । अइदूरंमि अदिस्सं, संदिद्धं तं समीहेइ ॥ १२ ॥ रज्जं जोव्वणमुद्दाम-कामिणीओ अणंगचंगत्तं । कहियं धम्मस्स फलं, तं पत्तं तमिह परतत्तं ॥ १३ ॥ भणियं सूरेण न संति, पुन्नपावाइं जइ तओ किमिह । एक्कस्स सोक्खमन्नस्स, दुक्खमुप्पज्जए जुगवं ॥ १४ ॥ तुल्ले बाहिरजत्ते, जुत्तं कहवि सरिसं फलं लोए । हेउविहूणं जइ ता, न होइ किं सव्वसत्ताण ॥ १५ ॥ जस्स न हेऊ सो होइ, सव्वकालंपि पवणपंथोव्व । अहवा न होइ निच्चंपि, अंबरे अंबुजम्मं व ॥ १६ ॥ न य रज्जरिद्धिजोव्वण–विसया इत्थीओ सोक्खहेऊओ विरसावसाणि याणि व्व, अवरसाहारणत्तेहिं ॥१७॥ साहावियं तु सोक्खं, पसमसुहं सासयं स आयत्तं । न य विरसं अवसाणे, लज्जाअणुतावजणगं वा ॥ १८ ॥ पोग्गलपरिणामेसुं, सुहदुक्खाइं सकप्पणामित्तं । कम्मवसयाण जीवाण, हुंति नहु कोइ परमत्थो ॥ १९ ॥ यत उक्तम्—" तानेवार्थान् द्विषतस्तानेवा-र्थान् प्रलीयमानस्य । निश्चयतोऽस्यानिष्टं, न विद्यते किंचिदिष्टं वा " ॥ २० ॥ तथा—" येषां वल्लभया सह क्षण इव क्षिप्रं क्षपा क्षीयते, तेषां शीतकरः शशी विरहिणामुल्केव सन्तापकृत् । अस्माकं तु न वल्लभा न विरहास्तेनोभयभ्रंशिना–मिन्दुराजतदर्प-णाकृतिरसौ नोष्णो न वा शीतलः ॥ २१ ॥ " अपि च—यदासीदज्ञानं स्मरतिमिरसंस्कारजनितं, तदा दृष्टं नारीमयमिदमशेषं जगदपि । इदानीं त्वस्माकं पटुतरविवेकांजनजुषां, समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ २२ ॥ इय भन्नंतो विमुहं, जया स पडिवुज्झए न मोहंधो । तो वद्धयरनिव्विन्नो, पव्वइओ सो महासत्तो ॥ २३ ॥ आराहिऊण संजममुवबन्नो बंभलोयकप्पंमि ।

इयरो भोगे भुंजिय, उववन्नो तइयपुढवीए ॥ २४ ॥ तो सुरप्पहदेवो, तस्साणुकंपाए बोहणाहेउं । पत्तो तइयाए महीए, कहिउमेवं समारद्धो ॥ २५ ॥ बंधो ! बंधुरधम्मं, काऊणाऽहं तया सुरो जाओ । सोऽहं सुरपहो न णु सइ, सुहिओ चेव चिट्ठामि ॥ २६ ॥ पुण पुण पभणंतस्स वि, मज्झ तए नेव वयणमाऽऽयरियं । पावस्स तस्स एसो विलसइ कडुओ इय विवागो ॥ २७ ॥ संभरिय ससी सव्वं पि, वइयरं तं खओवसमवसओ । नरयदुहत्तो तं देवरूवमिक्खंतओ सक्खं ॥ २८ ॥ पडिबुद्धो पभणइ तया, हे भाय ! निब्भग्गसेहरेण मए । सुहलवलुद्धेणं लद्धमेयमेयारिसं दुक्खं ॥ २९ ॥ नरयत्थो ससिराया, बहुं भणइ देहलालणा सुहिओ । पडिओ मि भए भाउय ! तो मे जाएहि तं देहं ॥ ३० ॥ 'जाएहि' त्ति यातय-तीव्रवेदनामनुभावय ॥ २५६ ॥ सूरः—

**को तेणं जीवरहिएण, संपयं जाइएण हुज्ज गुणो ? । जइऽसि पुरा जायंतो, तो नरए नेव निवडंतो ॥ २५७ ॥**

'जइ सि' त्ति[1] यदित्तमयातयिष्यस्तपोऽनुष्ठानादिना देहम् । किंच—जइ सरीरपीडामेत्तेण मोक्खो हवेज्ज ता सत्तममहिनेरइयाणमणवरयमहावेयणाडज्झमाणदेहाणं मोक्खेण होयव्वं । अट्ठमहापाडिहेरपूयापरिभोगओ तित्थयरेहिं पि संसारे भमियव्वं ॥ अओ न दुक्खरूवया तवस्स तित्थयरेहि वित्थारिया, जेण भणियं--सो हु तवो कायव्वो, जेण मणो मंगुलं न चिंतेइ । जेण न इंदियहाणी, जेण य जोगा न हायंति ॥ ३१ ॥ तथा—कायो न केवलमयं परितापनीयो, मृष्टै रसैर्बहुविधैर्न च लालनीयो । चित्तेन्द्रियाणि न चरन्ति यथोत्पथेन, वश्यानि येन च तदाऽऽचरितं जिनानाम् ॥ ३२ ॥ खरदिट्ठंतो वुत्तो, एएणं चेव कारणेणमिह । परलोगपट्ठियाणं, जियाण जियरागदोसेहिं ॥ ३३ ॥ किं च सम्मत्तनाणचरणाणि, खाओवसमिए भावे भणियाणि । वेदणा पुण साया असाया वा उदइए भावे सा कहं तवो हुज्जा । अओ पसमाइगब्भो संवरो पहाणो कम्मक्खयहेऊ । तस्स निमित्तत्तणओ अम्हाण लोयबंभचेर-छट्ठट्ठमाई सव्वो बज्झो तवो कायव्वोत्ति भणिओ । न उण तणुजायणामेत्तो । न य समइ(य)प-

१ यदि असिस्त्वंमयायिष्यस्तपो D. यदि असिस्त्व मयातयिष्यस्तपो B. यदि पुनः पुरात्तदेव यातयेत तपश्चरणकरणैस्ततो॰ सिद्धर्षि टीका॰

रिणामजुत्ताण महाऽडईए महारयणनिव्वाणुज्जयगहिलवेसपुरिसस्स कायकिलेसाइ बज्झतवचरणं दुक्खजणयं भव्वसत्ताणं। तओ उयणाऽत्थिपुरिसाणमिंधणाइगहणं व चारित्तपरिणामसाहणाय बज्झो तवो सव्वत्थ भणिओ। न उण सरीरं वेरियंति तेण तणूं किज्जइ। किंतु मिच्छत्त-अविरति-पमाय-कसाय-जोगेहिं निरंतरं बज्झइ जीवो, तओ ते निस्सेयसऽत्थीहिं निरुंभियव्वा। पडि-बोहिऊणमेवं तं, देवो देवलोगमणुपत्तो। एवं मुणीहिं धम्मंमि, अप्पमत्तेहिं होयव्वं ॥२५७॥ अनेन कथानकेन ग्रन्थकारः स्वपुत्ररणसिंहस्य साक्षादिवोपदेशमाह—

जावाऽऽऊ सावसेसं जाव य थोवोऽवि अत्थि ववसाओ। ताव करिज्जप्पहियं, मा ससिराया व सोइहिसि ॥ २५८ ॥
घित्तूणऽवि सामण्णं, संजमजोगेसु होइ जो सिढिलो। पडइ जई वयणिज्जे, सोअइ अ गओ कुदेवत्तं ॥ २५९ ॥
सुत्ता ते जिअलोए, जिणवयणं जे नरा न याणंति। सुत्ताणवि ते सुत्ता, जे नाऊणं नवि करेंति ॥ २६० ॥
दावेऊण धणनिहिं, तेसिं उप्पाडियाणि अच्छीणि। नाऊणऽवि जिणवयणं, जे इह विहलंति धम्मधणं ॥ २६१ ॥
ठाणं उच्चुच्चयरं, मज्झं हीणं च हीणतरगं वा। जेण जहिं गंतव्वं, चिट्ठाऽवि से तारिसी होई ॥ २६२ ॥
जस्स गुरुम्मि परिभवो, साहूसु अणायरो खमा तुच्छा। धम्मे य अणहिलासो, अहिलासो दुग्गईए उ ॥ २६३ ॥
सारीरमाणसाणं, दुक्खसहस्साण वसणपरिभीया। नाणंकुसेण मुणिणो, रागगइंदं निरुंभंति ॥ २६४ ॥
सुग्गइमग्गपईवं, नाणं दिंतस्स हुज्ज किमदेयं ?। जह तं पुलिंदएणं, दिन्नं सिवगस्स नियगच्छि ॥ २६५ ॥

'जावाउ' गाहा। यावदायुर्यावच्च व्यवसायश्चित्तोत्साहोऽस्ति तावद्वत्स ! आत्महितं कुरु। मा शशिराजवच्छोकं करिष्यसीति ॥ एतच्चात्महितं श्रामण्यमिवोच्यते तच्च यथागृहीतं तथा निर्वाहणीयमन्यथा दोषमाह—'घेत्तूण वि' गाहा। 'सुत्ता' गाहा। वच-

नीयं—दोषोद्घट्टनम् । कुदेवत्वं-किल्बिषिकत्वादि ॥ कथं ते शोकाऽऽस्पदमित्याह—' दावेऊण ' गाहा । ' धम्मधणं ' त्ति धर्म एव सुगति सुखहेतुत्वाद्धनं धर्मधनम् ॥ २६१ ॥ किमिति प्रवचनाकर्ण्णनेऽपि तेषां धर्माय चेष्टा जायते ? । उच्यते-तेषां गुरुकर्म्मत्वेन हीनादिस्थानगामित्वात् । यतः " ठाणं " गाहा । उच्चं स्थानमास्पदं-देवगतिलक्षणं । उच्चतरं मोक्षाख्यम् । मध्यं-मनुष्यगत्यात्मकम् । हीनं-तिर्यग्गतिरूपम् । हीनतरकं-नरकगतिस्वभावं वेति पञ्च स्थानानि । येषु च मध्ये येन जीवेन यत्र गन्तव्यं, चेष्टा से-तस्य तादृशी-तत्स्थानगमनानुरूपा भवति । ' चेट्ठावि से ' इति पठ्यमाने मात्रावृद्ध्या गाथाभङ्ग स्यादिति । ' चेट्ठा सेत्ति ' त्ति अपि शब्दं विना पठनीयम् ॥ २६२ ॥ दुर्गतिहेतुभूतां चेष्टां तावदाह—" जस्स " गाहा ॥ ' अहिलासो दोग्गईएउ ' त्ति यत्तदोर्नित्याभिसम्बन्धात्तस्य दुर्गतावेवाभिलाष इति ज्ञायते तादृशचेष्टादर्शनात् ॥ २५३ ॥ ये पुनस्सुगतिगामिनस्ते किं कुर्वन्तीत्याह—"सारीर" गाहा ' वसणाण परिभियत्ति ' षष्ठयाः पञ्चम्यर्थत्वाद्व्यसनेभ्यः समन्ताद्भीता इत्यर्थः ॥ २६४ ॥ संसारकान्ताराटनैककारणरागगजेन्द्रनिग्रहैकहेतुज्ञानाङ्कुशदातृणां पूज्यतामाह—" सुग्गइ " गाहा ॥ ' हुज्ज किमदेयं ' ति जीवितमपि तस्मै दीयत इत्यर्थः । शिवकस्य-त्रिलोचनस्य निजकाक्षि-स्वकीयं चक्षुः ॥ २६५ ॥ तत्कथा चेयम्—एकस्यामटव्यां गिरिकन्दरान्तर्व्यन्तराधिष्ठिता त्रिलोचनप्रतिमाऽभूत् । तां च देवार्चकः प्रतिदिनं स्नातानुलिप्तार्चितां कृत्वा स्वग्राममागच्छति । कदापि प्रातःप्राप्तस्तां पृथ्वीपातितस्वपूजामालोक्य व्यचिन्तयत् केनेयमपनीता मत्पूजेति । द्वित्रादिदिनेष्वपि तथैव वीक्षमाणस्तत्कारणोपलम्भाय कदाचिच्छन्नो भूत्वा तत्रैव तस्थौ । यावद्धनुर्बाणव्यग्रसज्जपाणिरर्कपुष्पपूर्णापसव्यहस्तो वक्त्रान्तः स्थापितपाथोगण्डूषः पांसुलपादः प्राप्तस्तत्र पुलिन्द्र एकः । तेन शिवस्य देवार्चकपूजां पादेनापनीय मुखगण्डूषेण स्नपयित्वा पूजितोऽसौ सहर्षं सह तेन जल्पितुं प्रवृत्तः, द्वितीयदिवसे देवार्चकेनोपालब्धोऽयम् । मया महाशुचिना प्रत्यहं प्रयत्नेन पूज्यमानोऽपि न त्वं तुष्यसि । अमुना त्वशुचिना ऽत्यन्ताऽधमेन सार्द्धमुल्लपसि । निश्चितं यादृशः पुलिन्द्रस्तादृशस्त्वमपि कृतपूतनः । ततः प्रोक्तं व्यन्तरेण-अतत्त्ववेदिन् ! प्रातरात्मनः पुलिन्द्रस्य च द्रक्ष्यसि विशेषं, ततो द्वितीयदिवसे देवार्चकस्त्रिलोचनं स्वमायोत्खातलोचनमालोक्य क्षणं विधाय परिदेवनां स्थितस्तथैव । अत्रान्तरे प्राप्तः पुलिन्द्रः,

ततस्तमुत्पाटितलोचनं त्रिलोचनमालोक्य मार्गणाग्रेणोत्खाय स्वलोचनं तत्र निवेशयामास । ततस्तेनाहूय व्याहृतो देवार्चकः एवमहमन्तरङ्गबहुमानेन तोषपोषमुद्वहामि, न तु बाह्यपूजामात्रमाह्य इति । एवं ज्ञानदातर्यप्यन्तरङ्गबहुमानः कर्त्तव्यः ॥ अनेनैव चांशेन दृष्टान्तोऽयम् ॥ २६५ ॥ साम्प्रतं श्रेणिकस्य दृष्टान्तेन साधूनां श्रुतदायकेषु विनयोपदेशमाह—

**सिंहासणे निसण्णं सोवागं सेणिओ नरवरिंदो। विज्जं मग्गइ पयओ, इय साहुजणस्स सुअविणओ ॥ २६६ ॥**

श्रेणिककथानकं चैतत्—रायगिहंमि नयरे, राया नामेण सेणिओ आसि । सम्मत्तथिरत्तपहिट्ठसक्कविप्फारियपसंसो ॥ १ ॥ सयलंतेउरपवरा, देवी नामेण चेल्लणा तस्स । चउविहबुद्धिसमिद्धो, मंतीपुत्तो य अभउत्ति ॥२॥ एगंमि य पत्थावे, देवीए पत्थिवो इमं भणिओ । पासायमेगथंभं, मम जोग्गं नाह ! कारेसु ॥ ३ ॥ दुन्निग्गहेणमित्थी-गहेणमुवरोहिएण नरवइणा । पडिवन्नं तव्वयणं, अभयकुमारो य आइट्ठो ॥ ४ ॥ तो वड्ढइणा सद्धिं, थंभनिमित्तं महाऽडईए गओ । दिट्ठो तहिं च विडवी, सुसिणिद्धो अइमहासाहो ॥ ५ ॥ समहिट्ठिओ सुरेण, होहित्ति विचित्तधूवकुसुमेहिं । अहिवासिओ स साही, कओववासेण अभएण ॥ ६ ॥ अह बुद्धिरंजिएणं, तरुवासिसुरेण निसिपसुत्तस्स । सिट्ठं अभयस्स महाणुभाव ! मा छिंदिहिसि एयं ॥ ७ ॥ वचसु सगिहंमि तुमं, काहमहं एगथंभपासायं । सव्वोउयतरुफल... फुल्लमणहराऽऽरामपरिकलियं ॥ ८ ॥ इय पडिसिद्धो अभओ, वड्ढइणा सह गओ सगेहंमि । देवेण वि निम्मविओ, आरामसमेअपासाओ ॥ ९ ॥ तंमि य देवीए सम्मं, विचित्तकीलाहिं कीलमाणस्स । रइसागरावगाढस्स, राइणो जंति दियहाइं ॥ १० ॥ अह तन्नयरनिवासिस्स, पाणवइणो कयाइ गब्भवसा । भज्जाए समुप्पन्नो, डोहलओ अंबयफलेसु ॥ ११ ॥ तो तंमी अपुज्जंते, पइदियहं खिज्जमाणसव्वंगि । तं दट्ठूणं पुट्ठं, तेण पिए ! कारणं किमिह ॥ १२ ॥ परिपक्कंबयफलडोहलो य तीए निवेइओ ताहे । पाणाहिवेण भणियं, चूयफलाणं अयमकालो ॥ १३ ॥ जइ वि हु तहावि कत्तो वि, सुयणु ! संपाडिमो थिरा होसु । निसुओ य तेण रन्नो, सव्वोउय फलदुमाऽऽरामो ॥ १४ ॥ तं चारामं बाहिट्ठिएण पेहंतएण

पिक्कफलो। दिट्ठो अंबयसाही, ताहे जायाए रयणीए ॥ १५ ॥ ओणामिणीए विज्जाए, साहमोणामिऊण गहियाइं। अंबयफलाइं पुणरवि, पच्चोणामाए विज्जाए ॥ १६ ॥ साहं विसज्जिऊणं, समप्पियाइं पियाए हिट्ठेण। पडिपुन्नडोहला सा, गब्भं वोढुं समाढत्ता ॥ १७ ॥ अह अवरावरतरुवर-पलोयणं राइणा कुणंतेण। पुव्वदिणदिट्ठफलपडल-वियलमवलोइयं चूअं ॥ १८ ॥ भणिया रक्खगपुरिसा, रे! केणेसो विलुत्तफलभारो। विहिओ त्ति तेहिं वुत्तं, देव! न तावेत्थ परपुरिसो ॥ १९ ॥ नूण पविट्ठो न य नीहरंतपविसंतयस्स व पयाणि। कस्स वि दीसंति महीयलंमि ता देव! चोज्जमिणं ॥ २० ॥ जस्स अमाणुससामत्थमेरिसं तस्स किंचिवि अकज्जं। नत्थि त्ति य चिंतंतेण, राइणा सिट्ठमभयस्स ॥ २१ ॥ एवं विहत्थकरणक्खमं लहुं लहसु पुत्त! चोरं ति। जह हरियाइं फलाइं, तहऽन्नहा दारमवि हरिही ॥ २२ ॥ भूमियलमिलियमउली-महापसाओ त्ति जंपिउं अभओ। तिय चच्चरेसु चोरं, निरूविउं बाढमाढत्तो ॥ २३ ॥ वोलीणाइं कइवयदिणाणि पत्ता न तप्पउत्ती वि। चिंतावाउलचित्तो, ताहे अभओ दढं जाओ ॥ २४ ॥ पारद्धमन्नदियहे, नडेण नयरीए बाहिं पेच्छणयं। मिलिओ पउरनरगणो, अभएण वि तत्थ गंतूण ॥ २५ ॥ भावोवलक्खणट्ठा, पयंपियं भो जणा! निसामेह। जाव नडो नागच्छइ, ताव ममऽक्खाणयं एक्कं ॥ २६ ॥ तेहिं पयंपियं नाह!, कह तो कहिउमेवमारद्धो। नयरंमि वसंतपुरे, आसि सुया जुन्नसेट्ठिस्स ॥ २७ ॥ दारिद्दविद्दुयत्तेण, नेव परिणाविया य सा पिउणा। वड्डकुमारी जाया, वरत्थिणी पूयए मयणं ॥ २८ ॥ आरामओ सा चोरियाए, कुसुमच्चयं करेमाणी। पत्ता मालागारेण, जंपियं किंपि सवियारं ॥ २९ ॥ तीए वुत्तं किं तुज्झ, भइणीधूयाउ मह सरिच्छाउ। नेवत्थि जं कुमारिं पि, मं तुमं एवमुल्लवसि ॥३०॥ संलत्तं तेण तुमं, उव्वूढा भत्तुणा अभुत्ता मे। एसि समीवे जइ ता, मुंचामि न अन्नहा कहवि ॥ ३१ ॥ एवं ति पडिसुणित्ता, गया गिहं सा कयाइ तुट्ठेण। मयणेणं से दिन्नो, मंतिस्स सुओ वरो पवरो ॥ ३२ ॥ सुपसत्थे हत्थग्गहजोग्गे लग्गंमि तेण उव्वूढा। एत्थंतरंमि अत्थगिरिमुवगयं भाणुणो बिंबं ॥ ३३ ॥ कज्जलभसलच्छाया, वियंभिया दिसि सुतिमिररिंछोली। हयकुमुयसंडजड्डं, समुग्गयं मंडलं ससिणो ॥ ३४ ॥ सहसा विचित्तमणिमय-भूसणसोहंतकंतसव्वंगी। वासभवणंमि पत्ता, भत्तारं विन्न-

वेइ इमं ॥ ३५ ॥ तव्वेलुव्वूढाए, आगंतव्वं'ति मालियस्स मए। पडिवन्नमासि पिययम !, ता जामि तहिं विसज्जेसु ॥ ३६ ॥ सच्चपइन्ना एसत्ति,-मन्नमाणेण तेणऽणुन्नाया। वच्चंती पहरियपवरभूसणा सा पुराओ बहिं ॥ ३७ ॥ दिट्ठा चोरेहिं तओ, महा-निही सो इमो त्ति भणिरेहिं। गहिया नवरं तीए, निवेइओ निययसब्भावो ॥ ३८ ॥ चोरेहिं जंपियं सुयणु !, जाहि सिग्घं परं वलेज्जासि। मुसिऊणं जेण तुमं, जहागयं पडिनियत्तामो ॥ ३९ ॥ एवं काहं ति पयंपिऊण संपट्ठिया अहद्धपहे। तरलतरतार-याउलसमुच्छलंतऽच्छिविच्छोहो ॥ ४० ॥ रणझणिरदीहदंतो, दूरपसारियरउद्दमुहकुहरो। चिरछुहिएणं लद्धाऽसि, एहि एहि त्ति जंपंतो ॥ ४१ ॥ अच्चंतभीसणंगो, समुट्ठिओ रक्खसो सुदुप्पेच्छो। तेणाऽवि करे धरिया, कहिए तस्सावि सब्भावे ॥ ४२ ॥ उम्मुक्का आरामे, गंतूणं बोहिओ सुहपसुत्तो। मालागारो भणिओ, सुपुरिस ! साऽहं इमा पत्ता ॥ ४३ ॥ एवंविह रयणीए, सभूसणा कह समागया तंसि। इय तेणं सा पुट्ठा, सिट्ठंतीए जहावित्तं ॥ ४४ ॥ अव्वो सच्चपइन्ना, महासईत्ति मन्नमाणेण। चलणेसु निवडिऊणं, मालागारेण लहु मुक्का ॥ ४५ ॥ पत्ता रक्खसपासे, सिट्ठो से मालियस्स वुत्तंतो। अव्वो महप्पभावा, एसा जा उज्झिया तेण ॥ ४६ ॥ इय भावितेणं निवडिऊणं पाएसु तेण वि विमुक्का। चोरसमीवे य गया, सिट्ठो तह पुव्ववुत्तंतो ॥४७॥ तेहि वि अणप्पमाहप्प-दंसणुप्पन्नपक्खवाएहिं। सालंकारच्चिय वंदिऊण सा गिहंमि पट्ठविया ॥ ४८ ॥ अह आभरणसमेया, अक्खय-यअंगा अभग्गसीला य। पत्ता पइस्स पासे, कहियं सव्वं जहा वुत्तं ॥ ४९ ॥ परितुट्ठमणेण समं तेण, पसुत्ता समत्थरयणिं पि। जाए पभायसमए, चिंतियमियं मंतिपुत्तेण ॥ ५० ॥ " छंदट्ठियं सुरूवं, समसुहदुक्खं अनिग्गयरहस्सं। धन्ना सुत्तविउद्धा, मित्तं महिलं च पिच्छंति ॥ ५१ ॥" समपेम्मरसं समरूव-जोव्वणं समसिणेहसब्भावं। समसुहदुक्खं च जणं, समपुन्नो जईजणो लहइ ॥ ५२ ॥ इय भावितेण कया, घरस्स सा सामिणि समग्गस्स। किंच न कीरइ निक्कवड-पेम्मपडिबद्धहिययंमि ॥ ५३ ॥ इय पइ-तक्कर-रक्खस-मालागाराणं मज्झओ केण। तच्चागेण कयं दुक्करंति भो मज्झ साहेह ॥५४॥ ईसालुएहिं भणियं, सामी पइणा सुदुक्करं विहियं। परपुरिस समीवे जेण पेसिया सव्वरीए पिया ॥ ५५ ॥ भणियं छुहालुएहिं सुदुक्करं रक्खसेण चेव कयं।

जेण चिरं छुहिएण वि न भक्खिया भक्खिणिज्जा वि ॥ ५६ ॥ अह पारदारएहिं पयंपियं देव ! मालिओ एक्को । दुक्करगारी जेण चत्ता सा निसिं पत्ता ॥ ५७ ॥ पाणेण जंपियं होउ ताव चोरेहिं दुक्करं विहियं । पइरिक्के वि विमुक्का ससुवन्ना जेहिं सा तइया ॥ ५८ ॥ एवं वुत्तो चोरोत्ति, निच्छिउं सोऽभएण मायंगो । गिण्हाविऊण पुट्ठो, कहमारामो विलुत्तो त्ति ॥ ५९ ॥ तेणं पयंपियं नाह !, पवरविज्जाबलेण नियएण । कहिओ य वइयरो सेणियस्स एसो समग्गो वि ॥ ६० ॥ रन्ना वि संसियं देइ, कहवि जइ मज्झ निययविज्जाओ । सो पाणो तो मुंचह, इहरा से हरह जीयंति ॥ ६१ ॥ पडिवन्नं पाणेणं, विज्जादाणं पि अह महीनाहो । सीहासणे निसन्नो, विज्जाओ पढिउमाढत्तो ॥ ६२ ॥ पुणरुत्तप्पयत्तुक्कित्तिया वि, रन्नो न ठंति जा विज्जा । सो ता तज्जइ रुट्ठो, न रे ! तुमं देसि सम्मंति ॥ ६३ ॥ अभएण भणियमिह देव !, नत्थि एयस्स थेवमवि दोसो । 'विणयगहियाउ विज्जाउ, ठंति फलदा य जायंति' ॥ ६४ ॥ यत उक्तम्—विज्जा वि होइ फलदा, गहिया पुरिसेण विणयमंतेण । सुकुलपसूया कुलबालियव्व पवरं पइं पत्ता ॥ ६५ ॥ तो पाणमिमं सीहासणंमि ठविऊण सयअवि महीए । होऊण विणयसारं, पढसु जहा ठंति इण्हिपि ॥ ६६ ॥ तह चेव कयं रन्ना संकंताओ लहुं च विज्जाओ । सक्कारिऊण मुक्को, पाणो अच्चंतपणइव्व ॥ ६७ ॥ इय जई इहलोइय, तुच्छकज्ज विज्जा वि भावसारेण । पाविस्सइ हीणस्स वि, गुरुणो अच्चंतविणएण ॥ ६८ ॥ ता कह समत्थमणवंछियत्थदाणक्खमाए विज्जाए । जिणभणियाए दाईण, विणयविमुहो बुहो होज्जा ? ॥ ६९ ॥ अन्नं च—पत्थरकया वि देवा, सन्निज्झपरा हवंति विणयाओ । जइ ता का गणणा अन्नवत्थुसिद्धीए धीराणं ॥ ७० ॥ तम्हा कल्लाणपरंपराए संपाडणेक्कपडुयंमि । विणयंमि निमेसंपि हु, बुहेण न पमाइयव्वंति ॥ ७१ ॥ इति विनये श्रेणिककथा ॥ २६६ ॥ एवमपि स्थिते यो दुर्बुद्धिर्गुरुं निह्नुवीत तद्दोषमभिधित्सुराह—

**विज्जाए कासवसंतिआए दगसूअरो सिरिं पत्तो । पडिओ मुसं वयंतो, सुअनिण्हवणा इय अपत्था ॥ २६७ ॥**

'काश्यपो'-नापितः, 'दकशूकरो'-नित्यस्नायित्वात् त्रिदण्डी, 'निण्हवण' त्ति प्राकृतत्वात् क्लिलिङ्गता, 'अपथ्या'-अहिता। आख्यानकं त्विदम्—तामलित्तीए नयरीए मंडिओ नाम कासवगो। सो य विज्जासामत्थओ गयणट्ठियछुरभंडेण लोयस्स छुरकम्मं करिंतो दिट्ठो जोगप्पणापरिवायगेण। तओ पच्छन्नं दाणाइणा उवचरिय तेण सो विज्जं मग्गिओ, दिन्ना य से तेण विज्जा। तओ उत्तरावहे गंतूण पउंजंतस्स लोए महंतो पूयासक्कारो। अन्नया पउमरहेण राइणा निमंतिओ पूइऊण पुच्छिओ य। भयवं! किमेयं तवस्स बलमुयाहु विज्जाए। रन्ना वुत्तं कत्तो तुब्भेहिं एसा विज्जा पाविया, जेण तुब्भं तिदंडभिसिगाइ आगासे चिट्ठइ। तेण भणियं मज्झ हिमवंतगिरिवासिणा महेसिणा विज्जा दिन्ना। तओ तक्खणं मंतदेवयाए कुवियाए तिदंडाइयं खडहडंतं भूमीए पाडियं। लज्जाए अहोमुहो सो दिट्ठिओ परिव्वायगो हीलिओ य जणेणं। एवं अन्नेण वि सुयदायगस्स डहराइस्स वि निण्हवो न कायव्वो त्ति ॥ २६७ ॥ किमित्येवमिति चेदुच्यते,—सम्यग्ज्ञानदातुर्महोपकारित्वात्तथाहि—

सयलम्मिऽवि जियलोए, तेण इहं घोसिओ अमाघाओ। इक्कंऽपि जो दुहत्तं, सत्तं बोहेइ जिणवयणे ॥ २६८ ॥
सम्मत्तदायगाणं, दुप्पडियारं भवेसु बहुएसु। सव्वगुणमेलियाहिऽवि, उवयारसहस्सकोडीहिं ॥ २६९ ॥
सम्मत्तम्मि उ लद्धे, ठइयाइं नरयतिरियदाराइं। दिव्वाणि माणुसाणि य, मोक्खसुहाइं सहीणाइं ॥ २७० ॥
कुसमयसुईण महणं, सम्मत्तं जस्स सुट्ठियं हियए। तस्स जगुज्जोयकरं, नाणं चरणं च भवमहणं ॥ २७१ ॥

किमिति जिनवचनबोधात्तेनाऽऽमाघातोद्घोषणा जगत्यकारि स खलु बुद्धः सन् सर्वविरतो भवन् मोक्षं वा क्रमादाक्रामन् यावज्जीवं-सकलकालं च जीवान् रक्षतीति ॥ २६८ ॥ ज्ञानदातुरिव सम्यक्त्वदातुरपि दुःप्रत्युपकार्यतामाह—"सम्मत्त" गाहा। 'दुप्पडियारंति'-प्रतिकारस्य प्रतीपोपकारस्य दुष्करत्वं वर्त्तते। भवपरम्पराकृतोपकारसहस्रकोटिभिरपि न कथंचित्तेषां प्रत्युपकर्त्तुं पार्यत इत्याकूतम् ॥ २६९ ॥ कथमेतत्तस्य बृहद्गुणत्वात्तथाहि—"सम्मत्तंमि" गाहा यथा मोक्षसुखानि तद्वतः स्वायत्तानि स्यु-

स्तथाह—" कुसमय " गाहा । 'चरणं च भवमहणं'ति चारित्रं च सर्वसंवररूपमयोग्यवस्थाभाविभवमथनं सिद्धत्वसम्पादकम् ॥ तथाहीदमेवं वर्ण्यते तिर्यङ्नरकयोर्द्वारे, दृढा सम्यक्त्वमर्गला । देवमानवनिर्वाणसुखद्वारैककुञ्चिका ॥



भवेद्वैमानिकोवश्यं, जन्तुः सम्यक्त्ववासितः । यदि नोद्वांतसम्यक्त्वो, बद्धायुर्वापि नो पुरा ॥ १ ॥ अन्तर्मुहूर्त्तमपि यः समुपास्य जन्तुः सम्यक्त्वरत्नममलं विजहीत सद्यः । बम्भ्रम्यते भवपथे सुचिरं न सोऽपि, तद्बिभ्रतश्चिरतरं किमुदीरयामः ॥ २ ॥ तत्स्वरूपं तु-देवे रागादिनिर्मुक्ते, गुरौ सीलाङ्गशालिनि । अहिंसाशाद्वले धर्म्मे, सात्म्यं सम्यक्त्वमुच्यते ॥ ३ ॥ तद्विपक्षस्य तु मिथ्यात्वस्य स्वरूपं यथा—देवो रागी यतिः संगी, धर्मः प्राणिनिशुम्भनः । मिथ्यादृष्टिरिति ब्रूते, पीतमद्यवदस्तधी ॥ १ ॥ न मिथ्यात्वसमः शत्रुर्न मिथ्यात्वसमं विषम् । न मिथ्यात्वसमो रोगो, न मिथ्यात्वसमं तमः ॥ २ ॥ द्विषद्विषतमोरोगैर्दुःखमेकत्र दीयते । मिथ्यात्वेन दुरन्तेन, जन्तोर्जन्मनि जन्मनि ॥ ३ ॥ मिथ्यात्वेनालीनचित्तानि तान्तं तत्त्वातत्त्वं जानते नैव जीवाः । किं जात्यन्धाः कुत्रचिद्वस्तुजाते, रम्यारम्यव्यक्तिमासादयेयुः ॥ ४ ॥ विशेषतो देवादेवस्वरूपं चेदम्—नो रागांगारसंगो न मदनमदिरा न द्विषद्वेषदोषो, नो सम्मोहप्ररोहो न विकटकपटाटोपसम्पच्च यस्य । शान्तः कान्तस्त्रिलोकीकलनकुशलवित् कोऽपि कोपादिमुक्तस्त्यक्तः संसारपाशैः स भवति भविनां देवता दैवयोगात् ॥ ५ ॥ शृङ्गारप्रगुणाङ्गवानपि सदा शृङ्गारिणीमानपि, त्रस्यत्छात्रवशस्त्रवानपि महानाद्यक्रियावानपि । रोहन्मोहनिवेदकाक्षवलयव्यापारवानप्यहो, देवश्चेन्न तदा कथं नरपशुः कश्चिद्भवेद्देवता ॥ ६ ॥ तथा—या पशुर्गुथमश्नाति, स्वपुत्रं च वृषस्यति । शृङ्गाद्यैर्निघ्नती जन्तून्, सा वन्द्यास्तु कथं नु गौः ॥ ७ ॥ पयःप्रदानसामर्थ्याद्वन्द्या चेन्महिषी न किम् । विशेषो दृश्यते नास्या, महिषीतो मनागपि ॥ ८ ॥ स्थानं तीर्थर्षिदेवानां, सर्वेषामपि गौर्यदि । हन्यते दुह्यते विक्रीयते वा सा कथं ततः ॥ ९ ॥ मुसलोदूखले चुल्ली देहली पिप्पलो जलं । निम्बोऽर्कश्चापि यैः प्रोक्ता, देवास्तैः कोऽत्र वर्जिताः ॥ १० ॥ गुरु तदाभासयोस्तु स्वरूपम्—ज्ञानदर्शनचारित्र-रूपरत्नत्रयान्विताः समितीन् पञ्च बिभ्राणा, गुप्तित्रितयशालिनः ॥११॥ महाव्रतमहाभार-धारणैकधुरन्धराः । परीषहोपसर्गारिचमूजयमहाभटाः ॥ १२ ॥ निर्ममत्वाः शरीरेऽपि, किमुताऽन्येषु वस्तुषु । धर्मो-

पकरणं मुक्त्वा, परित्यक्तपरिग्रहाः ॥ १३ ॥ मानाऽपमानयोर्लाभाऽलाभयोः सुखदुःखयोः । प्रशंसानिन्दयोर्हर्षशोकयोस्तुल्यवृत्तयः ॥ १४ ॥ कृतकारिताऽनुमतिप्रभेदारम्भवर्जिताः । मोक्षैकतानमनसो, गुरवः स्युः कृतात्मनाम् ॥ १५ ॥ प्राणिप्राणाऽपहरणा, मृषावादपरायणाः । परस्वहरणोद्युक्ताः, प्रकामं कामगर्दभाः ॥ १६ ॥ परिग्रहाऽऽरम्भरता, न सन्तुष्टाः कदाचन । मांसाऽशिनो मद्यरताः, कोपनाः कलहप्रियाः ॥ १७ ॥ कुशास्त्रमात्रपाठेन, सदा पण्डितमानिनः । तत्त्वतो नास्तिकाः पापाः, पाप्मिनां गुरवस्तु ते ॥१८॥ तथा हि—शिष्यस्यास्ति परिग्रहेऽ गृहमप्याप्नोति नैतद् गुरुस्तुङ्गागारवराग्रहारनगरक्षेत्रेषु तृष्णाच्छिदाम् । शिष्यस्य प्रमदाऽपि नैव बहवः कान्ताः पुनस्तद्गुरोर्द्धिग्मोहस्य विजृम्भितं नटयति स्वैरं यदेवं नरान् ॥ १९ ॥ धर्म्माधर्मस्वरूपं चैतत्—अहिंसालक्षणो धर्म्मः, सम्यक्त्वादिक्षमादिमान् । देवेन वीतरागेण, दर्शितः कुर्वता स्वयम् ॥ २० ॥ एतस्माद्वैपरीत्येन, मिथ्यादृग्भिरुपासितः । अधर्मः प्रोच्यते दुर्गदुर्गतिप्रणयैकभूः ॥ २१ ॥ उक्तं च केनापि—रागी देवो दोसी देवो भा(मा)मिसुन्नंपि देवो, मज्जे धम्मो मंसे धम्मो जीवहिंसाए धम्मो । रत्ता मत्ता कंता सत्ता जे गुरु ते वि पुज्जा, हा हा कट्ठं नट्ठो लोओ अट्टमट्टं कुणंतो ॥ २२ ॥ २७१ ॥

तदनया गाथयाऽऽक्षेपमोक्षसाधकयोर्ज्ञानचारित्रयोः सम्यक्त्वे सत्येव भावात्तस्य प्राधान्यमुक्तं, मोक्षसाधकत्वे तु त्रितयमपि व्याप्रियत इत्याह—

**सुपरिच्छियसम्मत्तो, नाणेणालोइयऽत्थसब्भावो । निव्वणचरणाउत्तो, इच्छियमत्थं पसाहेइ ॥ २७२ ॥**

**जह मूलताणए पंडुरम्मि दुव्वणरागवण्णेहिं । बीभच्छा पडसोहा, इय सम्मत्तं पमाएहिं ॥ २७३ ॥**

'सुपरिच्छितं'–सुनिर्मलं सम्यक्त्वं यस्य स तथा ॥ 'सुपरिच्छितं'–सुष्ठु परिच्छेदेन दोषेभ्यः समन्ताद्विच्छेदेन स्थापितं 'छो च्छेदने' इति धातोः सिद्धत्वात् । 'निव्वण' त्ति [1]निरतिचारतोक्ता । ईप्सितमर्थं मोक्षलक्षणं प्रसाधयति । सुनिर्म्मलत्वं च

---

[1] निरतिचारचारित्रोपेतः ।

सम्यक्त्वस्य प्रमादपरिहारे सत्येव स्यान्नान्यथेत्याह—" जह मूल " गाहा। यथा मूलतानके विशुद्धेऽपि पश्चात्प्रक्षिप्यमाणैर्दूष्टच्छायरागयुक्तवर्णकैर्वानकै[1] र्बीभत्सा पटशोभा भवत्येवं मूले शुद्धमपि लब्धं सम्यक्त्वं प्रमादैः कषायादिभिः पश्चान्मलिनतां यातीति ॥२७३॥

निमेषमात्रमपि प्रमादो हेयः।

किंच सम्यक्त्वे प्रमादिनो गाढमप्रेक्षापूर्वकारिता स्वल्पेन बहोर्हारितत्वात्। सम्यग्दृष्टेर्हि नियमतो वैमानिकायुष्कबन्धहेतुत्वमुक्तमागमे, तच्च तत्र प्रमादिना हारितमेव भवति॥ यतः—

**नरएसु सुरवरेसु य, जो बंधइ सागरोवमं इक्कं। पलिओवमाण बंधइ, कोडिसहस्साणि दिवसेण ॥ २७४ ॥**

मिथ्यादृष्टिर्नरकेषु सम्यग्दृष्टिश्च सुरवरेषु देवलोकेष्वित्यर्थः। यो बध्नाति मध्यमवृत्त्या सागरोपममेकं, तस्य यदि कल्पनया वर्षशतरूपपुरुषायुष्कदिवसैर्भागो दीयते तदा दिवसेनाऽसौ पल्योपमानां कोटिसहस्राणि त्रीणी न्यूनानि भाग लब्ध्वा निबध्नाति, किल सागरोपमे पल्योपमानां दश कोटीकोट्या भवन्ति, एककाद्ग्रे पञ्चदशभिः शून्यैः। तासां पुरुषायुष्कदिवसैः षट्त्रिंशत्सहस्रैर्भागे लब्धं द्वे पल्योपमकोटीनां सहस्रे सप्त शतानि सप्तसप्ततिः। पल्योपमानां कोट्यः सप्त सप्ततिर्लक्षाः सप्तसप्ततिः सहस्राणि सप्त शतानि सप्तसप्तत्यधिकानि। छेद्यांशयोस्समशून्यपाते चतुर्भिरपवर्त्ते सप्त च नव भागाः पल्योपमस्य स्युः। अङ्कतोऽपि २७७७७७७७७७७७ 7/9 ॥ २७४ ॥ सम्प्रत्यल्पतरं शुभाशुभबन्धमधिकृत्याह—

**पलिओवमसंखिज्जं, भागं जो बंधई सुरगणेसु। दिवसे दिवसे बंधइ, स वासकोडी असंखिज्जा ॥ २७५ ॥**
**एस कमो नरएसुऽवि, बुहेण नाऊण नाम एयंपि। धम्मम्मि कह पमाओ, निमेसमित्तं पि कायव्वो ॥ २७६ ॥**

सुराणां गणा येषु ते तथा तेषु स्वर्गेष्वित्यर्थः। असंख्येयवर्षकोट्यात्मकस्य पल्योपमसंख्येयभागस्य पुरुषायुषेण षट्त्रिंशत्सह-

१ 'वानकैः' इतिपाठः C. D प्रतौ नास्ति।

ऽदिवसात्मकेन भागेऽपहृते असंख्या एव वर्षकोट्यो भवन्ति । नरकेष्वप्येषैव वार्त्ता । यदर्थमेतदुक्तं तदाह—' बुहेणेत्यादि ' नामेति ' प्रकाश्येऽव्ययम् । अतिप्रकटोऽयमर्थः । अयमभिप्रायः-यः सम्यक्त्वादिधर्मप्रधानबुद्धिः सौधर्मसुरेषु मध्यमवृत्त्या सागरोपममपि बध्नाति तस्य यद्यसत्कल्पनया पुरुषायुषदिनैर्भागो दीयते तदानीमेकस्य दिनस्य पल्योपमानां किंचिदूनानि त्रीणी कोटिसहस्राणि भागेनागच्छन्ति । निमेषस्यापि दिनभागानुसारेण पल्योपमकोट्यो भागे भवन्ति, ततोऽसौ प्रमादं कुर्वंस्तावतो महतो लाभादात्मानं वञ्चयति । दिनन्निमेषादिनैव नरकयोग्यमेतावदेवासद्वेद्यमर्जयति, ततः कथमात्मघातको न स्यात् ॥ २७६ ॥

ननु देवेषु कीदृशं सौख्यं कीदृशं वा नरकेषु दुःखं यत्र क्रमात् प्रमादेनाऽयं निवर्त्तमानः प्रवर्त्तमानश्च बाढमप्रेक्षापूर्वकारी स्यादिति गाथयोर्द्वयेन देवसुखं द्वयेन च नरकदुःखमाह—

**दिव्वालंकारविभूसणाइं रयणुज्जलाणि य घराइं । रूवं भोगसमुदओ, सुरलोगसमो कओ इहय ? ॥ २७७ ॥**
**देवाण देवलोए, जं सुक्खं तं नरो सुभणिओऽवि । न भणइ वाससएणऽवि, जस्सऽवि जीहासयं हुज्जा ॥ २७८ ॥**
**नरएसु जाइं अइकक्खडाइं दुक्खाइँ परमतिक्खाइँ । को वण्णेही ताइं ?, जीवंतो वासकोडीऽवि ॥ २७८ ॥**
**कक्खडदाहं सामलि, असिवण-वेयरणि-पहरणसएहिं । जा जायणाउ पावंति, नारया तं अहम्मफलं ॥ २८० ॥**

' अलङ्काराः '-सिंहासनश्छत्र-चामरादयः । ' भूषणानि '-मत्कुट-कटकादीनि । ' दिव्यानि '-प्रधानानि भवन्ति । ' सुभणिओ वि ' त्ति वचनकुशलोऽपि ॥ " नरएसु " गाहा । " कक्खड " गाहा । ' कक्खडदाहं ' ति तृतीयार्थे द्वितीया । ततः कर्कशदाहेन वज्रकण्टकशाल्मल्या असिपत्रवनेन वैतरण्या परमाधार्मिकप्रयुक्तप्रहरणैश्च यातनाः प्राप्नुवन्ति नारकास्तदधर्मस्य फलमिति ।

येरेषा(वा)दिवराहचारुचरितैः सद्यत्यनुष्ठानभूर्निर्मग्ना निविडप्रमादजलधावभ्युद्धृता तत्क्षणात् ।
ये तर्कागमकर्म्मलक्षणरहःशास्त्राणि चक्रुश्च तैः, पूज्यैः श्रीमुनिचन्द्रसूरिभिरपि प्रोक्तोऽयमर्थो यथा ॥ १ ॥

देवभवे-
सुख-नरके
दुःक्ख
हेतू ।

पञ्चेन्द्रियवधासक्ता, मांसाऽशनकृतादराः । जायन्ते नरके जीवा, बह्वारम्भपरिग्रहाः ॥१॥ कुम्भीपाकेन पच्यन्ते, पिष्टवन्नष्टचेतनाः । तत्र मुद्गादिवच्चैते, हन्यन्ते लगुडैर्दृढैः ॥ २ ॥ वज्रयन्त्रेषु पीड्यन्ते निपीड्यन्ते तिलेक्षुवत् । भ्राष्ट्रभूमीषु भृज्ज्यन्ते, निस्त्राणाश्चनकादिवत् ॥ ३ ॥ दारुवद्दारुणाकारै-श्छिद्यन्ते च परश्वधैः । भिद्यन्ते प्रासकुन्ताद्यैराखेटकमृगादिवत् ॥ ४ ॥ तप्तं त्रपु च पाप्यन्ते, आच्छोट्यन्ते शिलातले । आकीर्णाकण्टकैस्तीक्ष्णैरारोप्यन्ते च शाल्मलीम् ॥ ५ ॥ काककङ्कशृगालाद्यै-र्भक्ष्यन्तेऽत्यंतनिर्दयैः । कार्यन्ते तरणं रीणा, वैतरण्यां सुराधमैः ॥ ६ ॥ यस्य जीह्वाशतं वक्त्रे, यो जीवेच्छरदां शतम् । सोऽपि वक्तुं क्षमो न स्यादशर्मनरकेषु यद् ॥ ७ ॥ इति ॥ २८० ॥ न चान्यत्रापि संसारसुखमस्तीति तिर्यग्मनुष्यदेवगतिषु तिर्यग्गतिमाश्रित्य तावदाह—

**तिरिया कसंकुसारा-निवायवहबंधमारणसयाइं । नऽवि इहयं पावेंता, परत्थ जइ नियमिया हुंता ॥ २८१ ॥**

तिर्यग्गति दुःखम् ।

'जइ नियमिया हुंत' त्ति–यदि प्राग्भवे धर्म्मकर्म्मप्रवृत्त्यधर्मकर्मनिवृत्तिरूपनियमवन्तोऽभविष्यन् ॥ अत्राप्युक्तम्—कूटमानतुलावन्तो, मिथ्याभाषणतत्पराः । मायाविनो जना यान्ति, तैरिश्चं जन्म निश्चितम् ॥ ८ ॥ यादृशं नरके दुःखं, तिर्यक्ष्वपि च तादृशम् । यतो वाहनदोहाद्या, व्यापदोऽत्र सुदुस्तराः ॥ ९ ॥ क्षुत्तृष्णाबाधिता दीनाः, पारवश्यमुपागताः । वहन्ति पशवो भारं, पृष्ठकण्ठसमर्पितम् ॥ १० ॥ केचिद्दोहनदोषेण, दाहदोषेण केचन । केचिदंकुशघातेन कशाघातेन केचन ॥ ११ ॥ केचिद्वा घनबन्धेन, निरोधेन च केचन । कर्णपुच्छच्छविच्छेद-नाशावेधादिभिस्तथा ॥१२॥ अपारदुःखसंभार-मध्यमग्ना दिवानिशम् । साक्षादेवेह दृश्यन्ते, तिर्यञ्चो वञ्चिताः शुभैः ॥ १३ ॥ इति ॥ २८१ ॥ मनुष्यगतिमाश्रित्याह—

**आजीवसंकिलेसो, सुक्खं तुच्छं उवद्दवा बहुया । नीयजणासिट्ठणा वि य, अणिट्ठवासो अ माणुस्से ॥ २८२ ॥**
**चारगनिरोहवहबंध-रोगधणहरणमरणवसणाइं । मणसंतावो अजसो, विग्गोवणया य माणुस्से ॥ २८३ ॥**
**चिंतासंतावेहि य, दारिद्दरूआहिं दुप्पउत्ताहिं । लद्धूणऽवि माणुस्सं, मरंति केऽवि सुनिव्विण्णा ॥ २८४ ॥**

आजीवं-प्राणधारणं यावत्संक्लेशश्चित्तविबाधा । 'नीयजणसिट्ठणाविय' त्ति-प्राकृतलोकाक्रोशनं चेति । 'विग्गोवणया य' त्ति-विगोपना-नानारूपा विडम्बना । 'दारिद्दरुयाहिं' त्ति-दारिद्र्यरूपा रुजाः पीडा दारिद्र्यरुजने पुना रोगो रुजा शब्देन ग्राह्यो वह्-बंधरोग इत्यत्र रोगस्योक्तत्वात् ॥ 'दुप्पउत्ताहिं' ति-दुष्प्रयुक्ताभिः प्राक्तदुष्टकर्म्मजनिताभिरित्यर्थः, इदमप्युक्तम्—सामान्यदानदातार-स्तुच्छकोपादिकिल्बिषाः । लभन्ते मानुषं जन्म, जन्मिनो मध्यमैर्गुणैः ॥ १४ ॥ रौद्रदारिद्र्यतस्तत्र, मृतभावातिशायिनः । केचित्क-थंचिज्जीवन्ति, मानवा मानवर्जिताः ॥ १५ ॥ केचिन्निष्ठुरकुष्ठेन, सुष्ठु कष्टां दशां गताः । अन्ये ज्वरातिसारादि-रोगोरगविषातुराः ॥ १६ ॥ परकर्मकराः केचिन्मलिनाननलोचनाः । दृश्यन्ते क्लेशजलधौ, मग्ना नग्ना अनादृताः ॥ १७ ॥ अन्ये स्कन्धसमारूढ-प्रौढभारा दृढापदः । जीवन्त्यतिजघन्येन कर्म्मणा शर्मणोज्झिताः ॥ १८ ॥ ज्वलज्ज्वलनसंपर्क-कर्कशैर्विरहानलैः । केचित्तापितसर्वाङ्गा, ग्लायन्ति गलितोद्यमाः ॥ १९ ॥ इति ॥ २८४ ॥ देवगतिमाधिकृत्याह—

देवाऽवि देवलोए, दिव्वाभरणाणुरंजियसरीरा । जं परिवडंति तत्तो, तं दुक्खं दारुणं तेसिं ॥ २८५ ॥
तं सुरविमाणविभवं, चिंतिय चवणं च देवलोगाओ । अइबलियं चिय जं नवि, फुट्टइ सयसक्करं हिययं ॥ २८६ ॥
ईसाविसायमयकोह-मायालोभेहिं एवमाईहिं । देवाऽवि समभिभूया, तेसिं कत्तो सुहं नाम ? ॥ २८७ ॥

इदमप्युक्तम्—अकामनिर्ज्जरादिभ्यः, केचन स्युः सुरा अपि । तत्रापि न सुखख्यातिः, काचिदस्ति सतां मता ॥ २० ॥ वितु-द्यमानहृदया, ईर्ष्याशल्यैर्दूरुद्धरैः । विषादवह्निवह्ना(न्ना)य, पतन्ति बत केचन ॥ २१ ॥ कण्ठलोठितवादित्रा, हठतो कुण्ठतोऽपरे । रङ्गस्थानेव तार्यन्ते, दीर्यमाणाङ्गका इव ॥२२॥ स्तम्बेरमतुरङ्गादि-वाहनाकारधारिणः । दयाबाह्यं च वाह्यन्ते, केऽपि शृण्यादिघट्टनैः ॥ २३ ॥ चण्डालाकृतयः केचि-च्चण्डदण्डैर्निपीडिताः । स्वप्नेऽप्यलब्धसंचाराः, पुरन्दरसभादिषु ॥ २४ ॥ स्वर्गच्युतिं विलीनं च, गर्भजम्बाललोल(ढ)नम् । पश्यन्तो यन्न भिद्यन्ते, तद्वज्रतनवः सुराः ॥ २५ ॥ यथेह लवणाम्भोभिः, पूरितो लवणोदधिः । शारीर-मानसैर्दुःखै-रसंख्येयैस्तथा भवः ॥ २६ ॥ इति ॥ २८७ ॥

**धम्मपि नाम नाऊण, कीस पुरिसा सहंति पुरिसाणं ?। सामित्ते साहीणे, को नाम करिज्ज दासत्तं ? ॥ २८८ ॥**

एवंविधे च भवे सति—'सहंति' त्ति अनेकार्थत्वाद्धातूनां प्रतीक्षन्ते पुरुषाणां भवक्षयं कुर्वताम्। यदुत कुर्वन्तु तावदेते वयं पश्चात्तं करिष्यामः। ज्ञाततत्त्वानां न विलम्बितुं युक्तमित्यर्थः। तथाहि—स्वामित्वे स्वाधीने को नाम दासत्वं कुर्यात्? न कश्चित्। दास्यतुल्यं हि संसारित्वं कर्मपारतन्त्र्यात्। प्रभुत्वसमा तु मुक्तता स्वतन्त्रत्वात्, सा च हस्तगतैव सद्धर्मानुष्ठायिनामिति भावः। अथवा धर्म्ममपि ज्ञात्वा किमिति पुरुषाणामाज्ञादानादिकं क्षमन्ते धर्म्मानुष्ठानात् प्रभुत्वावाप्तेस्तत्रैव वरं यत्नो विधेयः॥ तथा चोक्तम्—"समसंख्याऽवयवः सन्, पुरुषः पुरुषं किमन्यमभ्येति। पुण्यैरधिकतरश्चेन्ननु सोऽपि करोतु तान्येव"॥ अत एवाह—'सामित्ते' इत्यादि॥ २८८॥ कः पुनः परप्रेष्यत्वं न सहते? य आसन्नसिद्धिपथो भवति। कथं ज्ञातव्यमित्याह—

**संसार चारएचारए व्व आवीलि(पीडि)यस्स बंधेहिं। उव्विग्गो जस्स मणो, सो किर आसन्नसिद्धिपहो ॥ २८९ ॥**
**आसन्नकालभवसिद्धियस्स जीवस्स लक्खणं इणमो। विसयसुहेसु न रज्जइ, सव्वत्थामेसु उज्जमइ ॥ २९० ॥**
**हुज्ज व न व(वि. नवि) देहबलं, धिइमइसत्तेण जइ न उज्जमसि। अच्छिहिसि चिरं कालं, बलं च कालं च सोअंतो ॥२९१॥**
**लद्धिल्लियं च बोहिं, अकरितोऽणागयं च पत्थितो। अन्नं दाइं बोहिं, लब्भिसि कयरेण मुल्लेण ? ॥ २९२ ॥**

चरणं चारः स एव चारकः संसारचारको भवभ्रमणमित्यर्थः। तस्मिंश्चारक इव बन्धनागार इव आपीडितस्य बद्धस्य बन्धै रज्ज्वादिजनितरन्यत्र कर्म्ममयैः। 'उव्विग्गो' इत्यादि व्यक्तम् ॥ २८९ ॥ 'आसन्न' गाहा॥ आसन्ने काले अचिरेण भवा भविष्यन्ती सिद्धिर्यस्य स तथा तस्य 'सव्वत्थामेसुत्ति' सर्वस्थानेषु चैत्यवन्दनानुष्ठानादिषु ॥ २९० ॥ ननु साम्प्रतं विशिष्टसंहनन-रहितैः कथमुद्यम्यत इति यो मन्यते तं प्रत्याह—'होज्ज व' गाहा। 'बलं च कालं च सोयंतो' बलं-शारीरम् कालं-दुःष-मालक्षणं शोचन्। न हि शोकेन किञ्चित् त्राणं, दैन्यवृद्धिरेव केवलमिति ॥ २९१ ॥ यत्तु जन्मान्तरे पुनर्बोधिलाभे सति शोभन-

बलकालादिसामग्र्यमवाप्तौ सदनुष्ठानं करिष्यामो, नाधुना शक्यत इति चिन्तयेत्तं शिक्षयितुमाह—'लद्धिल्लियं' ति लब्धां-प्राप्तां-'बोधिं' जिनधर्म्मप्राप्तिं 'दाइं' ति असूयायां निपातः। यद्वा अन्यामिदानीं परभवकाले कतरेण मूल्येन लप्स्यसे। इयमत्र भावना—बोधिलाभे सति तपःसंयमानुष्ठानपरस्य प्रेत्यवासनावशात् तत्प्रवृत्तिरेव बोधिलाभोऽभिधीयते तदनुष्ठानरहितस्य पुनर्वासनाभावात्कथं तत्प्रवृत्तिरिति बोधिलाभानुपपत्तिः। नन्वेवं सत्यस्य बोधिलाभस्यासंभव एवोपन्यस्तोऽनादौ संसारवासनाभावात्। नैवमनादिसंसारे राधावेधोपमानेनाऽनाभोगत एव कथंचित्कर्म्मक्षयस्तदवाप्तेः लब्धे तु नितरां यत्नो विधेय इत्यैदम्पर्यमस्येति ॥२९२॥

'वंदइ उभओ कालं पि चेइआइं' ॥२३०॥ इत्यतः स्थानादेस्तत् स्थानं यावत्प्रायेण प्राप्तश्रावकत्वस्योपदेशः प्रोक्तः। इत ऊर्ध्वं प्राप्तव्रतमुपदेक्ष्यति। तत्र ये प्राप्यापि व्रतं सुखशीलाः शठतया तत्र निरुद्यमाः स्युस्तेषां स्वरूपं सखेदमाह—

**संघयणकालबलदूसमारुयालंबणाइं घित्तूणं। सव्वं चिय नियमधुरं, निरुज्जमाओ पमुच्चंति ॥ २९३ ॥**
**कालस्स य परिहाणी, संयमजोगाइं नत्थि खित्ताइं। जयणाइ वट्टियव्वं, नहु जयणा भंजए अंगं ॥ २९४ ॥**

किं कुर्म्मो नास्ति शारीरशक्तिरूपं नः संहननं नायं कालो दुर्भिक्षत्वात्। नास्ति मानसं बलं धृतिरहितत्वात्। दुषमा च वर्त्तते क्लिष्टा चेयमाख्याता भगवता प्रागेव॥ रोगाक्रान्ता वयमित्याद्यालम्बनान्यलीकावष्टम्भानादाय सर्वामेव कर्त्तुं शक्यामपि नियमधुरां संयमभारोद्वहनलक्षणां निरुद्यमाः सन्तः 'ओ' इति निपातः खेदे प्रकर्षेण मुञ्चंति ॥ २९३ ॥ सोद्यमैस्तर्हि किं विधेयमित्याह—"कालस्स य" गाहा। कालस्यावसर्प्पिणीरूपस्य परिहाणिः—हीयमानता ततः संयमयोग्यानि न सन्ति अधुना क्षेत्राणि। ततो यतनया वर्त्तितव्यम्। न सर्वथा मुक्तधूर्द्धारणैर्भाव्यं, यतो न यतनासंयमस्याङ्ग—शरीरं कारणं वा भनक्ति। यदुक्तम्—" जयणा हु धम्मजणणी, जयणा धम्मस्स पालणी चेव। तव्वुड्ढिकरी जयणा, एगंतसुहावहा जयणा ॥ १ ॥" जयणाए वट्टमाणो, जीवो सम्मत्तनाणचरणाणं। सद्धा-बोहासेवण-भावेणाराहगो भणिओ ॥ २ ॥ २९४ ॥

संघयणकालादिहानिमनालम्ब्य यतनया वर्तितव्यम्।

समिईकसायगारव-इंदियमयबंभचेरगुत्तीसु । सज्झायविणयतवसत्तिओ अ जयणा सुविहियाणं ॥ २९५ ॥
जुगमित्तंतरदिट्ठी, पयं पयं चक्खुणा विसोहिंतो । अव्वक्खित्ताउत्तो, इरियासमिओ मुणी होई ॥ २९६ ॥
कज्जे भासइ भासं, अणवज्जमकारणे न भासइ य । विगहविसुत्तियपरिवज्जिओ अ जइ भासणासमिओ ॥ २९७ ॥
बायालमेसणाओ, भोयणदोसे य पंच सोहेइ । सो एसणाइसमिओ, आजीवी अन्नहा होइ ॥ २९८ ॥

किंगोचरा यतना यतिभिः कर्त्तव्येत्याह—'समितय'–ईर्याद्याः, 'कषायाः'–क्रोधाद्या 'गौरवाणि'–ऋद्ध्यादीनि 'इन्द्रियाणि'–स्पर्शनादीनि 'मद'–जात्यादयो 'ब्रह्मचर्य्यगुप्तयो'–वसत्याद्यास्तासु विषये यतना सुविहितानां कर्त्तव्यां। स्वाध्यायादींश्चाश्रित्यैषा कर्त्तव्या । स्वाध्यायो वा वाचनादिः, विनयोऽभ्युत्थानादिः, तपोऽनशनादिशक्तिश्चित्तोत्साहस्ताभ्यस्तत् ॥२९५॥ समितिद्वारे पञ्चापीर्य्या-समित्यादि समितीः क्रमेणाह—"जुग" गाहा । 'अव्वक्खित्ताउत्तो' त्ति अव्याक्षिप्तः शब्दादिषु रागद्वेषावगच्छन्नायुक्तो धर्मध्यानो-पयुक्तः सन् ॥ "कज्जे" गाहा ॥ 'विगहविसोत्तिय' 'परिवज्जिओ य' त्ति–विकथा–स्त्रीकथादिर्विश्रोतसिकादुष्टान्तर्जल्परूपा ताभ्यां परिवर्ज्जितश्च यतिर्भाषणासमितो भवति ॥ २९७ ॥ 'बायाल' गाहा । द्विचत्वारिंशतमेषणाः शोधयति–वर्ज्जयति एष्यते अन्विष्यते पिण्डो यकाभिस्ता एषणा आधाकर्मादिदोषाः सर्वे सामान्यव्युत्पत्त्या गृह्यन्ते ॥ तदुक्तम्—सोलसउग्गमदोसा, सोलस उप्पायणाए दोसा य । दस एसणाए दोसा, बायालीसं इय हवंति ॥ १ ॥ आहाकम्मुद्देसिय, पूइयकम्मे य मीसजाए य । ठवणा पाहुडियाए, पाउयरकीयपामिच्चे ॥ २ ॥ परियट्टिए अभिहडुभिन्नमालोहडे य अच्छिज्जे । अणिसट्ठे अज्झोयरए, सोलस पिंडुग्गमे दोसा ॥३॥ धाईदूइनिमित्ते, आजीववणीमगे तिगिच्छा य । कोहे माणे माया, लोभे य हवंति दस एए ॥ ४ ॥ पुव्विं पच्छा संथव, विज्जा मंते य चुन्नजोगे य । उप्पायणाए दोसा, सोलसमे मूलकम्मे य ॥ ५ ॥ संकियमक्खिनिक्खित्त–पिहियसाहरियदायगुम्मीसे । अप-रिणयलित्तछड्डिय, एसणदोसा दस हवंति ॥ ६ ॥ भोजनदोषांश्च पञ्च शोधयति ते चामी–संजोयणा पमाणे इंगाले धूमकारणे

चेवत्ति । तल्लक्षणं चेदम्—खीरीखंडाइयं संजोयइ भुंजए अइपमाणं । महुराईरागेणं, भुंजइ इयरं तु दोसेण ॥ ७ ॥ कारणं विना भुंजानस्य दोषाः ॥ कारणानि त्वमूनि–वेयणवेयावच्चे, इरियट्ठाए य संजमट्ठाए । तह पाणवत्तियाए, छट्ठं पुण धम्मचिंताए ॥८॥ स साधुरेषणायां समित इत्युच्यते । आजीव–लिङ्गोपजीवको वेषविडम्बकोऽन्यथा ॥ एतद्वैपरीत्ये भवति, गुणशून्यत्वादिति ॥२९८॥

**पुव्विं चक्खू परिक्खिय, पमज्जिउं जो ठवेइ गिण्हइ वा । आयाणभंडनिक्खेवणाइ समिओ मुणी होइ ॥ २९९ ॥**
**उच्चारपासवणखेलजल्लसिंघाणए य पाणविही । सुविवेइए पएसे, निसिरंतो होइ तस्समिओ ॥ ३०० ॥**

पूर्वं चक्षुषा परीक्ष्य प्रमृज्य च रजोहरणादिना यः स्थापयति गृह्णाति वा भाजनादि स भाण्डमात्राऽऽदाननिक्षेपणया समितो भवति । भाण्डशब्दोपादानं प्राकृतत्वात् । मात्रशब्दोऽत्रानुक्तो दृश्यस्तदूक्तौ गाथाभङ्गप्रसङ्गात् ॥ २९९ ॥ 'उच्चारः'–पुरीषं, 'प्रस्रवणं'–मूत्रं, 'खेलः'–श्लेष्मा, 'जल्लो'–देहमलः, 'सिङ्घानको' नासिकामलस्तान् पानविधिं–पानीयप्रकारं सुविवेचिते प्रदेशे निसृजन्–परिष्ठापयन् तत्समितः परिष्ठापनिकासमितो भवति ॥ ३०० ॥ गतं समितिद्वारमधुना कषायद्वारे प्रतिद्वारगाथामाह—

**कोहो माणो माया, लोभो हासो रई य अरई य । सोगो भय दुगुंछा, पच्चक्खकली इमे सव्वे ॥ ३०१ ॥**
**कोहो कलहो खारो, अवरुप्परमच्छरो अणुसओ अ । चंडत्तणमणुवसमो, तामसभावो अ संतावो ॥ ३०२ ॥**
**निच्छोडण निब्भंछण, निराणुवत्तित्तणं असंवासो । कयनासो अ असम्मं बंधइ घणचिक्कणं कम्मं ॥ ३०३ ॥**

अत्र क्रोधादयश्चत्वारः कषायाः प्रसिद्धा एव । हास्यादयोऽपि षड् नोकषायाः कषायसहचारित्वात्कषाया एव, एते च सर्वे साक्षात्कलयः कलहहेतुत्वात्, उपलक्षणं चैतत्सकलानर्थहेतुतायाः, साम्प्रतं 'तत्त्वपर्यायैर्व्याख्या' इति न्यायात् क्रोधैकार्थिकान्याह—"कोहो" गाहा ॥ "निच्छोडण" गाहा ॥ 'क्रोधः'–कलहः, क्षारः–परस्परमत्सरः अनुशयश्च । चण्डत्वमनुपशमस्ता-

मसभावः सन्तापश्च निश्छोटनं-निर्भर्त्सनं निरनुवर्त्तित्वमसंवासः । कृतनाशोऽसाम्यं च, एषु कलहशब्दप्रकारैरपिशब्दो यत्क्रोधस्याभिधानं तत्तेषां तत्कार्यत्वेन फले हेतूपचारात् । एतानि क्रोधकार्याण्याचरन् जीवोऽतिनिबिडं कर्म्म निबध्नाति ॥३०३॥ उक्तं च—

क्रोध-स्वरूपम् ।

" फलति कलिश्रेयःश्रेणीप्रसूनपरम्परः, प्रशमपयसा सिक्तो मुक्तिं तपश्चरणद्रुमः । यदि पुनरसौ प्रत्यासत्तिं प्रकोपहविर्भुजो, भजति लभते भस्मीभावं तदा विफलोदयः ॥ १ ॥ क्रोधः परितापकरः, सर्वस्योद्वेगकारकक्रोधः । वैरानुषङ्गजनकः, क्रोधः क्रोधः सुगतिहन्ता ॥ अर्जितं पूर्वकोट्या, यद्वर्षैरष्टभिरूनया तपस्तत्तत्क्षणादेव, दहति क्रोधपावकः " ॥ २ ॥ यो वैराग्यशमीपत्रपुटैः, शमरसोऽर्जितः । शाकपत्रपुटाभेन, क्रोधेनोत्सृज्यते स किम् ॥ ३ ॥ स्वस्य लोकद्वयोच्छित्त्यै, नाशाय स्वपरार्थयोः । धिगहो दधति क्रोधं, शरीरेषु शरीरिणः ॥ ४ ॥ क्रोधान्धाः पश्य निघ्नन्ति, पितरं मातरं गुरुम् । सुहृदं सोदरं दारानात्मानमपि निर्घृणाः ॥ ५ ॥ अपकारिजने कोपो, निरोद्धुं शक्यते कथम् । शक्यते सत्त्वमाहात्म्याद्यद्वा भावनयाऽनया ॥ ६ ॥ अङ्गीकृत्याऽऽत्मनः पापं, यो मां बाधितुमिच्छति । स्वकर्म्मनिहतायाऽस्मै, कः कुप्येद् बालिशोऽपि सन् ॥ ७ ॥ वधायोपस्थितेऽन्यस्मिन्, हसेद्विस्मितमानसः । वधो मत्कर्मसंसाध्यो, वृथा नृत्यति बालिशः ॥ ८ ॥ निहन्तुमुद्यते ध्यायेदायुषक्षय एष नः । तदसौ निर्भयः पापात्, करोति मृतमारणम् ॥ ९ ॥ सर्वपुरुषार्थचौरे, कोपः कोपे न चेत्तव । धिक्त्वां स्वल्पाऽपराधेऽपि, परे कोपपरायणम् ॥ १० ॥ सर्वेन्द्रियग्लानिकरं विजेतुं, कोपं प्रसर्पन्तमिवोग्रसर्प्पम् । विद्यां सुधीर्जाङ्गुलिकीमिवानवद्यां क्षमां सन्ततमाश्री(द्रि)येत ॥ ११ ॥

**माणो मयऽहंकारो, परपरिवाओ अ अत्तउक्करिसो । परपरिभवोऽवि य तहा, परस्स निंदा असूआ य ॥ ३०४ ॥**

**हीला निरुवयारित्तणं निरवणामया अविणओ अ । परगुणपच्छायणया, जीवं पाडंति संसारे ॥ ३०५ ॥ युग्मं**

मानपर्यायानाह—मनो-मदोऽहङ्कारः-परपरिवाद-आत्मोत्कर्षः-परपरिभवोऽपि च तथा परस्य निन्दा असूया च ॥ ३९४ ॥ हीला निरुपकारित्वं निरवनामता अविनयश्चापरगुणप्रच्छादनता । अत्रापि परपरिवादादीनि कानिचिन्मानकार्यत्वान्मानशब्देनाऽभिधी-

यन्ते । एतान्यपि क्रियमाणानि संसारे जीवं पातयन्ति ॥ ३०५ ॥ तदुक्तम्—शमालानं भञ्जन् विमलमतिनाडीं विघटयन्, किरन्दुर्वाक्पांसूत्करमगणयन्नागमसृणिम् । भ्रमन्नुर्व्यां स्वैरं विनयवनवीथीं विदलयन्, जनः कं नानर्थं जनयति मदान्धो द्विप इव ॥ १२ ॥ श्रुतशीलविनयसंदूषणस्य धर्मार्थकामविघ्नस्य । मानस्य कोऽवकाशं, मुहूर्त्तमपि पण्डितो दद्यात् ॥ १३ ॥ [1]सुधीस्तुङ्गोऽपि शाखीव, पात्यते ख(कु)लवीचिभिः । नीचोऽपि निर्वहत्येव, वैतसीं वृत्तिमाश्रितः ॥ १४ ॥ तस्मात्—सर्वत्र मार्दवं कुर्यात्, पूज्येषु तु विशेषतः । येन पापाद्विमुच्येत[2], पूज्यपूजाव्यतिक्रमात्[3] ॥ १५ ॥ मानाद् बाहुबलिर्बद्धो, लताभिरिव पाप्मभिः । मार्दवात्तत्क्षणं मुक्तः, सद्यः संप्राप केवलम् ॥ १६ ॥ चक्रवर्त्ती त्यक्तसंगो, वैरिणामपि वेश्मसु । भिक्षार्थं यात्याहो मान-च्छेदायाऽमृदुमार्दवम् ॥ १७ ॥ चक्रवर्त्त्यपि तत्काल-दीक्षितो रङ्कसाधवे । नमस्यति त्यक्तमान-श्चिरं च वरिवस्यति ॥ १८ ॥ एवं च मानविषयं परिमृष्य दोषं, ज्ञात्वा च मार्दवनिषेवणजं गुणौघम् । मानं विहाय यतिधर्मविशेषरूपं, सद्यः समश्रायत मार्दवमेकतानाः ॥ १९ ॥

**माया कुडंग पच्छन्न-पावया कूडकवडवंचणया । सव्वत्थ असब्भावो, परनिक्खेवावहारो अ ॥ ३०६ ॥**
**छल छोम संवइयरो, गूढायारत्तणं मई कुटिला । वीसंभघायणंपि य, भवकोडिसएसु वि नडंति ॥ ३०७ ॥ युग्मं**

मायापर्यायानाह—माया-कुडंगी-प्रच्छन्नपापता-कूटं-कपटो-वञ्चनता-सर्वत्रासद्भावः-परनिक्षेपापहारश्च ॥ ३०६ ॥ छलं-छद्म-संव्यतिकरो-गूढाचारत्वं-मतिः कुटिला-विश्रम्भघातनमपि । अत्रापि प्रच्छन्नपापताप्रकाराणि मायानामानि कार्यद्वारेणैव प्राग्वद् ज्ञेयानि ॥ ३०७ ॥ एतानि च भवकोटिशतेषु जीवान् विडम्बयन्ति । उक्तं च—

मुग्धप्रतारणपरायणमुज्जिहीते, यत्पाटवं कपटलम्पटचित्तवृत्तेः । जीर्यत्युपप्लवमवश्यमिहाप्यकृत्वा, नापथ्यभोजनमिवामयमायतौ तत् ॥ २० ॥ मायाशीलः पुरुषो, यद्यपि न करोति किंचिदपराधम् । सर्प इवाविश्वास्यो, भवति तथा ह्यात्मदोषहतः ॥ २१ ॥

१ स्तब्धस्तु B. स्व. २ स्तब्धं सो D. २ विशुद्ध्येत C. ३ न् C.

कूटषाड्गुण्ययोगेन—च्छलाद्विश्वस्तघातनात् । अर्थलोभाच्च राजानो, वञ्चयन्त्यखिलं जगत् ॥ २२ ॥ तिलकैर्मुद्रया मन्त्रैः, क्षामतादर्शनेन च । अन्तःशून्या बहिःसारा, वञ्चयन्तो(न्ते)द्विजा जनम् ॥ २३ ॥ कूटाः कूटतुलामाना, सुक्रियासु सातियोगतः । वञ्चयन्ते जनं मुग्धं, मायाभाजो वणिग्जनाः ॥ २४ ॥ जटामौण्ड्य–शिखाभस्म–वल्कनाग्न्यादिधारणैः । मुग्धं श्राद्धं गर्द्धयन्ते, पाषण्डा हृदि नास्तिकाः ॥ २५ ॥ अरक्ताभिर्भावहाव–लीलागतिविलोकनैः । कामिनो रञ्जयन्तीभि–र्वेश्याभिर्वञ्च्यते जगत् ॥ २६ ॥ तदेवं सर्वलोकोऽपि, परवञ्चकतापराः । स्वस्य धर्मं सद्गतिं च, नाशयन्तः स्ववञ्चकाः ॥ २७ ॥ आर्जवं सरलः पन्था, लोकोऽपि प्रीतिकारणम् । कुटिलादुद्विजन्ते हि, जन्तवः पन्नगादिव ॥ २८ ॥ अजिह्मचित्तवृत्तीनां, भववासस्पृशामपि । अकृत्रिमं मुक्तिसुखं, स्वसंवेद्यं महात्मनाम् ॥ २९ ॥ समग्रविद्यावैदुष्येऽधिगतासु कलासु च । धन्यानामुपजायते, बालकानामिवार्जवम् ॥ ३० ॥ अज्ञानामपि बालानामार्जवं प्रीतिहेतवे । किं पुनः सर्वशास्त्रार्थ–परिनिष्ठितचेतसाम् ॥ ३१ ॥ स्वाभाविकी हि ऋजुता, कृत्रिमा कुटिलात्मता । ततः स्वाभाविकं धर्मं, हित्वा कः कृत्रिमं श्रयेत् ॥ ३२ ॥ मनसि वचसि काये सर्वथैवं प्रकारस्तदपि सरलवृत्तिर्वन्द्यते नन्द्यते च । मनसि वचसि काये त्यक्तवान् पौनरुक्त्यं, तदपि कुटिलवृत्तिर्वर्ज्यते तर्ज्यते च ॥ ३३ ॥ इति निगदितमुग्रं कर्मकौटिल्यभाजामृजुपरिणतिभाजां चानवद्यं चरित्रम् । तदुभयमपि बुद्ध्या संस्पृशन्मुक्तिकामो, निरुपममृजुभावं संश्रयेद्बुद्धबुद्धिः ॥ ३४ ॥

**लोभो अइसंचयसीलया य किलिट्ठत्तणं अइममत्तं । कप्पन्नमपरिभोगो, नट्ठविनट्ठे य आगल्लं ॥ ३०८ ॥**
**मुच्छा अइबहुधणलोभया य तब्भावभावणा य सया । बोलंति महाघोरे, जरमरणमहासमुद्दंमि ॥ ३०९ ॥ युग्मं**

लोभपर्यायानाह——लोभः–अतिसंचयशीलता, क्लिष्टत्वमतिममत्वम्, कार्पण्यमपरिभोगो यद्वा कल्प्यमुपभोगार्हं यदन्नं तस्य तृष्णातिरेकादपरिभोगः । नष्टविनष्टे च क्वचिद्वस्तुनि मूर्च्छातिरेकादाकल्यं मान्द्यम् ॥ ३०८ ॥ मूर्च्छा–अतिबहुधनलोभता तद्भावभावना लोभभावनया गाढं चित्तरञ्जना च सदा । अतिसंचयशीलताप्रकाराणि लोभनामानि प्राग्वत् । एतानि च जरामरणमहासमुद्रे

जीवं बोलयन्ति ॥ ३०९ ॥ तथा चोक्तम्—यद्दुर्गामटवीमटन्ति विकटं क्रामन्ति देशान्तरं, गाहन्ते गहनं समुद्रमतनु क्लेशां कृषिं कुर्वते। सेवन्ते कृपणं पतिं गजघटासंघट्टदुःसञ्चरं, सर्प्पन्ति प्रधनं धनान्धितधियस्तल्लोभविस्फूर्जितम् ॥ ३५ ॥ सर्वविनाशाश्रयिणः, सर्वव्यसनैकराजमार्गस्य । लोभस्य को वशगतः, क्षणमपि दुःखान्तरमुपेयात् ॥ ३६ ॥ आरम्यते पूरयितुं, लोभगर्त्तो यथा यथा । तथा तथा महच्चित्रं, मुहुरेष विवर्द्धते ॥ ३७ ॥ अपि नामैष पूर्यते, पयोभिः पयसां पतिः । न तु त्रैलोक्यराज्येऽपि, प्राप्ते लोभः प्रपूर्यते ॥ ३८ ॥ लोभस्त्यक्तो यदि तदा, तपोभिरफलैरलम् । लोभस्त्यक्तो भवेत्तर्हि, तपोभिरफलैरलम् ॥ ३९ ॥ मृदित्वा शास्त्रसर्वस्वं, मयैतदवधारितम् । लोभस्यैकस्य हानाय, प्रयतेत महामतिः ॥ ४० ॥ लोभज्वरः प्रभूतोऽपि, तस्य नश्यति निश्चितम् । सन्तोषाऽमृतपूर्णस्य, यस्य लीनं व्रते मनः ॥ ४१ ॥ यथा नृणां चक्रवर्त्ती, सुराणां पाकशासनः । तथा गुणानां सर्वेषां, सन्तोषः प्रवरो गुणः ॥ ४२ ॥ सन्तोषयुक्तस्य यतेरसन्तुष्टस्य चक्रिणः । तुलया सम्मितो मन्ये प्रकर्षः सुखदुःखयोः ॥ ४३ ॥ स्वाधीनं राज्यमुत्सृज्य, सन्तोषामृततृष्णया । निःसंगत्वं प्रपद्यन्ते, तत्क्षणाच्चक्रवर्त्तिनः ॥ ४४ ॥ यत्संतोषवतां सौख्यं, तृणसंस्तरशायिनाम् । क्व तत्सन्तोषवन्ध्यानां, तूलिकाशायिनामपि ॥ ४५ ॥ असन्तुष्टास्तृणायन्ते, धनिनोऽपीशिनां पुरः । ईशिनोऽपि तृणायन्ते, सन्तुष्टानां पुरःस्थिताः ॥ ४६ ॥ न तु तीव्रं तपःकर्म्म, कर्मनिर्मूलनं जगुः । सत्यं तदपि(त्र) सन्तोष-रहितं विफलं विदुः ॥ ४७ ॥ इति प्रत्यादेष्टुं सकलमपि लोभस्य ललितं, मयोक्तः सन्तोषः परमसुखसन्तोषसुभगः । कुरुध्वं लोभाग्निप्रसरपरितापं शमयितुं, तदस्मिन् सन्तोषामृतरसमये वेश्मनि रतिम् ॥ ४८ ॥

यस्तु महात्मा क्षमामार्द्दवार्जवसन्तोषैः क्रोधमानमायालोभान् निगृह्णीयात्तस्येह-परलोकयोरभ्युदयमाह—

**एएसु जो वट्टिज्जा (वट्टे), तेणं अप्पा जहट्ठिओ नाओ । मणुआण माणणिज्जो, देवाणवि देवयं हुज्जा ॥ ३१० ॥**
**जो भासुरं भुअंगं, पयंडदाढाविसं विघट्टेइ । तत्तो चिय तस्संतो रोसभुअंगोवमाणमिणं ॥ ३११ ॥**

जो आगलेइ मत्तं, कयंतकालोवमं वणगइंदं। सो तेणं चिय छुज्जइ, माणगइंदेण इत्थुवमा ॥ ३१२ ॥
विसवल्लिमहागहणं, जो पविसइ साणुवायफरिसविसं। सो अचिरेण विणस्सइ, माया विसवल्लिगहणसमा ॥ ३१३ ॥
घोरे भयागरे सागरम्मि तिमिमगरगाहपउरम्मि। जो पविसइ सो पविसइ, लोभमहासागरे भीमे ॥ ३१४ ॥
गुणदोसबहुविसेसं, पयं पयं जाणिऊण नीसेसं। दोसेसु जणो न विरज्जइ त्ति कम्माण अहिगारो ॥ ३१५ ॥

एतेषु-क्रोधादिषु, इहलोके-मनुजानां स माननीयश्चक्रवर्त्यादिः परलोके-देवानामपि दैवतमिन्द्रो भवेत् ॥ ३१० ॥ साम्प्रतं क्रोधादीनामेवोपमानचतुष्टयेनाऽपायहेतुतां गाथाचतुष्टयेनाह—" जो " गाहा। योऽनात्मज्ञः कश्चिद्धासुरं भुजंगं विघट्टयति-हस्तादिना चालयति। तस्य तत एव भुजंगादन्तो-विनाशः स्यात्। ' रोसभुयंगोवमाणमिणं ' ति रोषस्य भुजंगेनोपमैषा क्रोधमुदीरयंस्तथैव विनश्यतीत्यर्थः ॥ ३११ ॥ " जो आगलेइ गाहा ॥ 'आगलेइ'त्ति-आश्रयत्यधिरोहाय। कृतान्तस्य कालो मृत्युसमयस्तत्सदृशम्। ' छुज्जइ ' त्ति क्षुद्यते चूर्ण्णते। 'माण'त्ति-मानस्य गजेन्द्रोपमैषा। मानमप्याकलयंतेनेव प्रहण्यत इति ॥ " विसवल्लि " गाहा। ' साणुवायफरिसविसंति ' सह अनुवातेन वर्त्तते यत्तत्सानुवातं तादृशं स्पर्शविषं यत्र तत्तथा। स्पर्शगन्धाभ्यां यन्मारयतीत्यर्थः। ईदृशविषवल्लीसदृशीमायेति। " घोरे " गाहा-' लोहमहासागरे भीमे ' त्ति-महासागरवद्यो भीमो लोभस्तत्र प्रविशति ॥ ३१४ ॥ उक्तं च—एवं क्रोधो मानो, माया लोभश्च दुःखहेतुत्वात्। सत्त्वानां भवसंसार-दुर्गमार्गप्रणेतारः ॥ ४९ ॥ एवं क्रोधादिस्वरूपं निश्चित्याप्यकार्येभ्यो न निवर्त्तन्ते प्राणिनः कर्म्मपरतन्त्रत्वादाह च—" गुण " गाहा। गुणा-ज्ञानादयो, दोषाः क्रोधादयस्तेषां बहु यथाक्रमं मोक्षसंसारहेतुतया विशेषो यस्मिंस्तद्गुणदोषबहुविशेषं पदं सर्वमपि भगवदागमवचनं ज्ञात्वाऽपि, दोषेषु न विरज्यति जनो यत्सकर्मणामधिकारपारवश्यम् ॥ ३१५ ॥ यथा—

जानामि क्षणभंगुरं जगदिदं, जानामि तुच्छं सुखम्। जानामीन्द्रियवर्गमेनमखिलं, स्वार्थैकनिष्ठं सदा ॥ [illegible] ॥ जानामि स्फु-

रिताचिर(चल)द्युतिचलं, विस्फूर्जितं सम्पदाम् । नो जानामि तथापि कः पुनरसौ मोहस्य हेतुर्मम ॥ ५१ ॥ न केवलं दोषदर्शनेऽपि कर्मपारवश्याज्जनो न विरज्यते यावद्विशेषस्तत्रैव तत रज्यति ॥ यथा—आयुर्नीरतरंगभंगुरमिति ज्ञात्वा सुखेनासितं, लक्ष्मीः स्वप्नविनश्वरीति सततं भोगेषु बद्धा रतिः । अभ्रस्तम्बविडम्बियौवनमिति प्रेम्णाऽवगूढाः स्त्रियो, यैरेवात्र विमुच्यते भवरसात्तैरेव बद्धो जनः ॥ ५२ ॥ गुणदोषविशेषाविर्भावकं चागमपदं यथा—नाणं पगासयं सोहउ, तवो संजमो य गुत्तिकरो । तिन्हंपि समाओगे, मोक्खो जिणसासणे भणिओ ॥ ५३ ॥ इत्यादि । कोहो पीई पणासेइ, माणो विणयनासणो । माया मित्ताइं नासेइ, लोभो सव्वविणासणो ॥ ५४ ॥ इत्यादि च ॥ कषायद्वारे क्रोधादींश्चतुरोऽभिधाय हास्यादिनोकषायषट्कं गाथाषट्केनाह—

**अट्टहासकेली-किलत्तणं हासखिड्डजमगरूई । कंदप्पं उवहसणं, परस्स न करंति अणगारा ॥ ३१६ ॥**

अट्टहासो-वदनं प्रसार्य सशब्दं हसनं तदनगारा न कुर्वन्तीति सम्बन्धः । अन्यस्याप्युत्तमस्येदं नोचितं किं पुनः साधोः ॥ यदुक्तम्—" प्रकाशिताऽशेषनिजास्यरन्ध्रा, लघुत्वमायान्ति जडा हसन्तः । किंचिच्चलच्चारुकपोलमूलाः, सन्तो न दन्तानपि दर्शयन्ति ॥ ५५ ॥ केली च [1]सूरिसूया किलति क्रीडति यः स तथा तद्भावः केलीकिलत्वम् । हासखेट्टं नेत्रभ्रूविकारादिनाऽन्यस्य हासोत्पादनम् । यमकं व्याख्यानादौ ग्राम्यविस्मयोत्पादनाय सानुप्रासशब्दप्रयोगसूत्ररतिः । कन्दर्पः—कामोत्पादकवाक्प्रयोगः । परस्योपहसनं प्रतीतम् । हासविलासः सर्वोऽप्येषः ॥ ३१६ ॥ ( १ वस्तरिस्तया C. (च. ब) वस्तस्तया D. )

**साहूणं अप्परुई, ससरीरपलोअणा तवे अरई । सुत्थिअवन्नो अइपहरिसो य नत्थि सुसाहूणं ॥ ३१७ ॥**
**उव्वेयओ अ अरणामओ अ अरमंतिया य अरई य । कलिमलओ अ अणेगग्गया य कत्तो सुविहियाणं ? ॥ ३१८ ॥**
**सोगं संतावं अधिइं च मन्नुं च वेमणस्सं च । कारुन्नरुन्नभावं, न साहु धम्मम्मि इच्छंति ॥ ३१९ ॥**
**भयसंखोहविसाओ, मग्गविभेओ विभीसियाओ अ । परमग्गदंसणाणि य दढधम्माणं कओ हुंति ? ॥ ३२० ॥**

कुच्छा चिलीणमलसंकडेसु उव्वेयओ अणिट्ठेसु । चक्खुनियत्तणमसुभेसु नत्थि दव्वेसु दंताणं ॥ ३२१ ॥
एयंपि नाम नाऊण, मुज्झियव्वंति नूण जीवस्स । फेडेऊण न तीरइ, अइबलिओ कम्मसंघाओ ॥ ३२२ ॥

हे साधवो 'णमि'ति प्रत्यवधारयन्त्वात्मनि रुचिर्मा मे शीतं मा मे तापो भूयादित्यात्मवल्लभता । सा सुसाधूनां नास्तीति सम्बन्धः । स्वशरीरप्रलोकना राढ्याऽऽत्मतनुनिरीक्षणं नास्त्यत एव तपस्यरतिर्नास्ति । स्वतनुवर्णाद्युत्कर्षपरो हि न तपसि रज्यते । तथा सुस्थितोऽहमिति वर्ण्ण-आत्मश्लाघा नास्ति । अतिप्रहर्षश्च-महत्यपि लाभादिके हर्षहेतौ नास्ति, एतानि सर्वाणि रतिविजृम्भितानि ॥ " उव्वेयओ " गाहा उद्वेगको मनाग्धर्मधृतेश्चलनम् । ' अरणामओ ' त्ति देश्यारणरणकः । अरमन्तिका-धर्मध्याने अरममाणता । अरतिरसुखासिका । कलमलको-विषयलौल्यात्तदप्राप्तौ चित्तक्षोभः ॥ अत एव एनेकाग्रता च मनोऽव्यग्रता नास्ति सुसाधूनाम् । सर्वोऽपि ईदृक्प्रकारा अरतिः कार्यकारणभूता नास्त्येषामित्यर्थः ॥ " सोगं " गाहा । शोकः—स्वजनमरणादौ चित्तखेदः । सन्तापः—स एवाधिकतरः । अधृतिः-क्वचित् क्षेत्रादौ तद्वियोगतात्पर्यम् । मन्युः-शोकातिरेकाच्छ्रोतसां निरोधः । वैमनस्यम्-आत्मघातादिचिन्तनम् । कारुदितमीषद्रुदितं । रुदितभावो महता शब्देनाक्रन्दनम् । एतानि शोकतत्कार्यरूपाणि साधुधर्मे नेच्छन्ति तीर्थकरादयः ॥ " भय " गाहा । भयं-निःसत्त्वस्य चित्तवैक्लव्यम् । संक्षोभश्चौरादेस्त्रासः । विषादो-दैन्यम् । मार्गविभेदः-सिंहादिदर्शनान्मार्गत्यागः । विभीषिका-पिशाचादिकृता । परमार्गदर्शनानि भयादन्येषां मार्गकथनानि । एतानि भयतत्कार्यरूपाणि दृढधर्माणां कुतो भवंति ॥ " कुच्छा " गाहा । कुत्सा-निन्दा चिलीनमलसंकटेषु अशुच्यादिप्रचुरेषु द्रव्येष्विति सर्वत्र सम्बध्यते । उद्वेगकोऽनिष्टेषु मलक्लिन्नस्वदेहवस्त्रादिषु चक्षुर्निवर्त्तनमशुभेषु कृमिजलौल्बणश्च कलेवरादिषु नास्ति दन्तानां-वशीकृतेन्द्रियाणां साधूनाम् । कुत्सादीनां जुगुप्साप्रभवत्वात्तेषां च तद्रहितत्वात् ॥ " एयंपि " गाहा एतदनन्तरोक्तकषायनोकषायविग्रहोपदेशकं वचो ज्ञात्वाऽपि ' मुज्झियव्वं ' ति यन्मुह्यते मूढैर्भूयते, तन्नूनं निश्चितं जीवस्य स्फेटयितुं न तीर्यते न शक्यते यतोऽतीव बलिकः कर्मसंघातः । स हि ज्ञाततत्त्वमपि सत्त्वं बलादकार्ये प्रवर्त्तयतीति ॥ ३१७ तः-२२ ॥ गतं कषायद्वारमधुना गौरवद्वारं व्याचिख्यासुस्तावद्गौरववतः स्वरूपमाह—

**जह जह बहुस्सुओ सम्मओ अ सीसगणसंपरिवुडो अ । अविणिच्छिओ अ समए, तह तह सिद्धंतपडिणीओ ॥३२३॥**

यथा यथा बहुश्रुतः सम्मतश्च श्राद्धादीनां शिष्यैश्च परिकरितो भवति तथा तथा मोहात् ऋद्ध्यादिषु गृध्यन् सिद्धान्तप्रत्यनीको भवति तदुक्तवैपरीत्यकरणेन तल्लाघवापादनात् । अविनिश्चितश्च परमार्थेनासौ सिद्धान्ते ज्ञाततत्त्वस्य ऋद्धि-रस-सातगौरवेषु प्रतिबन्धाभावात् ॥ ३२३ ॥ साम्प्रतमृद्धिगौरवमधिकृत्याह—

**पवराइं वत्थपायासणोवगरणाइँ एस विभवो मे । अविय महाजणनेया, अहंति अह इड्ढिगारविओ ॥ ३२४ ॥**
**अरसं विरसं लूहं, जहोववन्नं च निच्छए भुत्तुं । निद्धाणि पेसलाणि य, मग्गइ रसगारवे गिद्धो ॥ ३२५ ॥**
**सुस्सूसई सरीरं, सयणासणवाहणापसंगपरो । सायागारवगुरुओ, दुक्खस्स न देइ अप्पाणं ॥ ३२६ ॥**
**तवकुलछायाभंसो, पंडिच्चप्फंसणा अणिट्ठपहो । वसणाणि रणमुहाणि य, इंदियवसगा अणुहवंति ॥ ३२७ ॥**
**सद्देसु न रंजिज्जा, रूवं दट्ठुं पुणो न इक्खिज्जा । गंधे रसे अ फासे, अमुच्छिओ उज्जमिज्ज मुणी ॥ ३२८ ॥**

प्रवराणि-उत्तमानि वस्त्रपात्रासनाद्युपकरणान्येष विभवः-समृद्धिर्मे । अपि च ' महाजननेता '-प्रधानलोकप्रभुरहमित्येवमृद्धिगौरविको भवति ॥ ३२४ ॥ रसगौरवमधिकृत्याह—" अरसं " गाहा । अरस-रसाभावात् । ' विरसं '-कटुतिक्तादिविरुद्धरसवत् । ' रूक्षं '-स्नेहरहितं वल्लादि । ' यथोपपन्नं '-अज्ञातोञ्छवृत्त्या सम्पन्नम् ॥ ३२५ ॥ सातगौरवमाश्रित्याह—" सुस्सूसई " गाहा । ' शुश्रूते '-संस्करोति शरीरम् । 'शयनासनाभ्यां'-तूलीमसुरकाभ्यामबाधनाप्रसंगः सौख्यव्याप्तिस्तत्परस्तन्निष्ठः ॥ ३२६ ॥ गतं गौरवद्वारमधुनेन्द्रियद्वारं व्याचिख्यासुस्तद्वशवर्त्तिनां तावद्दोषानाचष्टे—" तव " गाहा । तपः-कुल-च्छायानां भ्रंशो-विनाशः । पाण्डित्यस्य स्पर्शना-मालिन्यम् । अनिष्ट(त्यः) संसारस्तस्य पन्था-मार्गः । इन्द्रियवशगानामेते स्युः । तथैते व्यसनादीनि चानुभवन्तीति ॥३२७॥ यदीन्द्रियवशगानाममी दोषास्तर्हि किं कर्त्तव्यमित्याह—" सद्देसु " गाहा । शब्देषु वेणुवीणादीनां न रज्येत । रूपं कमनीयमालोक्य

कथंचित्पुनस्तदीक्षणलोलतया न वीक्षेत, गन्धे रसे स्पर्शे च शुभेऽमूर्च्छितो गृद्धः सन्नुद्यच्छेत् स्वानुष्ठानोद्यमं कुर्यात् उपलक्षणं चैतद् द्वेषस्य। अशुभशब्दरूपादिषु चाद्विष्ट उद्यच्छेदित्यपि द्रष्टव्यम् ॥ ३२८ ॥ अन्यच्च



निहयाणि ऽहयाणि य इंदिआणि घाएहऽणं पयत्तेणं। अहियत्थे निहयाइं, हियकज्जे पूयणिज्जाइं ॥ ३२९ ॥

निहताश्च अनिहताश्च निहतानिहताः। तत्र निहता विषयाऽभिलाषे सत्यपीन्द्रियार्थाऽसम्प्राप्त्या जीवन्मृतमिवात्मानं मन्यमानाः। अन्ये तु तत् सम्प्राप्त्या सुस्थितंमन्या अनिहतास्तेषामुभयेषामपि सम्बोधनं हे निहताऽनिहता जीवा! निजेन्द्रियाणि प्रयत्नेन-प्रकृष्टोत्साहेन घातयत, विषयाभिष्वंगात्प्रवर्त्तमानानां प्रतिरोधाज्जीवन्मृतानि कुरुध्वं 'ण' मिति वाक्यालङ्कारे। यतोऽहितार्थे रागद्वेषोत्पादने निहतान्येव जीवन्मृतीकृतानि, हितकार्ये च भगवदागमश्रवण-जिनबिम्बावलोकनादौ लुप्ताकारनिहतशब्दस्यावर्त्तनादनिहतानि सोत्साहं प्रवर्त्तमानानि तानि पूजनीयानि भवन्ति। तद्वतां पूज्यत्वादिन्द्रियाण्यपि पूजनीयान्युच्यन्ते। अत्र श्रीसिद्धव्याख्यात्राऽन्ये चत्वारोऽर्था व्याख्यातास्ते च तत एव विशेषार्थिभिरवधार्याः। तथा च निहतानिहतेन्द्रियार्थे सूक्तयः—

दिवसरजनीसारैः सारितं पक्षगेहं, समयफलकमेतन्मण्डितं भूतधात्र्याम्। इह हि जयति कश्चिन्मोक्षमक्षैर्विधेयैरधिगतमपि चान्ये विप्लुतैर्हारयन्ति ॥ १ ॥ अनिर्जितेन्द्रियग्रामो, यतो दुःखैः प्रबाध्यते। तस्माज्जयेदिन्द्रियाणि, सर्वदुःखप्रमुक्तये ॥ २ ॥ न चेन्द्रियाणां विजयः, सर्वथैवाप्रवर्त्तनम्। रागद्वेषविमुक्त्या तु, प्रवृत्तिरपि तज्जयः ॥ ३ ॥ अशक्यो विषयोऽस्प्रष्टुमिन्द्रियैः स्वसमीपगः। रागद्वेषौ पुनस्तत्र, मतिमान् परिवर्जयेत् ॥ ४ ॥ हताहतानीन्द्रियाणि, सदा संयमयोगिनाम्। अहतानि हितार्थेषु, हतान्यहितवस्तुषु ॥ ५ ॥ जितान्यक्षाणि मोक्षाय, संसारायाऽजितानि तु। तदेतदन्तरं ज्ञात्वा, यद्युक्तं तत्समाचर ॥ ६ ॥ कोऽपि नास्तीह विषयो, मनोज्ञ इतरोऽपि वा। यदिन्द्रियैर्नोपयुक्तस्तत्स्वास्थ्यं किं न सिध्यते ॥ ७ ॥ शुभा अप्यशुभायन्ते, शुभायन्तेऽशुभा अपि। विषयास्तत्तु रज्येत, विरज्येत क्व चेन्द्रियैः ॥ ८ ॥ स एव रुच्यो द्वेष्यो वा, विषयो यदि हेतुतः। शुभाशुभत्वं भावानां, तन्न तत्त्वेन

जातुचित् ॥ ९ ॥ एवं विमृश्य विषयेषु शुभाशुभत्वमौपाधिकं तदधिमुक्तिविरक्तचेताः । भूतेन्द्रियार्थमधिकृत्य जहीहि रागं द्वेषं तथेन्द्रियजयाय कृतोऽभिलाषः ॥ ३२९ ॥ गतमिन्द्रियद्वारमधुना मदद्वारमधिकृत्याह—

जाइकुलरूवबलसुअ-तवलाभिस्सरिय अट्ठमयमत्तो । एयाइ चिय बंधइ, असुहाइँ बहुं च संसारे ॥ ३३० ॥

'जाति'-र्ब्राह्मणादि, 'कुल'मुग्रादि, 'रूपं'-शरीरसौन्दर्यम्, 'बलं'-शक्तिः, 'श्रुत'मागमाधिगमः, 'तपोऽ'नशनादि 'लाभोऽ'-भीष्टवस्तुप्राप्तिः, 'ऐश्वर्यं'-सम्पदः प्रभुत्वम् तान्येवाष्टौ मदास्तैर्मत्तो-घूर्णितः प्राणी एतान्येव जात्यादीन्यशुभानि 'बहुं' ति बहुशोऽनन्तगुणानि बध्नाति-बहुषु जन्मसु हीनजात्यादिर्भवतीत्यर्थः । तदुक्तम्—जातिभेदाननेकविधानुत्तमाधममध्यमान् । दृष्ट्वा को नाम कुर्वीत, जातु जातिमदं सुधीः ॥ १ ॥ उत्तमां जातिमाप्नोति, हीनां चाप्नोति कर्मतः । तत्राऽशाश्वतिकीं जातिं, को नामाऽऽसाद्य माद्यतु ॥ २ ॥ अकुलीनानपि प्रेक्ष्य, प्रज्ञाश्रीशीलशालिनः । न कर्त्तव्यः कुलमदो, महाकुलभवैरपि ॥ ३ ॥ किं कुलेन कुशीलस्य, सुशीलस्यापि तेन किम् । एवं विदन् कुलमदं, विदध्यान्न विचक्षणः ॥ ४ ॥ सप्तधातुमये देहे, चयापचयधर्मणः । जरारुजाभिभाव्यस्य, को रूपस्य मदं वहेत् ॥ ५ ॥ सनत्कुमारस्य रूपं, तत्क्षयं च विचारयन् । को वा सकर्णः स्वप्नेऽपि, कुर्याद्रूपमदं किल ॥ ६ ॥ महाबलोऽपि रोगाद्यैरबलः क्रियते क्षणात् । इत्यनित्ये बले पुंसां, युक्तो बलमदः कथम् ॥ ७ ॥ बलवन्तोऽपि जरसि, मृत्यौ कर्मफलान्तरे । अबलाश्चेत्ततो हन्त, तेषां बलमदो मुधा ॥ ८ ॥ स्वबुद्ध्या रचितान्यन्यैः, शास्त्राण्याघ्राय लीलया । सर्वज्ञोऽस्मीति मदवान्, स्वकीयाङ्गानि खादति ॥ ९ ॥ श्रीमद्गणधरेन्द्राणां, श्रुत्वा ग्रहणधारणे । कः श्रयेत श्रुतमदं, सकर्णहृदयो जनः ॥ १० ॥ नाभेयस्य तपोनिष्ठां, श्रुत्वा वीरजिनस्य च । को नाम स्वल्पतपसि, स्वकीये मदमाश्रयेत् ॥ ११ ॥ येनैव तपसा त्रुट्येत्तरसा कर्मसंचयः । तेनैव मददिग्धेन, वर्द्धते कर्मसंचयः ॥ १२ ॥ अन्तरायक्षयादेव, लाभो भवति नान्यथा । ततश्च वस्तुतत्त्वज्ञो, न लाभमदमुद्वहेत् ॥ १३ ॥ परप्रसादशक्त्यादि-भवे लाभे महत्यपि । न लाभमदमृच्छन्ति, महात्मानः कथंचन ॥ १४ ॥ श्रुत्वा

त्रिभुवनैश्वर्य-सम्पदं वज्रधारिणः । पुरग्रामधनादीनामैश्वर्यं कीदृशो मदः ॥ १५ ॥ गुणोज्ज्वलादपि भ्रश्येद्दोषवन्तमपि श्रयेत् । कुशीलस्त्रीवदैश्वर्यं, न मदाय विवेकिनाम् ॥ १६ ॥

**जाईए उत्तमाए, कुले पहाणम्मि रूवमिस्सरियं । बलविज्जाय तवेण य, लाभमएणं च जो खिंसे ॥ ३३१ ॥**
**संसारमणवयग्गं, नीयट्ठाणाइं पावमाणो य । भमइ अणंतं कालं, तम्हा उ मए विवज्जिज्जा ॥ ३३२ ॥ युग्मं**
**सुट्ठुवि जई जयंतो, जाइमयाईसु मज्जई जो उ । सो मेअज्जरिसि जहा, हरिएसबलु व्व परिहाई ॥ ३३३ ॥**

'जात्या'–उत्तमया हेतुभूतया 'कुले प्रधाने' सति 'रूप'मैश्वर्यमाश्रित्य बलेन सह विद्या बलविद्या तया तपसा लाभमदेन च यो मन्दबुद्धिः 'खिंसे'त्ति परं हीलयेत् स संसारमित्यादि व्यक्तम् । 'अणवदग्गं' ति अलब्धपारम् ॥ किंच—"सुट्ठुवि" गाहा । मेतार्यहरिकेशबलौ हि जन्मान्तरविहितजातिमदोपार्जितकर्मपरिणतिवशादन्त्यजत्वे जाताविति प्रागुक्तमेव ॥ ३३१-३३२-३३३ ॥

गतं मदद्वारमधुना ब्रह्मचर्यगुप्तिद्वारमुरीकृत्याह—

**इत्थिपसुसंकिलिट्ठं, वसहिं इत्थीकहं च वज्जंतो । इत्थिजणसंनिसिज्जं, निरूवणं अंगुवंगाणं ॥ ३३४ ॥**
**पुव्वरयाणुस्सरणं, इत्थीजणविरहरूवविलवं च । अइबहुअं अइबहुसो, विवज्जयंतो अ आहारं ॥ ३३५ ॥**
**वज्जंतो अ विभूसं, जइज्ज (जुज्जइ) इह बंभचेरगुत्तीसु । साहू तिगुत्तिगुत्तो, निहुओ दंतो पसंतो अ ॥ ३३६ ॥**

**त्रिभिर्विशेसकम् ।**

अनेन गाथात्रयेण—वसहिकह निसिज्जिंदिय-कुड्डिंतरपुव्वकीलिए पणीए । अइमायाहारविभूसणा य नवबंभगुत्तीओ ॥ इत्येता नव ब्रह्मचर्यगुप्तयः क्रमेणाभिहिताः । 'इत्थिपसुसंकिलिट्ठं' ति–अनेन स्त्रीपशुपण्डकविवर्जिता शय्येति सूचितं स्त्रीपशुभिः संक्लिष्टां–

संकीर्णां वसतिं वर्जयन् यतेतेति सर्वत्र सम्बन्धः । स्त्रीकथां लाटी कर्णाद्यादिचेष्टानेपथ्यादिकथनम् । स्त्रीजनसन्निषद्यां तदुत्थानानन्तरं मुहूर्त्तान्तस्तदासनोपवेशनादिरूपं । निरूपणमङ्गोपाङ्गानां स्तनजघनादीनाम् । पूर्वरतानुस्मरणं गृहस्थावस्थाक्रीडितचिन्तनम् । स्त्रीजनविरहरुतविलापं च । कुड्यान्तरितस्त्रीजनस्य विरहे एकान्ते मोहनाशक्तौ क्षणितादिध्वनिं च । अतिबहुकं-मात्रातिरिक्तं अतिबहुशः प्रणीतरसोत्कटतया नानाकारम् । अनेन प्रणीतातिमात्राहाररूपे द्वे गुप्ती गृहीते । वर्जयन् विभूषां-शरीरसंस्काररूपाम् । इति नवसु ब्रह्मचर्यगुप्तिषु यतेत ॥ ३३६ ॥ ' निरूवणमंगुवंगाण'मित्यस्य नगरग्रामादौ स्त्रीणां सदा संभवाद्विशेषेण परिहार्यतामाह—

**गुज्झोरुवयणकक्खो-रुअंतरे तह थणंतरे दट्ठुं । साहरइ तओ दिट्ठिं, न य बंधइ दिट्ठिए दिट्ठिं ॥ ३३७ ॥**

गुह्योरुवदनकक्षोरसामन्तराण्यवकाशान् । नाभिः स्तनान्तराणि च दृष्ट्वा ततो दृष्टिं संहरेत् ॥ ३३७ ॥ यदुक्तं परमागमे—चित्तभित्तिं न निज्झाए, नारिं वा सुअलंकियं । भक्खरं पिव दट्ठूणं, दिट्ठिं दिट्ठि समाहरे ॥ १ ॥ हत्थपायपलिच्छिन्नं, कन्ननासविगप्पियं । अवि वाससयं नारिं, बंभयारी विवज्जए ॥ २ ॥ गतं ब्रह्मचर्यगुप्तिद्वारं, साम्प्रतं स्वाध्यायद्वारमाह—

**सज्झाएण पसत्थं, झाणं जाणइ य सव्वपरमत्थं । सज्झाए वट्टंतो खणे खणे जाइ वेरग्गं ॥ ३३८ ॥**
**उड्ढमहे(नरए)तिरियलोए, जोइसवेमाणिया य सिद्धी य । सव्वो लोगालोगो, सज्झायविउस्स पच्चक्खो ॥ ३३९ ॥**
**जो निच्चकाल तवसंजमुज्जओ नवि करेइ सज्झायं । अलसं सुहसीलजणं, नवि तं ठावेइ साहुपए ॥ ३४० ॥**

' प्रशस्तं ध्यानं ' धर्मशुक्लस्वरूपम् । कथं सर्वपरमार्थं जानातीत्याह—" उड्ढ " गाहा । ऊर्ध्वमधस्तिर्यग्रूपं लोकत्रयं प्रत्यक्षं तत्र स्थिताश्च नरक ज्योतिष्कवैमानिकसिद्धय(द्धि)श्च प्रत्यक्षाः । किं बहुना ' सव्वो ' इत्यादि प्रत्यक्ष इति तदुपयुक्तोऽसौ समस्तार्थान् साक्षादिव पश्यतीति भावार्थः ॥ ३३९ ॥ तथाहि—धर्मध्यानविधानमद्भुततमं शस्या तपस्याश्रतां, लोकालोकविलोकनव्यतिकरं हृद्युल्लसल्लोचनम् । जीवातुः प्रशमस्य मानसकपेः कालायसी शृङ्खला, स्वाध्यायः स्मरकुम्भिकुम्भकषणे वज्राङ्कुशो विश्रुतः ॥ १ ॥

ध्रूमस्तस्य गुणान् कति श्रुतपथे यस्यातिभक्तिर्भृशं, तं श्लाघेमहि यः शृणोति रभसात् स्फीतस्फुटत्कण्टकः। तस्मै नाम नमो नमोऽस्तु पठने कुण्ठोऽपि यस्तत्परः, पर्याप्तं न किमस्य यस्तदुदितं धत्ते विधत्ते तथा ॥ २ ॥ व्यतिरेकमाह—" जो " गाहा ॥ उक्तं च—यो गुरुः सदा तपः संयमोद्युक्तोऽपि स्वाध्यायं न करोति स तं स्वकीयमलसं सातलम्पटं च शिष्यवर्गं साधुपदे संयमोद्यमस्थाने नैव स्थापयति । स्वाध्यायमन्तरेण ज्ञानाभावात्स्वयमप्रमादिनाऽपि कथं परपरित्राणं कर्त्तुं शक्यमिति भावः ॥ ३४० ॥ गतं स्वाध्यायद्वारमधुना विनयद्वारमूरीकृत्याह—

**विणओ सासणे मूलं, विणीओ संजओ भवे। विणयाओ विप्पमुक्कस्स, कओ धम्मो कओ तवो? ॥ ३४१ ॥**

**विणओ आवहइ सिरिं, लहइ विणीओ जसं च कित्तिं च। न कयाइ दुव्विणीओ, सकज्जसिद्धिं समाणेइ ॥ ३४२ ॥**

उक्तं च—प्राहुर्दाहकमेव पावकमिव प्रायोऽविनीतं जनं, प्राप्नोत्येष कदाचनापि न खलु स्वेष्टार्थसिद्धिं क्वचित्। तस्मादीहितदानकल्पविटपिन्युल्लासिनिःश्रेयसः, श्रीसम्बन्धविधानधाम्नि विनये यत्नं विदध्याद्बुधः ॥ १ ॥ मूलं धर्मद्रूमस्य द्युपतिनरपति श्रीलताकन्दकल्पः, सौन्दर्याह्वानविद्या निखिलगुणनिधिर्वश्यतायोगचूर्णं । सिद्धाज्ञामन्त्रयन्त्राधिगममणिमहारोहणाद्रिः समस्तानर्थप्रत्यर्थि तन्त्रं त्रिजगति विनयः किं न किं साधु धत्ते ॥ २ ॥ गतं विनयद्वारमधुना तपोद्वारं तच्च कैश्चिद्दुःखरूपं प्रत्यपादि ततस्तन्निरासायाह—

**जह जह खमइ सरीरं, धुवजोगा जह जहा न हायंति। कम्मक्खओ अ विउलो, विवित्तया इंदियदमो अ ॥ ३४३ ॥**

" जह जह " गाहा। यथा यथा क्षमते शरीरं ध्रुवयोगा नित्यव्यापाराः प्रत्युपेक्षणादयो यथा न हीयंते—न सीदन्ति तथैव तपःकार्यमिति वाक्यशेषः। तदुक्तम्—' सो हु तवो कायव्वो ' इत्यादि । एवं चास्य कथं दुःखस्वरूपता शमसुखतृप्तानां योगिनां सुखात्मकस्यैव प्रसिद्धेः, क्षायोपशमिकत्वान्मनोबाधाविरहेण विधानाच्च । क्वचिदिषद्देहपीडाभावेऽपि व्याधिचिकित्सादृष्टान्तेन च मनःप्रमोदहेतुत्वात् ॥ एवं तपः कुर्वतां कर्मक्षयश्च विपुलो भवति। विविक्तता देहात् पार्थक्यभावनया । इन्द्रियदमश्चाक्षाणां निग्रह इति

॥ ३४३ ॥ तदुक्तम्—चक्रे तीर्थकरैः स्वयं निजगदे तैरेव तीर्थेश्वरश्रीहेतुर्भवहारितरुजं सन्निर्जराकारणम्। सद्यो विघ्नहरं हृषीकदमनं मंगल्यमिष्टार्थकृद्देवाकर्षणकारि दुष्टदलनं सर्वार्थसम्पत्प्रदम् ॥१॥ इत्यादिप्रथितप्रभावमवनीविख्यातसंख्याविदां, मुख्यैः ख्यापितमाशु शाश्वतसुखश्रीक्लृप्तपाणिग्रहम्। आशंसादिविमुक्तमुक्तविधिना श्रद्धाविशुद्धाशयैः, शक्तिव्यक्तिसुभक्तिरक्तिभिरभिध्येयं विधेयं तपः ॥ २ ॥ गतं तपोद्वारमधुना शक्तिद्वाराऽवसरस्तत्र शक्तिवैकल्यमालम्बनीकृत्य यः प्रमादं कुर्यात्तं शिक्षयितुमाह—

**जइ ता असक्कणिज्जं, न तरसि काऊण तो इमं कीस। अप्पायत्तं न कुणसि, संजमजयणं जई जोगं ? ॥ ३४४ ॥**
**जायम्मि देहसंदेहयम्मि जयणाइ किंचि सेविज्जा। अह पुण सज्जो अ निरुज्जमो अ तो संजमो कत्तो ? ॥ ३४५ ॥**
**मा कुणउ जइ तिगिच्छं, अहियासेऊण जइ तरइ सम्मं। अहियासिंतस्स पुणो, जइ से जोगा न हायंति ॥ ३४६ ॥**

यदि तावदशकनीयं भिक्षुप्रतिमामासकल्पादिकर्त्तुं न शक्नोषि तथाविधसंहननादिविकलत्वात्तत इमां किमित्यात्मायत्तां न करोषि संयमयतनामनन्तरोक्तां समित्यादिपदेषु यथाशक्ति विधेयप्रतिषेध्यविधानप्रतिषेधरूपां यतियोग्यां तपस्विनामुचिताम् ॥ ३४४ ॥ ननु चागमस्योत्सर्गापवादरूपत्वादपवादेन प्रमादं कुर्वतोऽपि को दोषः। नैवं, सम्यग्ज्ञाततत्त्वानामेवं जल्पनात्तथाहि—"जायंमि" गाहा। आगमोक्तनीत्याऽपवादपदापत्तावेव यतनया कदाचिदपवाद आसेवनीयो न पुनः सातलम्पटतया तदेव पुरस्कृत्य प्रवर्त्तनीयं विहितानुष्ठानेषु शक्तिं तोलयद्भिः प्रवर्त्तनीयमिति भावः ॥ ३४५ ॥ गतं शक्तिद्वारं तद्गतौ च व्याख्याता प्रस्तुतद्वारगाथेति। ननु यदि क्षमस्य शैथिल्ये संयमाभावो, ग्लानेन तर्हि किं कर्त्तव्यम्। उच्यते—संयमोद्यम एव कर्त्तव्यः। तत्किं चिकित्साऽपि न कर्त्तव्येति चेत्। एवमेतत् यत आह—"मा कुणउ" गाहा। 'जोगा न हायंति' त्ति–योगाः प्रत्युपेक्षणादिव्यापारा न हीयन्ते। तद्धा(हा)नौ तु चिकित्साऽपि यतनया क्रियत इत्यर्थः ॥ ३४६ ॥ यद्येवं तर्हि शेषसाधुभिस्तस्य किं विधेयमित्याशङ्क्य यस्य यत्कार्यं तदाह—

**निच्चं पवयणसोहाकराण चरणुज्जुआण साहूणं। संविग्गविहारीणं, सव्वपयत्तेण कायव्वं ॥ ३४७ ॥**

संविग्नानां प्रभाव-कत्वम् ।

हीणस्सऽवि सुद्धपरूवगस्स नाणाहियस्स कायव्वं । जणचित्तग्गहणत्थं, करिंति लिंगावसेसेऽवि ॥ ३४८ ॥
दगपाणं पुप्फफलं, अणेसणिज्जं गिहत्थकिच्चाइं । अजया पडिसेवंती, जइवेसविडंबगा नवरं ॥ ३४९ ॥
ओसन्नया अबोही, पवयणउब्भावणा य बोहिफलं । ओसन्नोऽवि वरं पिहु–पवयणउब्भावणापरमो ॥ ३५० ॥
गुणहीणो गुणरयणायरेसु जो कुणइ तुल्लमप्पाणं । सुतवस्सिणो अ हीलइ, सम्मत्तं कोमलं(पेलवं)तस्स ॥ ३५१ ॥

'संविग्गविहारिणं' त्ति-संविग्नं समोक्षाभिलाषं विहर्त्तुं शीलं येषां सर्वादरेण कर्त्तव्यं वैयावृत्यादिकमिति गम्यते ॥ ३४७ ॥ "हीणस्स वि" गाहा । हीनस्यापि चारित्रमाश्रित्य न्यूनस्यापि शुद्धप्ररूपकस्य यथावस्थितागमार्थव्याख्यानतत्परस्य ज्ञानाधिकस्य वैयावृत्त्यादिकमुचितं कर्त्तव्यम् ॥ अभ्युच्चयमाह—जनचित्तग्रहणार्थं लोकरञ्जनानिमित्तं मा भूत्प्रवचनमालिन्यमेतेऽपि परस्परं मत्सरिण इति प्रवादात्कुर्वन्ति लिङ्गावशेषेऽपि लिङ्गमात्रधारिणि पार्श्वस्थादावुचितमिति ॥ ३४८ ॥ किम्भूतास्तर्हि लिङ्गावशेषा भवन्तीत्याह— "दग" गाहा । दकस्य सचित्तोदकस्य एवं ये यतिवेषविडम्बकास्तेन तत्त्वतो यतयस्तद्गुणरहितत्वात् ॥ ३४९ ॥ तादृशां च तेषां दोषमाह—"ओसन्नया" गाहा । अवसन्नतया मन्दाचारचारितया अबोधिः प्रेत्य जिनधर्मस्य दुर्लभता तस्य स्यादन्येषां च तदाचारप्रशंसानिन्दापराणाम् । कुत एतत्–यतः प्रवचनोद्भावनयैव बोधिरूपफलं सुलभं स्यात्ततोऽवसन्नः कुत्सिताचारतया प्रवचनलाघवमुत्पादयन् कथं न दुर्लभबोधिः स्यात् ॥ तत्किमयं सर्वोऽपि दोषास्पद एव, नैवम्, यतः–अवसन्नोऽपि वरं गुणवान् यः स्वाचारनिन्दागर्हापरायणो वादव्याख्यानमन्त्रादिलब्धिमान् पृथुप्रवचनोद्भावनात् प्रधानः प्रभावकः स्यात् प्रत्यनीकोपशामककरवीरलतासाधुवत् ॥ ३५० ॥ एतद्व्यतिरेकमाह—"गुण" गाहा । 'सुतवस्सिणो य हीलइ' त्ति–मायाविनः खल्वेते लोकप्रतारका इत्यादिना लोकमध्ये निन्दति सम्यक्त्वमपि तस्य नास्तीत्यर्थः ॥ पेलवमसारं न किंचिदित्यर्थः ॥ ३५१ ॥ साधुभिर्यादृशस्यावसन्नस्य गृहस्थस्य च यद्विधेयं तदाह—

ओसन्नस्स गिहिस्स व, जिणपवयणतिव्वभावियमइस्स । कीरइ जं अणवज्जं, दढसम्मत्तस्सऽवत्थासु ॥ ३५२ ॥
पासत्थोसन्नकुसीलनीयसंसत्तजणमहाच्छंदं । नाऊण तं सुविहिया, सव्वपयत्तेण वज्जंति ॥ ३५३ ॥



'अवसन्नस्ये'ति शब्दव्युत्पत्त्याश्रयणात्पार्श्वस्थादेरपि ग्रहणम् । 'जं अणवज्जं' ति-यदुचितं तदेव कर्त्तव्यमित्यर्थः ॥ अवस्थासु-द्रव्यक्षेत्रकालभावापदादिषु कारणेषु नान्यदा ॥ ३५२ ॥ तदेवाह—"पासत्थो" गाहा । पार्श्वे ज्ञानादीनां तिष्ठतीति पार्श्वस्थः । पासे नाणाईणं चिट्ठइ तब्भावमल्लियइ नेव । देसेण सव्वओ वा, विराहई एस पासत्थो ॥ १ ॥ आवश्यकादिष्ववसीदति स्म प्रमादाद्यः सोऽवसन्नः । आवस्सयाइ याइं, न करे अहवाऽविहीणमहियाइं । गुरुवयणबलाइ तहा, भणिओ एसो उ ओसन्नो ॥२॥ 'बलाइ'त्ति-व्याख्याति—गोणो जहा बलवंतो, भंजइ समिलं तु सो वि एमेव । गुरुवयणं अकरिंतो, बलाइ कुणई च उस्सोढुं ॥३॥ कुत्सितं शीलमस्येति कुशीलः—कोउयभूई कम्माइएहिं निद्धंधसो सया जो उ । नाणाईणुवजीवइ, एस कुशीलोत्ति निद्दिट्ठो ॥४॥ नित्यमेकत्र वासान्नित्यः परमार्थतोऽयमवसन्न एव विहारादिष्ववस(सी)दनात्, परं नित्यवासस्य बहुतरदोषत्वाद्भिन्नतयोपात्तः ॥ पर-गुणदोषेषु संगात्संसक्तः—पुरिसेण जारिसेणं, सुद्धमसुद्धेण वा वि संमिलइ । तारिसओ च्चिय होई, संसत्तो भन्नए तम्हा ॥ ५ ॥ यथाच्छन्दमागमनिरपेक्षतया वर्त्तत इति यथाछन्दः—उस्सुत्तमायरंतो, उस्सुत्तं चेव पन्नवेमाणो । एसो हु अहाछंदो इच्छा छंदोत्ति एगट्ठा ॥६॥ उस्सुत्तमणुवइट्ठं, सच्छंदविगप्पियं अणणुवाई । परतत्तिपवत्ते तितिणो य इणमो अहाछंदो ॥७॥ सच्छंदमइविगप्पिय, किंची सुहसा-यविगइपडिबद्धो । (ग्रं. १००००) तिहिं गारवेहिं मज्जइ, तं जाणाही अहाछंदं ॥८॥ विशेषतश्च पार्श्वस्थानां स्वरूपं भेदाश्च—पासत्थो ओसन्नो, होइ कुसीलो तहेव संसत्तो । अहछंदो विय एए अवंदणिज्जा जिणमयंमि ॥९॥ इत्यादिवन्दनानिर्युक्तिसमस्तगाथाभ्योऽव-सेयानि । एतांश्च ज्ञात्वा सुविहिता सर्वप्रयत्नेन वर्जयन्ति ॥१०॥ यदुक्तमत्रैव—'आलावो संवासो' इत्यादि । उत्सर्गश्चायमपवादेन त्ववश्यकार्यत्वापत्तौ यथोचितमाचरणीयम् । यदत्रैव वक्ष्यति—सुबहुं पासत्थजणं, नाउणं जो न होइ मज्झत्थो । न न साहेइ सकज्जं,

कागं च करेइ अप्पाणं ॥ ११ ॥ आवश्यकनिर्युक्तावप्युक्तम्—बायाइ नमोक्कारो, हत्थुस्सेहो य सीसनमणं च । संपुच्छणऽच्छणं थोभवंदणं वंदणं वावि ॥ १२ ॥ इतः पार्श्वस्थादिस्थानानि सप्ततिंशत्या गाथाभिः—"पासत्थाई ठाणा, हवंति एमाइया एए ॥ ३८२ ॥ इत्यन्ताभिः प्राह ॥

बायालमेसणाओ, न रक्खइ धाइसिज्जपिंडं च । आहारेइ अभिक्खं, विगईओ सन्निहिं खाई ॥ ३५४ ॥
सूरप्पमाणभोजी, आहारेई अभिक्खमाहरं । न य मंडलीइ भुंजइ, न य भिक्खं हिंडई अलसो ॥ ३५५ ॥
कीवो न कुणइ लोअं, लज्जई पडिमाई जल्लमवणेइ । सोवाहणो अ हिंडइ, बंधइ कडिपट्टयमकज्जे ॥ ३५६ ॥
गामं देसं च कुलं ममायए पीढफलगपडिबद्धो । घरसरणेसु पसज्जइ, विहरइ य सकिंचणो रिक्को ॥ ३५७ ॥
नहदंतकेसरोमे, जमेइ उच्छोलधोअणो अजओ । वाहेइ य पलियंकं, अइरेगपमाणमत्थुरइ ॥ ३५८ ॥
सोवइ य सव्वराइं, नीसट्ठमचेयणो न वा झरइ । न पमज्जंतो पविसइ, निसिहीयावस्सियं न करे ॥ ३५९ ॥
पाय पहे न पमज्जइ, जुगमायाए न सोहए इरियं । पुढवीदगअगणिमारुअ-वणस्सइतसेसु निरविक्खो ॥ ३६० ॥
सव्वं थोवं उवहिं न पेहए न य करेइ सज्झायं । सद्दकरो झंझकरो, लहुओ गणभेयतत्तिल्लो ॥ ३६१ ॥

"बायाल" गाहा । द्विचत्त्वारिंशद्दोषान्तर्गतत्वेऽपि धात्रीपिण्डस्य पृथगुपादानं यतेर्गृहस्थसंबन्धो महतेऽनर्थायेति दर्शनार्थम् । शय्यापिण्डः—शय्यातरपिण्डः । आहारयत्यभीक्ष्णं, भिक्षां न भुङ्क्ते, पाचयित्वा भोजनकरणात् । 'सूर' गाहा सूर्यप्रमाणभोजी यावदादित्यस्तावद्भोजनशीलः । एतदेव व्यनक्ति—'आहारेइ' त्ति—अभीक्ष्णं निरन्तरमाहारयति । "कीवो" गाहा । 'क्लीवो'—हीनसत्त्वो न लोचं कारयत्यन्तर्भूतहेत्वर्थत्वात् किन्तु क्षौरेण वर्त्तयति । प्रतिमया कायोत्सर्गेण लजते । जल्लं-शरीरमलं करतोया-

दिभिरपनयति । नगरमध्येऽपि सोपानत्को हिण्डते । ‘ बंधइ ’ त्ति–किल वसत्यन्तर्निस्सागारिके चोलपट्टं विना स्थेयं, तच्च न करोति । ‘ अकार्ये ’–(कारणं विना) इति सर्वपदैर्योजनीयम् ॥ ३५६ ॥ “ गामं ” गाहा ‘ ममायए ’ त्ति ममैतदिति मन्यते ‘ पीठफलग-पडिबद्धो ’ त्ति ऋतुबद्धेऽपि काले तत्सेवनासक्तः ‘ घरसरणेसु ’ त्ति गृहस्मरणेषु पूर्वोपभुक्तचिन्तनेषु । ‘ रिक्को ’ त्ति–रिक्तो यतिगुणशून्यः ॥ “ नह ” गाहा ‘ जमेइ ’ त्ति–समारचयति । ‘ उच्छूलधोयणो ’ त्ति उच्छोलनया–प्रभूतोदकेन धावनं–हस्तपादादिक्षालनं यस्य स उच्छोलधावनः ‘ वाहेइ ’ त्ति–आरोहणाय पल्यङ्कं सज्जीकरोति । ‘ अत्थुरइ ’ त्ति–आस्तृणाति ॥ “ सोवइय गाहा । ‘ नीसट्टं ’ ति–निःप्रसरम् । ‘ झरइ ’ त्ति–स्वाध्यायं न करोति । ‘ न पमज्जंतो ’ त्ति–अन्धकारे प्रमार्जयन्न प्रविशति वसत्यादौ ॥ “ पाय ” गाहा । पादौ पथि रजोदिग्धौ विजातीयपृथिवीसंक्रमे न प्रमार्जयति ॥ “ सव्व ” गाहा । अपिशब्दस्य लुप्तनिर्दिष्टत्वात् सर्वस्तोकमप्युपधिं मुखवस्त्रिकामात्रमपि न प्रेक्षते । ननु ‘ नवा झरइ ’ अनेन स्वाध्यायाकरणमुक्तमेव किं पुनरत्र तद्भणनेन ? उच्यते—तत्र गुणनमिह वाचनादिकमभिप्रेतम् । ‘ सद्दकरो ’ त्ति–रात्रौ सुप्ते जने बृहच्छब्दकरणशीलः ॥ ‘झंझकरो’त्ति–राटिप्रियः । लघुकस्तुच्छचित्तः । ‘ गणभेयतत्तिल्लो ’ त्ति–गच्छस्य चित्तविश्लेषे कर्त्तव्ये तन्निमान् गच्छविघटनतत्पर इत्यर्थः ॥३६१॥

खित्ताईयं भुंजइ, कालाईयं तहेव अविदिन्नं । गिण्हइ अणुइयसूरे, असणाई अहव उवगरणं ॥ ३६२ ॥
ठवणकुले न ठवेई, पासत्थेहिं च संगयं कुणई । निच्चमवज्झाणरओ, न य पेहपमज्जणासीलो ॥ ३६३ ॥
रीयइ य दवदवाए, मूढो परिभवइ तहय रायणिए । परपरिवायं गिण्हई, निट्ठुरभासी विगहसीलो ॥ ३६४ ॥
विज्जं मंतं जोगं, तेगिच्छं कुणइ भूइकम्मं च । अक्खरनिमित्तजीवी, आरंभपरिग्गहे रमइ ॥ ३६५ ॥
कज्जेण विणा उग्गहमणुजाणावेइ दिवसओ सुअइ । अज्जियलाभं भुंजइ, इत्थिनिसिज्जासु अभिरमइ ॥ ३६६ ॥
उच्चारे पासवणे, खेले सिंघाणए अणाउत्तो । संथारग उवहीणं, पडिकमइ वा सपाउरणो ॥ ३६७ ॥

न करेइ पहे जयणं, तलियाणं तह करेइ परिभोगं। चरइ अणुबद्धवासे, सपक्खपरपक्खओमाणे ॥ ३६८ ॥
संजोअइ अइबहुअं, इंगाल सधूमगं अणट्ठाए। भुंजइ रूवबलट्ठा, न धरेइ अ पायपुंछणयं ॥ ३६९ ॥

" खित्ता " गाह। क्षेत्रातीतमतिक्रान्तद्विगव्यूतमशनादि भुङ्क्ते। कालातीतं ग्रहणकालात् पौरुसीत्रयातिवाहनेन। अविदत्तं च स्वाम्यादिभिः ॥ " ठवण " गाहा। स्थापनाकुलानि न स्थापयति ॥ " रीयइ " गाहा। रीयते-गच्छति। 'दवदवाए' त्ति-सत्वरतरम्। 'रायणिए' त्ति-रत्नाधिकान्पर्यायेण महतः ॥ " विज्जं " गाहा। विद्यां-देव्यधिष्ठितां मन्त्रं देवाधिष्ठितयोगं विशिष्टौषधसमवायं भूतिकर्मरक्षाकण्डक-पोट्टलिकादि ॥ " कज्जेण " गाहा। कार्येण विना-निष्प्रयोजनमवग्रहं देवेन्द्रादीनामनुज्ञापयति। स्त्रीनिषद्यासु तदुत्थानानन्तरमभिरमते ॥ " उच्चारे " गाहा। अनायुक्ताऽयतनया उच्चारादिपरिष्ठापकः। संस्तारकोपधीनामुपरि स्थितः प्रतिक्रमणं करोति सवासः-प्रावरणः सन् ॥ " न करेइ " गाहा। पथे यतनां प्रासुकोदकान्वेषणरूपम्। 'तलियाणं' ति शक्तोऽप्युपानहौ विना गन्तुं तत्परिभोगं करोति। 'सोवाहणो हिंडइ' त्ति यदुक्तं तद्ग्राममध्ये इत्यपौनरुक्त्यम्। 'चरइ' त्ति अनुबद्धवर्षे वर्षाकाले स्वपक्षपरपक्षाऽपमाने साधुप्रचुरे भौतशाक्याद्याकुले वा लाघवहेतौ क्षेत्रे विहरतीत्यर्थः ॥ " संजोयइ " गाहा। क्षीरखण्डादीनां संयोजनां करोति। अतिबहुकं प्रामाणातिरिक्तं भुङ्क्ते। सांगारं सधूमकं रागेण द्वेषेण भुङ्क्ते। अनर्थाय-निष्प्रयोजनं वेदनौपशमादिकारणानि विना ॥ ३६९ ॥

अट्ठम छट्ठ चउत्थं, संवच्छर चउमास पक्खेसु। न करेइ सायबहुलो, न य विहरइ मासकप्पेणं ॥ ३७० ॥

अष्टम-षष्ठ-चतुर्थानि यथाक्रमं संवत्सर-चतुर्मासपक्षेषु न करोति सातबहुलत्वान्न च मासकल्पेन विहरति मासकल्पप्रायोग्ययोः क्षेत्रकालयोः सतोरपि। अत्र पाक्षिके चतुर्थस्यावस्थितत्वात्पाक्षिकं चतुर्दश्यामेवावसीयते। यदि पुनः पञ्चदश्यां स्यात्तदा चतुर्दश्यामुपवासस्योभयसंमतत्त्वात्पञ्चदश्यां च पाक्षिकत्वेन तस्य सद्भावात्पाक्षिकमपि षष्ठेन स्यात्तथा च 'अट्ठमच्छट्ठंछट्ठमिति' पठ्येत्।

अथ चतुर्दश्युपवासश्चतुर्दशीसत्क एव न पाक्षिकप्रतिबद्धस्तर्हि चतुर्मासकेऽपि प्रथमोपवासस्य चतुर्दशीपर्वप्रतिबद्धत्वेन द्वितीयोपवासस्यैव चतुर्मासकसत्कत्वेन 'अट्ठमचउत्थ चउत्थमिति' स्यात्। अथ चतुर्मासकपर्वणो महत्त्वात्तत्तपोऽन्तर्मग्नमेव चतुर्दशीतपस्तर्हि पाक्षिकोऽप्येवमस्तु चतुर्दश्येकाहपर्वापेक्षया पाक्षिकस्यापि महत्वादेवं च तत्रापि षष्ठमेव भवेत्। अथ चतुर्मासकापेक्षया पाक्षिकस्य लघुपर्वत्वात् लध्वेव तत्र तपश्चतुर्थं युक्तं सांवत्सरिकतपाऽपेक्षया चातुर्मासिवत्। सत्यमेतत् किन्तु चतुर्दश्यामेव पाक्षिके क्रियते तद्घटते चतुर्दश्युपवासस्यैव पाक्षिकचतुर्थत्वात्। यदि पञ्चदश्यां पाक्षिकं पूर्वेषां संमतं स्यात्तदा पाक्षिकेऽपि षष्ठमेव ब्रूयुरेकस्मिन्नेवोपवासे चतुर्थव्यपदेशदर्शनाद् द्व्यादिषु तेषु षष्ठादिव्यपदेशस्यैव संभवादन्यथा व्यपदेशाऽव्यवस्थाप्रसंगात्। ततः प्रस्तुते चतुर्थोपदेशाच्चतुर्दशीपाक्षिकयोरैक्यमेव तेषां सम्मतमिति निर्णीयते। इतश्चैवमेकतरस्योपादानेऽन्यतरस्यानुपादानात्। तथाहि—'अट्ठमीचउद्दसीसुं उववासकरण' मिति पाक्षिकचूर्णिः॥ सो य सावओ अट्ठमिचउद्दसीसुं उववासं करइ पोत्थयं च वाएइ॥ इति निशीथचूर्णिः। इत्यादिसूत्रेषु हि चतुर्दश्येवोपोक्ता न पाक्षिकम्। अट्ठमीपक्खिए मोत्तुं, वायणाकालमेव य। सेसकालमयंतीओ, नायव्वाऽकालचारिओ ॥ १ ॥ इति चउत्थछट्ठट्ठमकरणे अट्ठमिपक्खचउमासवरिसेसु। इति च व्यवहारभाष्यम्। एवमादिषु तु सूत्रेषु पाक्षिकमेवोपात्तं न चतुर्दशी॥ तथा अट्ठमिचउद्दसी नाणपंचमी चउमास संवच्छरिएसु चउत्थच्छट्ठट्ठमे न करेइ तो पच्छित्तमिति॥ महानिशीथसूत्रे सर्वव्रतिपर्वप्रतिपादके पाक्षिकमेवैकं वराकमिति पङ्क्तिबह्मिर्तं क्रियते ततश्चतुर्दशीपाक्षिकयोरैक्यमिति निश्चीयते। अन्यथा तु क्वचिदुभयोपादनं स्यादेव॥ अथ—कत्थइ देसग्गहणं, कत्थइ घिप्पंति निरवसेसाइं। उक्कमकमजुत्ताइं, सुत्ताण विचित्तभावाओ॥१॥ इति वचनात् क्वापि चतुर्दश्याः क्वापि पाक्षिकस्योपादानमिति चेत्, ननु महानिशीथे यतीनां स्थितिपर्व सर्वसंग्रहे चतुर्दश्युपादाने पि पृथक् पाक्षिकं विशेषपर्व चतुर्मासिक-संवत्सरिकाभ्यां सार्द्धं नाभिधीयत इति कैषा वाचोयुक्तिः॥ किंच प्राञ्जलं पन्थानमनास्थाय-'कत्थइ देसग्गहण' मिति वक्रेण पथा प्रस्थीयतां यदि पञ्चदशी पाक्षिकमिति कुतोऽपि सिद्धं स्यान्नचामुत्रेऽप्यागमसमुद्रे प्रत्यक्षरमीक्षमाणैरपीक्ष्यत एतदिति विमुच्याभिनिवेशसंनिगृह्याग्रहं चतुर्दश्युपवास एव पाक्षिकचतुर्थमित्यास्थीयताम्॥ यतः—

आग्रही बत निनीषति युक्तिं, तत्र यत्र मतिरस्य निविष्टा। पक्षपातरहितस्य तु युक्तिर्यत्र तत्र मतिरेति निवेशम् ॥

इत्येष पूज्यकृतसप्ततियुक्तिबिन्दुः, संदर्शितो न च कदाग्रहविग्रहाय। सुव्यक्तशक्ततरयुक्तिसदुक्तिकामैः, सैवं ध्रुवं सविवृत्तिर्मुहुरूहनीया ॥ छ ॥ ३७० ॥



**नीयं गिण्हइ पिंडं, एगागी अच्छए गिहत्थकहो। पावसुआणि अहिज्जइ, अहिगारो लोगगहणम्मि ॥ ३७१ ॥**
**परिभवइ उग्गकारी, सुद्धं मग्गं निगूहए बालो। विहरइ सायागुरुओ, संजमविगलेसु खित्तेसु ॥ ३७२ ॥**
**उग्गाइ गाइ हसई, असंवुडो सइ करेइ कंदप्पं। गिहिकज्जचिंतगोऽविय, ओसन्ने देइ गिण्हइ वा ॥ ३७३ ॥**
**धम्मकहाओ अहिज्जइ, घरा घरं भमइ परिकहंतो अ। गणणाइ पमाणेण य, अइरित्तं वहइ उवगरणं ॥३७४॥**

'नीतं'–अभ्याहृतं, नित्यं वा प्रतिदिनं नैयत्येन कल्पितम्। गृहस्थानां सत्काः कथा यस्य स गृहस्थकथः। 'पापश्रुतानि'–वात्स्यायनादीनि। 'अहिगारो' त्ति–अधिक आरो अरणं–गमनं मनसा यस्य सोऽधिकारो लोकग्रहणे जनचित्तरञ्जने न पुनः स्वानुष्ठाने इति ॥ ३७१ ॥ "परि" 'परिभवत्युग्रकारिण'–उद्यतविहारिणः ॥ "उग्गाइ" गाहा ॥ उग्गायति–महता ध्वनिना गायति काकलीस्वरेण। 'सइ करेइ कंदप्पं' ति–कन्दर्पोद्दीपकैर्वचोभिः परानपि हासयतीत्यर्थः। अवसन्ने सामान्येन पार्श्वस्थादौ ददात्यन्नपानपात्रवस्त्रादि गृह्णाति वा ॥ ३७२-३ ॥ "धम्मकहा" गाहा–धर्मकथा जीविकार्थमधीते, गणनया 'जिणा बारसरूवाणि, थेरा चोद्दसरूविणो। अज्जाणं पन्नवीसं तु, अओ उड्ढमुवग्गहो ॥ १ ॥' इत्यादिकथा प्रमाणेन॥ कप्पा आयपमाणा, 'अड्ढाइज्जा य आयया हत्था' इत्यादिना अतिरिक्तमुक्तादर्गलतरम् ॥ ३७४ ॥

**बारस बारस तिण्णि य, काइयउच्चारकालभूमीओ। अंतो बहिं च अहियासि अणहियासे न पडिलेहे ॥ ३७५ ॥**

**गीयत्थं संविग्गं, आयरिअं मुअइ वलइ गच्छस्स। गुरुणो य अणापुच्छा, जं किंचिवि देइ गिण्हइ वा ॥ ३७६ ॥**
**गुरुपरिभोगं भुंजइ, सिज्जासंथारउवकरणजायं। किन्तिय तुमंति भासई, अविणीओ गव्विओ लुद्धो ॥ ३७७ ॥**
**गुरुपच्चक्खाणगिलाणसेहबालाउलस्स गच्छस्स। न करेइ नेव पुच्छइ, निद्धमो लिंगमुवजीवी ॥ ३७८ ॥**
**पहगमणवसहिआहारसुयणथंडिल्लविहिपरिठवणं। नायरइ नेव जाणइ, अज्जावट्टावणं चेव ॥ ३७९ ॥**

द्वादश स्थण्डिलभूमयः कायिकायाः। द्वादशोच्चारस्य। तिस्रः कालस्य न प्रत्युपेक्षते प्रत्युपेक्ष्य च न प्रमार्जतीत्यपि दृश्यम्। तत्र वसतेरन्तः षड् बहिश्च षट् कायिकायाः एवमुच्चारस्य च। तत्राऽसहिष्णोस्तिस्रः संस्तारकः समीपे, सहिष्णोस्तु तिस्रो वसतिद्वारादर्वाग्भागे। एवं वसतेर्बहिरपि षट् कायिकोच्चारयोरेवं द्वादश द्वादश एवं कालभूमयोऽपि तिस्रो यथोचितं ज्ञातव्याः। आसां च प्रमाणं जघन्येन सर्वतः स्वहस्तमात्रमधश्चत्वार्यङ्गुलानि प्रासुकत्वमिति॥ "गीयत्थं" गाहा 'मुयइ' त्ति–सारणवारणाऽसहिष्णुतया परित्यज्य गुरुं गच्छति। उक्तं चात्र—जह सागरंमि मीणा, संखोहं सागरस्स असहंता। निंति तओ सुहकामी, निग्गयमित्ता विणस्संति ॥ १ ॥ एवं गच्छसमुद्दे सारणवीईहिं पेल्लिया संता। निंति तओ सुहकामी, निग्गयमित्ता विणस्संति ॥२॥ 'वलइ गच्छस्स' त्ति-गच्छस्य क्वचिदर्थे शिक्षयत उत्तरदानायाभिमुखो भवति ॥ ३७६ ॥ "गुरु" गाहा। 'किं ति यं' त्ति आहूतः किमिति च भाषते तत्र मस्तकेन 'वंदे' इत्यभिधातव्यम्। आलपंश्च त्वमिति गुरुं परि(प्रति)भाषते यूयमिति हि तत्र वक्तव्यं। बहुवचनार्हत्वात्, हेतुद्वारेण विशेषणं यस्मादविनीतः। अविनीतोऽपि कुत इत्याह। यतो गर्वितो लुब्धश्च। "गुरु" गाहा। गुरुप्रत्याख्यानि ग्लानशैक्षबालाकुलस्य गच्छस्य स्वयं न करोति नापि कर्त्तव्यं पृच्छति, यतो निर्द्धर्मो लिंगोपजीवी निराचारत्वात्। 'पहगमण' गाहा पथगमनादीनां विधिं जानन्नपि नाचरंश्च तत्त्वतो न जानात्येव, एवं परिष्ठापनां आर्यावर्तापनं चैव ॥३७९॥

**सच्छंदगमणउट्ठाणसोअणो अप्पणेण चरणेण। समणगुणमुक्कजोगी, बहुजीवखयंकरो भमइ ॥ ३८० ॥**

**वत्थिव्व वायपुण्णो, परिभमई जिणमयं अयाणंतो। थद्धो निव्विन्नाणो, नय पिच्छइ किंचि अप्पसमं ॥ ३८१ ॥**
**सच्छंदगमणउट्ठाणसोअणो भुंजइ गिहीणं च। पासत्थाइट्ठाणा, हवंति एमाइया एए ॥ ३८२ ॥**

स्वच्छन्दं गुर्वाज्ञां विना गमनोत्थानस्वपनानि यस्य स तथा। आत्मीयेन स्वबुद्धिकल्पितेन चरणेन आचारेण भ्रमति निरर्थकमटाट्यते ॥ ३८० ॥ "वत्थिव्व" गाहा बस्तिर्दृतिस्तद्वत् वातपूर्णो गर्व्वाध्मातत्वात् ॥ ३८१ ॥ "सच्छंद" गाहा–स्वच्छोदके शुद्धाप्काये मनो यस्य स स्वच्छदकमनाः ॥ 'नीयालोयमहूयावि, आणिया दोवि बिंदुदुब्भावा। अत्थं वहंति–तं–चिय जो (नो) तेसिं पुव्वमुवलद्धो ॥ १ ॥' इति लक्षणेनानुस्वारः। तत् उच्चैः स्थानमापदं शोचतीत्युत्स्थानशोचनः। यद्यहं दीक्षितो नाभविष्यं संप्रत्यपि वा गृहस्थोऽभविष्यं तदा बृहत्पदप्राप्तः पञ्चप्रकारकामोपभोगभोगान् भोगसंभोगभाजनं भवेयमिति हि शोचति। यद्वा स्वच्छन्दकस्य मनस उत्थानेनोत्साहेन श्रौकनं–विचरणं यस्य स तथा स्वैरविहारीत्यर्थः। प्राग्गाथाद्वव्याख्याने तु पौनरुक्त्यं स्यात्। भुंक्ते च गृहिणां गृह एवोपविश्येति गम्यते। पार्श्वस्थादीनां स्थानानि भवंत्येवमादिकान्येतानि प्रमादस्थानानां संख्यातुमशक्यत्वात् ॥ ३८२ ॥ यद्येवं वर्त्तमानस्य पार्श्वस्थताद्यापत्तिस्तर्हीदानीं नास्ति कश्चित्सुसाधुरुद्यतविहारिणामपि ग्लानाद्यवस्थायामनेषणीयादौ प्रवृत्तिदर्शनादिति कस्यचिद्विषयविभागमजानानस्य भ्रमो भवेदतस्तद्व्यवच्छेदार्थमाह—

**जो हुज्ज उ असमत्थो, रोगेण व पिल्लिओ झ(ज्झु)रियदेहो। सव्वमवि जहाभणियं, कयाइ न तरिज्ज काउं जे ॥३८३॥**
**सोऽविय नियपरक्कम–ववसायधिइबलं अगूहंतो। मुत्तूण कूडचरियं, जई जयंतो अवस्स जई ॥ ३८४ ॥ युग्मम्**
**अलसो सढोऽवलित्तो, आलंबणतप्परो अइपमाई। एवंठिओऽवि मन्नई, अप्पाणं सुट्ठिओमि (म्हि) त्ति ॥ ३८५ ॥**
**जोऽवि य पाडेऊणं, मायामोसेहिं खाई मुद्धजणं। तिग्गाममज्झवासी, सो सोअइ कवडखवगु व्व ॥ ३८६ ॥**

'यो भवेत्त्वसमर्थः'–प्रकृत्यैव मन्दसंहननत्वात्। 'रोगेण वा प्रेरितो'–यथोक्तक्रियाया बहिःक्षिप्तः जरया वा जीर्णकायः

न तरेन्न शक्नुयात्कर्त्तुम् । 'जे' इति ' इजेराःपादपूरणे ' इति लक्षणात् ॥ ३८३ ॥ " सो वि य " गाहा । पराक्रमः–चित्तोत्साहः । ' व्यवसायो '–बाह्या चेष्टा । ' धृति '–धैर्यम् । ' बलं '–शरीरसामर्थ्यम् । तान्यगूहन्नगोपयन् मुक्त्वा मायाचेष्टितं यदि यतते ततोऽवश्यं यतिः साधुरेव, यथाशक्ति भगवदाज्ञाकरणात् ॥ ३८४ ॥ कूटचरित्तस्तर्हि किंभूतो भवतीत्याह—" अलसो " गाहा । ' अलस '–आलस्योपहतः । ' शठः '–छद्मवान् । ' अवलिप्तो '–ऽहमेव भव्यः किमेतैस्तृणच्छन्नकूपोपमैरित्यवलेपवान् ॥ ३८५ ॥ योऽपि मायया लोके गुणवन्तमात्मनं ख्यापयति सोऽपि कूटचेष्टितो द्रष्टव्यस्तादृशस्य वाऽपायं दृष्टान्तेनाह—'पाडेऊण'मात्मवशे इत्याध्याहारः । कपटक्षपककथानकं चैतत्—

उज्जेणीए घोरपरिणामो घोरसिवो नाम माहणो कूडकवडवंचणापरायणो जाणिऊण जणेण निग्घाडिओ नयरीओ । गओ चम्मारनामं विसयं । तत्थ विडाण मिलिओ भणिया य ते तेण । अहं मुणिवेसं करेमि तुब्भेहिं सलाहणीओ य जेण सुहेणेव लोयं मुसामो । नाऊण य लोयाणं सब्भावं विहवं छिड्डाणि य तुम्हाणं कहेमि । पडिवन्नं तेहिं तहत्ति । कओ णेण परिव्वायगवेसो । तओ तिन्हं महागामाण मज्झे ठिओ तवोवणे । तेहिं वि से कओ लोयवाओ । एस महातवस्सी मासाओ मासाओ भुंजइ । महानाणी य । सो वि अतवस्सी वि परवंचणेक्कचिंतासंतत्तचित्तत्तणेण चेव सुक्किससरीरो दीसइ । तओ लोया महातवस्सी एसो त्ति चिंतिऊण पूइंति पुच्छंति य निमित्तं । कहिंति य वीसत्था सब्भावं निंति नियगेहेसु । दंसिंति से रहस्स ठाणाणि वि । सो वि बगचेट्ठाए वट्टमाणो अप्पाणयं लोगाणुग्गहपरं पयासेइ । चोराण य कहेइ छिड्डाणि । तेहिं सद्धिं राईए मुसइ लोगाण गेहाणि । थेवकालेण चेव नत्थि सो जणो जो तेण न मुसिओ मुसाविओ य । अन्नया एगेण कुलपुत्तएण खत्तमुहं खणिज्जमाणं मुणेऊण खत्तमुहे कया पासिया । पविट्ठमेत्तो च्चेव चोरो पाडिओ पासियाए । पलाइऊण पत्ता सेसचोरा से दूरं । पभाए सो नीओ राइणो सगासं । भणियं राइणा । मुंचह वरायमेयं जइ कहेइ सब्भावं । जाव सामेण पुच्छिज्जंतो वि न कहेइ ताव ताडाविओ कसाईहिं । कहिओ सव्वो वुत्तंतो । बंधिऊणमाणाविओ परिव्वायगो । विमाणि(रि)ज्जमाणो य अप्पेइ खद्धसेसे जणस्स

मोसे। सोत्तियपुत्तोत्ति उलूलियाणि से अच्छीणि। पच्छा भिक्खमेत्तंपि अपावितो खिंसिज्जंतो य लोएण पच्छायावेण पलीविओ अप्पाणं सोएइ। एय दिट्ठंतं सोऊण कूडचरियं मोत्तूण जहट्ठियायारेण आयरियव्वंति ॥३८६॥ एवं प्रकाराश्चानेकाकारा भवन्तीत्याह—

एगागी पासत्थो, सच्छंदो ठाणवासी ओसन्नो। दुगमाईसंजोगा, जह बहुआ तह गुरू हुंति ॥ ३८७ ॥
गच्छगओ अणुओगी, गुरुसेवी अनियओ गुणाउत्तो। संजोएण पयाणं, संजमआराहगा भणिआ ॥ ३८८ ॥
निम्ममा निरहंकारा, उवउत्ता नाणदंसणचरित्ते। एगखि(क्खे)त्तेऽवि ठिया, खवंति पोराणयं कम्मं ॥ ३८९ ॥
जियकोहमाणमाया, जियलोहपरीसहा य जे धीरा। वुड्ढावासेऽवि ठिया, खवंति चिरसंचियं कम्मं ॥ ३९० ॥
पंचसमिया तिगुत्ता, उज्जुत्ता संजमे तवे चरणे। वाससयं पि वसंता, मुणिणो आराहगा भणिया ॥ ३९१ ॥

'ठाणवासी' त्ति–नित्यवासी। 'अवसन्न'–आवश्यकादिषु शिथिलः। एतानि पञ्च पदानि। एषां च मध्यात् क्वचिदेकं द्वे त्रीणि चत्वारि सर्वाणि भवन्ति। अत एवाह—'दुगमाइ' त्ति। एतेषां पदानां द्विकादयः संयोगा यथा यथा बहुपदवन्तो भवन्ति तथा तथा गुरुकर्म्मप्राणिसत्कत्वेन गुरवो भवन्ति ॥ ३८७ ॥ एतेषां क्रमेणैव व्यतिरेकमाह—'अणुओगि' त्ति–अनुरूपो ज्ञानादिभिः सह योगः–सम्बन्धोऽस्यास्तीत्यनुयोगी–पार्श्वस्थाद्विपरीतः। 'अनिवासि' त्ति–अनियतविहारवान् नत्वेकस्थानवासी। 'आउत्तो' त्ति–गुणेष्वावश्यकादिष्वायुक्तोऽप्रमादी। एतेषामपि पदानां बहुबहुतरादिसंयोगेन बहुबहुतरादिसंयमाराधकाः साधवो भणितास्तीर्थकृद्भिः ॥३८८॥ ननु यदि स्थानवासित्वं दोषाय तर्हि कथमार्यसमुद्रादिभिस्तदनुष्ठितं कथं चाराधकास्ते संजाता इति?। उच्यते–भगवदाज्ञाकारित्वात् तथा चाह—"निम्ममा" गाहा। "जिय" गाहा "पंच" गाहा॥ निर्म्ममत्वादिगुणयुक्ता एकक्षेत्रे पुष्टालम्बनेन जङ्घाबलपरीक्षीणतादिना केनापि स्थिताः सन्तः क्षपयन्ति पुराणं बहुभवोपात्तं कर्मेति। आद्यगाथयेव गतार्थत्वादितरयोरभिधानं किमर्थमिति चेत्, भगवदाज्ञायां तिष्ठतां कथंचिदपि नास्ति दोषगन्धोऽपीत्यतिशयख्यापनार्थम्। तथा चोक्तम्—एगक्खेत्तविहारी, का-

शुद्धालम्बन
सेविसंयम-
साधकाः।

लाइकंतचारिणो जइवि। तहवि हु विसुद्धचरणा, विसुद्धआलंबणा जेण ॥ १ ॥ आणाए अमुक्कधुरे, गुणवुड्ढी जेण निज्जरा तेण। मुक्कधुरस्स उ मुणिणो, सो ही नहु विज्जइ चरित्ते ॥ २ ॥ गुणपरिवुड्ढिनिमित्तं, कालाईए न हुंति दोसाओ। जत्थ उ वड्ढि(ट्टि)या हाणी, हविज्ज तइयं न विहरिज्जा ॥ ३ ॥ ३९१ ॥ अमुमेव न्यायविशेषं कर्त्तव्यसंग्रहद्वारेण निगमयन्नाह—

**तम्हा सव्वाणुन्ना, सव्वनिसेहो य पवयणे नत्थि। आयं वयं तुलिज्जा, लाहाकंखि व्व वाणियओ ॥ ३९२ ॥**
**धम्मम्मि नत्थि माया, न य कवडं आणुवत्तिभणियं वा। फुडपागडमकुडिल्लं, धम्मवयणमुज्जुयं जाण ॥ ३९३ ॥**
**नवि धम्मस्स भडक्का, उक्कोडा वंचणा व कवडं वा। निच्छम्मो किर धम्मो, सदेवमणुआसुरे लोए ॥ ३९४ ॥**
**भिक्खु गीयमगीए, अभिसेए तहय चेव रायणिए। एवं तु पुरिसवत्थुं, दव्वाइ चउव्विहं सेसं ॥ ३९५ ॥**

द्रव्यक्षेत्रकालभावानां हि वैचित्र्येण क्वचिद्विधेयस्यापि निषेधावसरः स्यान्निषेधस्य च विधानमापद्यते ततः कथं कस्यापि कार्यस्य सर्वथानुज्ञा निषेधो वा भवेत्। तदुक्तम्—उत्पद्येत हि साऽवस्था, देशकालामयान् प्रति। यस्यामकार्यं कार्यं स्यात्कर्म कार्यं तु वर्जयेत् ॥ तथा—उत्सर्गश्चापवादश्च, समं द्वावपि मुक्तये। चक्रेणैकेन किं याति, कदाचन रथः पथि ॥ अतः किं कर्त्तव्यम्। 'आयं'—ज्ञानादिलाभम्। 'व्ययं'—तद्हानिं 'तुलयेत्'—आकलयेत्। क इवेत्याह—लाभाकाङ्क्षीव वाणिजकः। यथाऽसावायव्ययतुलनया बहुलाभे प्रवर्त्तते तथा प्रवर्त्तेतेत्यर्थः ॥ ३९२ ॥ ननु वाणिजका मायाविनः सन्तो लाभमाकाङ्क्षन्ति तत् किं धर्मेऽप्येवमेव ज्ञेयमित्यत्राह—"धम्मंमि" गाहा। धर्मे सद्भावसाध्ये नास्ति 'माया'—मनोवक्रताऽत्यन्तविरोधात्। न च 'कपटं'—परवञ्चनाय चेष्टारूपम्। अनुवृत्तिभणितं वा सदोषं परेषामावर्जनाय जल्पितं नास्तीति वर्त्तते। किं तर्हि 'स्फुटं'—व्यक्तवर्णं 'प्रकटम्' अलज्जनीयम्। 'अकुटिलं'—निर्मायं धर्मवचनमृजुकं—मोक्षं प्रति प्रगुणं जानीहि ॥ ३९३ ॥ "नवि" गाहा। 'भडका'—बृहदा-

सनोपवेशादिबाह्यस्फुटाटोपरूपा । [1]'उक्कोडालं च (वा)'वञ्चना वक्रव्रतधारणेन परविप्रतारणा । कपटं-प्रागुक्तमेव । एतानि धर्मस्य साधनानीति शेषः। कुत एतदित्याह—'निच्छम्मो' इत्यादि यत उक्तं—'सुद्धस्स होइ चरणं, मायासहिए उ चरणभेउ' त्ति ॥ ३९४ ॥ गतमानुषङ्गिकं संप्रत्यायव्ययतुलना यान्यधिकृत्य कर्त्तव्या तान्याह—"भिक्खू" गाहा। भिक्षुर्द्विविधो-गीतार्थश्चागीतार्थश्च अभिषेक उपाध्यायः। रात्निक-आचार्यः। चेवशब्दादनुक्तस्थविरादिपरिग्रहः। 'एवं तु पुरिसवत्थुं' ति-एतदेवं रूपं पुरुषा एव ज्ञानादिगुणवसनयोगाद्वस्तु पुरुषवस्तु आयव्ययतुलनाया गोचरो भवतीति गम्यते। 'दव्वाइ' त्ति-द्रव्यक्षेत्रकालभावरूपतया च चतुर्विधं पुरुषवस्तुनः शेषमन्यच्च तस्यागोचरो भवति॥ अयं भावार्थः—एतानि तुलयित्वा यद्बहुलाभं तद्विधेयमन्यथा त्वतिचारः स्यात् ॥ ३९५ ॥ स चातिचारो ज्ञानदर्शनचारित्रेषु स्यात्तत्र चारित्रस्य मोक्षं प्रत्यन्तरङ्गकारणत्वात्तस्यातिचारांस्तावदाह—

**चरणइयारो दुविहो, मूलगुणे चेव उत्तरगुणे य। मूलगुणे छट्ठाणा, पढमो पुण नवविहो तत्थ ॥ ३९६ ॥**
**सेसुक्कोसो मज्झिम जहन्नओ वा भवे चउद्धा उ। उत्तरगुणणेगविहो, दंसणनाणेसु अट्ठऽट्ठ ॥ ३९७ ॥**
**जं जयइ अगीयत्थो, जं च अगीयत्थनिस्सिओ जयइ। वट्टावेइ य गच्छं, अणंतसंसारिओ होइ ॥ ३९८ ॥**
**कह उ जयंतो साहू, वट्टावेई य जो उ गच्छं तु। संजमजुत्तो होउं, अणंतसंसारिओ होइ? ॥ ३९९ ॥**

चारित्रातिचारो द्विविधो मूलगुणविषय उत्तरगुणविषयश्च। तत्र मूलगुणेषु षट् स्थानानि पञ्च महाव्रतानि रात्रिभोजनविरतिव्रतषष्ठानि। तेष्वपि प्रथमः प्राणातिपातगोचरो नवभेदो-पृथ्व्यप्तेजोवायुवनस्पतिद्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिय-पञ्चेन्द्रियरक्षणविषयत्वात् ॥ ३९६ ॥ "सेसुक्कोसो" गाहा। शेषो मृषावादादिषु पञ्चसु उत्कृष्टो मध्यमो जघन्यश्चेति त्रिविधो भवति। 'वा भवे चउद्धा' त्ति चतुर्द्धा वा द्रव्यादिभेदाद् भवेत्। उत्तरगुणविषयोऽतिचारोऽनेकविधो भवति पिण्डविशुद्ध्यादिगोचरत्वात्तेषां वाऽनेकरू-

---

१ 'उक्कोड' त्ति उत्कोचा, यदि मह्यमेतद्देहि ततोऽहमिदं करोमित्यादिलक्षणा, इति सिद्धवृत्तौ।

पत्वादिति । दर्शनज्ञानयोरष्टाष्टपदान्यतिचारगोचरत्वेन भवन्ति ॥ तत्र दर्शने निःशङ्कितत्वादीनि, ज्ञाने कालविनयादीनि ॥ ३९७ ॥ साम्प्रतं 'भिक्खू गीयमगीए' त्ति यदुक्तं तत्रागीतार्थस्यागमरहस्याऽनभिज्ञतया सर्वोऽनधिकारितां दर्शयति—"जं जयइ" गाहा यदगीतार्थो यतते स्वयं तपोऽनुष्ठानादौ यत्नं करोति । यद्वा गीतार्थनिश्रितो यतते गुरुत्वेन गृहीत्वेत्यर्थः 'वर्त्तयति च'-पालयति गच्छम् । चशब्दादजानन्नप्यभिमानेन ग्रन्थान् व्याचष्टे, स तेन चेष्टितेनानन्तसंसारिको भवति ॥३९८॥ अ(त)त्राह परः—"कह उ" गाहा । कथं पुनर्यतमानादिरपि साधुरनन्तसंसारिको भणित इति ॥ ३९९ ॥ अत्रोत्तरम्—

**दव्वं खित्तं कालं, भावं पुरिसपडिसेवणाओ य । नवि जाणइ अग्गीओ, उस्सग्गववाइयं चेव ॥ ४०० ॥**
**जहठियदव्व न याणइ, सच्चित्ताचित्तमीसियं चेव । कप्पाकप्पं च तहा, जुग्गं वा जस्स जं होई ॥ ४०१ ॥**
**जहठियखित्त न जाणइ, अद्धाणे जणवए अ जं भणियं । कालंपि अ नवि जाणइ, सुभिक्खदुभिक्ख जं कप्पं ॥४०२॥**
**भावे हट्ठगिलाणं, न वि याणइ गाढऽगाढकप्पं च । सहुअसहुपुरिसरूवं, वत्थुमवत्थुं च नवि जाणे ॥ ४०३ ॥**
**पडिसेवणा चउद्धा, आउट्टिपमायदप्पकप्पेसु । नवि जाणइ अग्गीओ, पच्छित्तं चेव जं तत्थ ॥ ४०४ ॥**

अगीतार्थो हि द्रव्यादीनि न जानाति, उत्सर्गापवादिकं चानुष्ठानं न जानात्यतो ज्ञानाभावाद्विपरीतं प्रवर्त्तेत, ततः कर्मबन्धस्ततोऽनन्तसंसार इति द्वारगाथार्थः ॥ ४०० ॥ तत्र द्रव्यव्यवहारमाह—"जह" गाहा । यथास्थितं द्रव्यं न जानाति । कथमित्याह—सचित्तमचित्तं मिश्रकं चैव तथा कल्प्यमकल्प्यं च । योग्यं वा प्रायोग्यं यस्य ग्लानादेर्यद्भवति तन्न जानातीति ॥ ४०१ ॥ क्षेत्र-कालद्वारे आह—"जह" गाहा । यथास्थितं क्षेत्रं न जानाति कथमित्याह—अध्वनि मार्गे जनपदे च जनाकुले देशे यद्भणितं कर्त्तव्यतयोक्तम् । कालमपि च नैव जानाति कथमित्याह—सुभिक्षे यत्कल्प्यं दुर्भिक्षे चेति ॥४०२॥ भावपुरुषद्वारे आह—"भावे" गाहा । भावे विचार्ये 'हृष्टं'-नीरोगं, ग्लानं-रोगाक्रान्तं नापि जानाति 'गाढागाढकल्प्यं च' । 'गाढे'-महति प्रयोजने, 'अगाढे च'-

सामान्ये यदुचितं तन्न जानाति । 'सहुं'ति सहिष्णुं-निष्ठुरशरीरं पुरुषं न जानाति ' असहु ' त्ति असहिष्णुं-सुकुमारदेहं तु शब्दात्परिकर्म्मितमपरिकर्मितं च, वस्तु-आचार्यादिकमवस्तु च सामान्यसाधुं नापि जानाति ॥ ४०३ ॥ प्रतिसेवाद्वारमाह—"पडिसेवणा" गाहा । प्रतिसेवना-निषिद्धाचरणरूपा सा चतुर्द्धा-१आकुट्टि-२प्रमाद-३दर्प-४कल्पविषया । एषां च लक्षणं यथा—आउट्टिया उव्वेचा दप्पो पुण होइ वग्गणाईओ । कंदप्पाइ पमाओ, कप्पो पुण कारणे करणं ॥ १ ॥ एतामगीतार्थो न जानाति । प्रायश्चित्तं च आलोचनादि, एव शब्दात्तत्सेवकभावोपक्रमणं च यत्तत्र तन्न जानाति ॥ ४०४ ॥

जह नाम कोइ पुरिसो, नयणविहूणो अदेसकुसलो य । कंताराडविभीमे, मग्गपणट्ठस्स सत्थस्स ॥ ४०५ ॥
इच्छइ य देसियत्तं, किं सो उ समत्थ देसियत्तस्स । दुग्गाइँ अयाणंतो, नयणविहूणो कहं देसे ? ॥ ४०६ ॥ युग्मम्
एवमगीयत्थोऽविहु, जिणवयणपईवचक्खुपरिहीणो । दव्वाइँ अयाणंतो, उस्सग्गववाइयं चेव ॥ ४०७ ॥
कह सो जयउ अगीओ ? कह वा कुणऊ अगियनिस्साए ? । कह वा करे उ गच्छं ? सबालवुड्ढाउलं सो उ ॥४०८॥
सुत्ते य इमं भणियं, अपच्छित्ते य देइ पच्छितं । पच्छित्ते अइमत्तं, आसायण तस्स महई उ ॥ ४०९ ॥
आसायण मिच्छत्तं, आसायणवज्जणा उ सम्मत्तं । आसायणानिमित्तं, कुव्वइ दीहं च संसारं ॥ ४१० ॥
एए दोसा जम्हा, अगीयजयंतस्सऽगीयनिस्साए । वट्टावय गच्छस्स य, जो अ गणं देयगीयस्स ॥ ४११ ॥

आगमं हि विना न किंचिद् ज्ञायते स्वबुद्धिकल्पितस्य व्यभिचारितया महामोहरूपत्वादिति ज्ञापनार्थमत्रैव दृष्टान्तमाह—" जह " गाहा । " इच्छइ य " गाहा । ' कंताराडविभीमे ' त्ति-दुर्गाटवीभीषणे प्रदेशे मार्गात्परिभ्रष्टस्य सार्थस्य । इच्छति च देशकत्वं मार्गदर्शित्वं कर्त्तुमिति गम्यते । किं स तु समर्थो देशकत्वस्य विधानेनैवेत्यर्थः । तथा दुर्गाण्यजानन्नयनविहीनः कथं देशये-

दत्यन्तासंभव एवास्येत्याकूतम् ॥ ४०६ ॥ दार्ष्टान्तिकमाह—" एव " गाहा। एवमगीतार्थोऽपि कथं यतिधर्ममार्गं देशयेदिति सम्बन्धः, नैवेत्यर्थः। जिनवचनमेवाशेषभुवनभवनोद्भासकत्वात्प्रदीपः, प्राणिनां चक्षुस्तत्त्वरूपावबोधकत्वात्तेन परिहीणः अनेनान्धतां लक्षयति द्रव्याद्योत्सर्गापवादिकं चानुष्ठानमजानन्नित्यनेन मार्गाऽनभिज्ञतां दर्शयति ॥ ४०७ ॥ एवं च ' जं जयइ अगीयत्थो ' इत्यस्या गाथायाः स्थापितमर्थमाह—" कह सो " गाहा। मूर्खस्य सर्वत्रानधिकारित्वात्तथाप्यात्मबुद्ध्या प्रवर्त्तमानोऽनन्तसांसारिक एव ॥ ४०८ ॥ " सुत्ते य " गाहा। तथा च सूत्रम्—अप्पच्छित्ते य पच्छित्तं, पच्छित्ते अइमत्तया। धम्मरसासायणा तिव्वा, मग्गस्स य विराहणा ॥ १ ॥ यद्याशातना स्यात्तदापि को दोष इत्याह—" आसायण " गाहा। ' आसायणानिमित्तं ' ति–अगीतार्थोऽविधिप्रवृत्तेराशातनानिमित्तं आशातनाया हेतुभूतया करोति दीर्घं संसारं च शब्दात् क्लिष्टं च ॥ ४०९–१० ॥ निगमयन्नाह—"एए" गाहा। एते दोषा यस्मादगीतार्थस्य स्वयं यतमानस्यागीतार्थनिश्रयाऽन्यस्य यतमानस्य। योऽप्यगीतार्थो गच्छस्य वर्त्तकः-पालको भवति यश्चागीतार्थाय गच्छं ददाति तस्याप्यत एव दोषास्तस्माद्गीतार्थतायां महानादरो विधेय इति ॥ ४११ ॥ इयता व्याख्याता ' दव्वं खेत्तं काल'मित्यादिद्वारगाथा ॥ एतच्चैकान्तेनागीतार्थमधिकृत्योक्तमधुना किंचिज्ज्ञमधिकृत्याह—

**अबहुस्सुओ तवस्सी, विहरिउकामो अजाणिऊण पहं। अवराहपयसयाइं, काऊण वि जो न याणेइ ॥ ४१२ ॥**
**देसियराइयसोहिय, वयाइयारे य जो न याणेइ। अविसुद्धस्स न वड्ढइ, गुणसेढी तत्तिया ठाइ ॥ ४१३ ॥ युग्मम्।**
**अप्पागमो किलिस्सइ, जइवि करेइ अइदुक्करं तु तवं। सुंदरबुद्धीइ कयं, बहुयंपि न सुंदरं होई ॥ ४१४ ॥**
**अपरिच्छियसुयनिहसस्स केवलमभिन्नसुत्तचारिस्स। सव्वुज्जमेणऽवि कयं, अन्नाणतवे बहुं पडई ॥ ४१५ ॥**

' अबहुश्रुतो '–विशिष्टश्रुतरहितोऽत एवाऽज्ञात्वाऽपि सम्यग्मोक्षपथं 'तपस्वी'–विकृष्टतपोनिष्टप्तदेहो 'विहर्तुकामश्च'–गीतार्थनिश्रां विनैव स्वातन्त्र्येणासितुकामश्च यो भवति तस्य गुणश्रेणिर्न वर्द्धत इति सम्बन्धः। यश्चाबहुश्रुतत्वादेव अपराधपदशतानि कृत्वा न

जानाति दैवसिकरात्रिकातिचाराणां शुद्धिं प्रायश्चित्तेन क्षालनां व्रतातिचारांश्च मूलोत्तरगुणखण्डनालक्षणान् स्वरूपतोऽपि यो न जानाति तस्य 'अविसुद्धस्स' त्ति अपिशब्दस्याग्रेऽभिसम्बन्धात्। शुद्धस्यापि स्वबुद्ध्या सम्यक्प्रवर्त्तमानस्यापि न वर्द्धते 'गुणश्रेणि'-ज्ञानादिपद्धतिर्गुणवद्गुरुयोगस्यैव तद्वृद्धिहेतुत्वात्तदभावे तु तावत्येव यावती प्रागासीत्तावत्प्रमाणा तिष्ठति। क्लिष्टचित्तस्य पुनरेकाकिनः किंचिज्ज्ञस्य गुणश्रेणिरपयात्येवानन्तसंसारत्वं च संपद्यत इति प्रागुक्तमेव ॥ ४१२ ॥-१३ ॥ एतदेव स्पष्टयति-"अप्पागमो" गाहा। 'सुंदरबुद्धीए'-स्वकल्पनया सुन्दरमेतदिति बह्वपि कृतं न सुन्दरं भवति लौकिकमुनीनामिवाज्ञानोपहतत्वात् ॥ तथा चाह— "अपरिच्छिय" गाहा। 'अभिन्नसुत्तचारिस्स' त्ति-अभिन्नमविवृतार्थं यत्सूत्रं विशिष्टव्याख्यानरहितं सूत्रमात्रमित्यर्थस्तेन चरितुमनुष्ठानं कर्त्तुं शीलं यस्य स तथा तस्य। 'अन्नाणतवे बहुं पडई' त्ति-अज्ञानतपसि पञ्चाग्निसेवनादिरूपे बहु पतति स्वल्पमेवागमानुसारि भवति विषयविभागज्ञानशून्यत्वात् तथाहि-सूत्रे स्पष्टोक्तोऽप्यर्थो व्याख्यानतो विशेषोऽवस्थाप्यते। उत्सर्गसूत्राणामपवादसूत्रैर्विरोधात्। यदि पुनः सूत्रमात्रमेव कार्यकारि स्यात्तदानीमनुयोगोऽनर्थकः स्यात्तथा चोक्तम्—जं जह सुत्ते भणियं, तं तह जइ वियालणा नत्थि। किं कालियाणुओगो, दिट्ठो दिट्ठिप्पहाणेहिं ॥ १ ॥ इत्यादि ॥ ४१४-१५ ॥ अत्रैव दृष्टान्तमाह—

**जह दाइयम्मिऽवि पहे, तस्स विसेसे पहस्सऽयाणंतो। पहिओ किलिस्सइ चिय, तह लिंगायारसुअमित्तो ॥४१६॥**
**कप्पाकप्पं एसण-मणेसणं चरणकरणसेहविहिं। पायच्छित्तविहिंऽपि य, दव्वाइगुणेसु अ समग्गं ॥ ४१७ ॥**
**पव्वावणविहिमुट्ठावणं च अज्जाविहिं निरवसेसं। उस्सग्गववायविहिं, अयाणमाणो कहं जयउ ? ॥ ४१८ ॥**
**सीसायरियकमेण य, जणेण गहियाइँ सिप्पसत्थाइ। नज्जंति बहुविहाइं, न चक्खुमित्ताणुसरियाइं ॥ ४१९ ॥**
**जह उज्जमिउं जाणइ, नाणी तव संजमे उवायविऊ। तह चक्खुमित्तदरिसणसामायारी न याणंति ॥ ४२० ॥**

"जह" गाहा। 'तह लिंगायारसुयमेत्तो' त्ति लिङ्ग-रजोहरणादिर्वेषः। आचारः-स्वबुद्ध्या क्रिया। श्रुतमात्रं-विशिष्टार्थरहितं

सूत्रमात्रम्। ततश्च लिङ्गाचाराभ्यां सह श्रुतमात्रं यस्य स तथा। तथा प्रोक्तः पथिकः क्लिश्यति तथा लिङ्गाचार श्रुतमात्रोऽपीत्यर्थः॥ एतदेव भावयति—"कप्पा" गाहा। "पव्वावण" गाहा। कल्पादिकमजानानः कथं यततामिति सम्बन्धः। तत्र 'कल्प्याकल्प्यं'–साधूनां योग्यायोग्यम्। यद्वा 'कल्पाकल्पं'–कल्पो–मासकल्पस्थविरकल्पादिस्तदन्योऽकल्पः। 'एषणां'–पिण्डेषणा–ग्रासैषणारूपा। तदन्याऽऽधाकर्मिकादिकाऽनेषणा। 'चरणं'–महाव्रतादिकरणम्। पिण्डविशुद्ध्यादिशिक्षविधि दीक्षाभिमुखस्याभिनवदीक्षितस्य वा सामाचारीग्राहणक्रमम्। प्रायश्चित्तस्यालोचनादेर्विधिर्यथा यदा यादृशं यादृशाय तद्दीयते इत्यादिस्तमपि च। द्रव्यक्षेत्रकालभावगुणेषु सामर्थ्य–सममतां कर्त्तव्यप्रयोजनेषु तच्चतुष्टया मुकुलतां 'प्रव्राजनविधिं'–दीक्षादानक्रमम्। 'उत्थापनां' च–व्रतारोपणन्यायम्। 'आर्याविधिं'–साध्वीप्रतिपालनक्रमं निरवशेषम्। 'उत्सर्गापवादविधिं'–द्रव्याद्यपेक्षं कर्त्तव्यमार्गमजानानः कथं यतताम्॥ ४१७–१८॥ तस्माज्ज्ञाने महान् यत्नो विधेयः। तदर्थिना च गुरव आराधनीयाः (न पुस्तकपाठिना भाव्यम्)॥ यतः—"सीसा" गाहा। अविवेकिना लोकेनापि शिष्याचार्यक्रमेणैव गृहीतानि शिल्पशास्त्राणि सम्यग्ज्ञायन्ते न दृष्टमात्राणि। तेषां विगोपककारित्वात्तथा चोक्तम्—नहि भवति निर्विगोपकमनुपासितगुरुकुलस्य विज्ञानम्। प्रकटितपश्चाद्भागं, पश्यत नृत्तं मयूरस्य॥ १॥ ततो लोकोत्तरैः साधुभिर्लोकोत्तरानुष्ठानं सुतरामाचार्यादेवोपात्तमवदातं भवति, तस्मात् स्थितमेतत्—"जह" गाहा। यथा ज्ञानित्वादुपायविद्गीतार्थस्तपःसंयमयोरुद्यन्तुं सम्यगनुष्ठानं कर्त्तुं जानाति। न तथा चक्षुर्मात्रदर्शनसामाचारिका जानन्ति चक्षुर्मात्रदर्शनेन परानुष्ठानालोकनेनागमं विना सामाचारी येषां ते तथा। तस्माद्गुरोः सकाशादागमाद्गीतार्थतायां यत्नः कार्यः॥ १९–२०॥ एवं श्रुत्वा ज्ञानमेवालम्ब्य कश्चित्तोषं विदध्यादतस्तदपि क्रियाविकलमकिंचित्करमेवेति। सदृष्टान्तमावेदयन्नाह—

**सिप्पाणि य सत्थाणि य, जाणंतो वि न य जुंजइ जो ऊ। तेसिं फलं न भुंजइ, इअ अजयंतो जई नाणी॥४२१॥**
**गारवतियपडिबद्धा, संजमकरणुज्जमम्मि सीअंता। निग्गंतूण गणाओ (घराओ) हिंडंति पमायरण्णम्मि॥ ४२२॥**

नाणाहिओ वरतरं, हीणोऽविहु पवयणं पभावंतो । नय दुक्करं करंतो, सुट्ठुवि अप्पागमो पुरिसो ॥ ४२३ ॥
नाणाहियस्स नाणं, पुज्जइ नाणा पवत्तए चरणं । जस्स पुण दुण्ह इक्कं पि, नत्थि तस्स पुज्जए काइं ॥ ४२४ ॥
नाणं चरित्तहीणं, लिंगग्गहणं च दंसणविहीणं । संजमहीणं च तवं, जो चरइ निरत्थयं तस्स ॥ ४२५ ॥

शिल्पानि च शास्त्राणि च जानन्नपि यो न व्यापारयति स तेषां फलं द्रव्यलाभादिकं न भुङ्क्ते-नानुभवत्येव । इत्येवमयतमानोऽनुष्ठानशून्यो यतिर्ज्ञानी सन्नपि मोक्षलक्षणं फलं नाप्नोतीति ॥ कथं पुनर्ज्ञाने सति क्रियावैकल्यं स्यादत आह—" गारव " गाहा ॥ ज्ञानिनोऽपि गौरवत्रयप्रतिबन्धात् संयमकरणोद्यमे सीदन्तः गच्छान्निर्गत्य प्रमादारण्ये हिण्डन्ते ततः क्रियाविकलाः स्युरेव ॥ प्रमाद एव विषयकषायचौर-श्वापदाकुलत्वादरण्यं प्रमादारण्यं तस्मिन् ॥ २१-२२ ॥ ननु यो विशिष्टज्ञानो मनाक्क्रियाविकलो यश्चोत्कृष्टक्रियो मनाक्ज्ञानहीनो भवत्यनयोः कतरः श्रेयानित्याशङ्क्याह—" नाणाहिओ " गाहा । ' हीणो वि हु ' त्ति चारित्रापेक्षया ॥ अपि च " नाणा " गाहा अनेन व्यवहारतो ज्ञानं चरणरहितं स्यान्न पुनश्चरणं ज्ञानविकलं हेत्वभावादतो ज्ञानहीने द्वयमपि नास्तीति लक्षयति-परमार्थतः पुनर्ज्ञानादीनां परस्परापेक्षाणामेव कार्यकारित्वमत एव वैकल्येऽकिंचित्करतामाह—" तत्र-'नाणं-चरित्तहीणं निरत्थयं' इत्येतद्दृष्टान्तेन समर्थयति—

जहा खरो चंदणभारवाही, भारस्स भागी न हु चंदणस्स । एवं खु नाणी चरणेण हीणो, नाणस्स भागी न हु सुग्गईए ॥ ४२६ ॥
संपागडपडिसेवी, काएसु वएसु जो न उज्जमई । पवयणपाडणपरमो, सम्मत्तं कोमलं ( पेलवं ) तस्स ॥ ४२७ ॥
चरणकरणपरिहीणो, जइवि तवं चरइ सुट्ठु अइगुरुअं । सो तिल्लं व किणंतो, कंसियबुद्धो मुणेयव्वो ॥ ४२८ ॥
छज्जीवनिकायमहव्वयाण परिपालणाइ जइधम्मो । जइ पुण ताइँ न रक्खइ, भणाहि को नाम सो धम्मो ? ॥ ४२९ ॥
छज्जीवनिकायदया-विवज्जिओ नेव दिक्खिओ न गिही । जइधम्माओ चुक्को, चुक्कइ गिहिदाणधम्माओ ॥ ४३० ॥

अथ 'लिंगगहणं च दंसणविहूण'मित्यस्य संभवमाह—"संपाडग" गाहा—'संप्रकटं'—लोकसमक्षं निःशूकतया प्रतिसेवितुं निषिद्धमाचरितुं शीलमस्य स तथा। 'कायेषु'-पृथ्वीकायादिषु, व्रतेष्वहिंसादिषु, यो न उद्यच्छति। अत एव प्रवचनपातनपरमः शासनलाघवप्रधानः सम्यक्त्वं तस्य पेलवमसारमिति वाचोयुक्त्या तदभावं दर्शयति ॥ २७ ॥ अथ 'संजमहीणं च तव' मित्येतद्विस्तारयति—"चरण" गाहा। 'कंसियबुद्दो' त्ति—कांश्येन निर्वृत्तः कांसिक आदर्शस्तत्प्रधानो बोद्रो ग्रामेयकस्तैलमिव क्रीणन्। यो ह्यादर्शेन तिलान् दत्त्वा तेनैव मित्त्वा तैलं गृह्णाति स कांसिकबोद्रस्तद्वन् मन्तव्यः स्वल्पेन बहुहारणात् ॥ २८ ॥ तथाहि—"छज्जीव" गाहा। महाव्रतेषु रक्षितेषु षड्जीवनिकायो रक्षित एव तद्ग्रहणं तु पृथक् तद्रक्षणस्य प्राधान्यख्यापनार्थम् ॥ २९ ॥ किंच—"छज्जीव" गाहा। 'चुक्कइ गिहिदाणधम्माओ' त्ति गृहस्थस्य हि सत्कं सुसाधूनां कल्पते, न पुनः पार्श्वस्थादिसत्कमिति ॥ 'चुक्कइ' त्ति—भ्रस्यति ॥ ३० ॥ ननु यो यावत्करिष्यते तस्य तावान् धर्मो भविष्यति, संपूर्णगुणास्तु दुर्लभा इति। उच्यते—स्यादेवैतद्गृहिणस्तद्विरतेर्विचित्रत्वान्न पुनर्यतेस्तेन सर्वविरतेरभ्युपगतत्त्वात्तथा चाह—

सव्वाओगे जह कोइ, अमच्चो नरवइस्स घित्तूणं। आणाहरणे पावइ, वहबंधणदव्वहरणं च ॥ ४३१ ॥
तह छक्कायमहव्वय-सव्वनिवित्तीउ गिण्हिऊण जई। एगमवि विराहंतो, अमच्चरण्णो हणइ बोहिं ॥ ४३२ ॥
तो हयबोही य पच्छा, कयावराहाणुसरिसमियममियं। पुणवि भवोअहिपडिओ, भमइ जरामरणदुग्गम्मि ॥ ४३३ ॥
जइयाऽणेणं चत्तं, अप्पणयं नाणदंसणचरित्तं। तइया तस्स परेसुं, अणुकंपा नत्थि जीवेसु ॥ ४३४ ॥
छक्कायरिऊण अस्संजयाण लिंगावसेसमित्ताणं। बहुअस्संजमपवहो, खारो मइलेइ सुट्ठुअरं ॥ ४३५ ॥

'सर्वयोगान्'—समस्ताधिकारान् 'दव्वहरणं च' त्ति-सर्वस्वोद्दालनं चशब्दान्मारणं च ॥ दार्ष्टान्तिकमाह—"तह" गाहा। तथा षट्कायमहाव्रतसर्वनिवृत्तीः षट्कायमहाव्रतेषु सर्वथा रक्षणानुष्ठानद्वारेण निवृत्तयोर्नियमास्ता गृहीत्वा यतिरेकमपि कायं व्रतं वा

विराधयन् किं ?, अमर्त्यानां '–शक्रादीनां ' राजा '–प्रभुस्तस्य सम्बन्धिनीं हन्ति, बोधिं बुध्यतेऽनयेति बोधिः, कारणे कार्योपचारा-दाज्ञा तां तद्द्वारेण प्रेत्य जिनप्रणीतधर्मप्राप्तिरूपां वा बोधिं खण्डयतीति ॥ ३१–३२ ॥ " तो हय " गाहा । ' कयाव्रराहाणुसरिसं' ति–क्रियाविशेषणं विहितातिचारानुगुणं यथा भवत्येवं भ्रमति । इदमिति ज्ञानिनां प्रत्यक्षममितमनन्तं पुनरपि व्रतलाभात्प्रागित्र । ' भवोदहि ' त्ति लुप्तसप्तम्यन्तं पदं तस्मिन् भवोदधौ जरामरणाभ्यां दुर्गे पतितः सन्नित्यर्थः ॥ ३३ ॥ अन्यच्चासाविहलोकेऽपि स्वपरयोरपकारीत्याह—" जइया " गाहा–यदाऽनेनापुण्यवता त्यक्तमात्मीयं ज्ञानदर्शनचारित्रं तदा तस्य परेष्वनुकम्पा नास्ति जीवेषु । तथा चोक्तम्—परलोकविरुद्धानि, कुर्वाणं दूरतस्त्यजेत् । आत्मानं योऽतिसंधत्ते, सोऽन्यस्मै स्यात्कथं हितः ॥ १ ॥ एतदेव विशेषे-णाह—" छकाय " गाहा ' लिंगावसेसमित्ताणं ' त्ति–भक्षितसर्वसंयमत्त्वेनोद्धरितरजोहरणमात्राणाम् । ' बहुअरसंजमपवहो ' त्ति बहुर-संयमप्रवहस्तत्कार्यत्वात्पापौघो भवति । स च तिलादिक्षार इव क्षारः । यथाहि—कश्चित्क्षारो वस्त्रादिकं दग्ध्वा मलिनं करोति, तथा पापौघोऽपि तं जीवमिति ॥ ३५ ॥ कथं भगवल्लिङ्गयोगेऽपि पापसम्बन्ध इति यश्चिन्तयेत्तं व्युत्पादयितुमाह—

**किं लिंगविड्डरीधारणेण कज्जम्मि अट्ठिए ठाणे । राया न होइ सयमेव, धारयं चामराडोवे ॥ ४३६ ॥**
**जो सुत्तत्थविणिच्छिय–कयागमो मूलउत्तरगुणोहं । उव्वहइ सयाऽखलिओ, सो लिक्खइ साहुलिक्खम्मि ॥ ४३७ ॥**
**बहुदोससंकिलिट्ठो, नवरं मइलेइ चंचलसहावो । सुट्ठु वि वायामिंतो, कायं न करेइ किंचि गुणं ॥ ४३८ ॥**
**केसिंचि वरं मरणं, जीवियमन्नेसिमुभयमन्नेसिं । दद्दुरदेविच्छाए, अहियं केसिंचि उभयंपि ॥ ४३९ ॥**
**केसिंचि य परलोगो, अन्नेसिं इत्थ होइ इहलोगो । कस्सवि दुण्णवि लोगा, दोऽवि हया कस्सई लोगा ॥४४०॥**

किं वेषस्फटाटोपविधानेन कार्ये संयमरूपे स्थाने स्थिते सति साधौ । अत्र दृष्टान्तः—' राया न होइ ' त्ति यथा पृथ्वीरक्षा-दिलक्षणस्य राज्यकार्यस्याभावे चामरछत्राद्याटोपमात्रेण राजा न भवत्येवं लिङ्गमात्रेण साधुर्न भवति । किं तर्हि ? संपूर्णानुष्ठानेन

एक कार्यं-व्रतं खण्डयन् भवे भ्रमति ।

॥ ३६ ॥ एतदेवाह—"जो सुत्तत्थ" गाहा । यः कश्चित्सूत्रार्थविनिश्चयेन श्रुतसारग्रहणेन कृतो विहितः सामर्थ्यादात्मन्यागमो भगवद्वचनं येनासौ सूत्रार्थविनिश्चयकृतागमः । 'सो लिक्खइ' त्ति स साधुलेख्ये लिख्यति तस्य साधुगणनायां रेखा दीयते नान्यस्येत्यर्थः ॥ ३७ ॥ अत एवाह—"बहु" गाहा । बहुभिरज्ञानप्रधानक्रोधादिभिर्दोषैः संक्लिष्टः प्रबाधितः केवलमात्मानं मलिनयति चञ्चलस्वभावो विषयादौ चटुलचित्तः । 'सुष्ठ्वपि'–गाढमपि व्यायामयन् प्रेक्षापूर्वकारिमन्यतया कार्यं न करोति कंचिद्गुणं कर्मक्षयादिकमिति ॥ ३८ ॥ स तर्हि सम्यगनुष्ठानं कर्त्तुमशक्नुवन् म्रियतां, नैतदस्ति । मरणमपि गुणवतां श्रेष्ठं यत आह—"केसिं चि" गाहा । 'दद्दुरदेविच्छाए' त्ति दर्दुराङ्कस्य देवस्येच्छया अनेन संविधानकं सूचितम् ॥ ३९ ॥ एतमेवार्थं भङ्ग्यन्तरेणाह—"केसि चि" गाहा–केषांचित् परलोको हित इति गम्यते । अन्येषामत्र जगति इहलोको–वर्त्तमानो भवो भवति हितः । कस्यापि लोकौ हितौ कस्यापि द्वावपि हितौ लोकावहितत्वात् । कथमेतदुपपद्यत इत्यत्र दुर्दुरदेवाख्यानकमाख्यायते ॥ ४४० ॥ त्रिषष्टिनरवैडूर्य–शलाकाङ्कुरजन्मभूः । भारतं क्षेत्रमस्त्यस्मिन्, मगधो जनपदो महान् ॥ १ ॥ ग्रामाः–कुक्कुटसंपात्या, धान्यगोधनसंभृताः । यत्र नद्यः प्रतिक्रोशं, सान्द्रद्रूमविराजिताः ॥ २ ॥ यत्र च—ग्रामाः सरोभिराभान्ति, सरांसि नलिनीवनैः । नलिन्यः पद्मसंघातैः, पद्मानि भ्रमरोत्करैः ॥ ३ ॥ तत्रास्ति प्रकटं लोके, पुरं राजगृहाभिधम् । प्राकारशिखराढ्येन, प्राकारेण विराजितम् ॥ ४ ॥ यतयो यत्र दृश्यन्ते, नारंगीतरसांचिताः । सद्बोधिबीजपूराश्च, क्रीडारामोत्तमस्तथा ॥ ५ ॥ यस्मिन्नक्षैर्जयो बन्धो, मारश्चास्ति स्म सारिषु । विपदापि सदाराति चक्राक्रान्तिश्च वारिषु ॥ ६ ॥ उत्तुङ्गसौधशिखरोपरिवर्त्तिनीना–मालोकयन्वदनचन्द्रमसं वधूनाम् । यत्रादृतः कवलनाय कलङ्कलिङ्गात् राकानिशाकरमवैदिह सैंहिकेयः ॥ ७ ॥ दृप्तारिमत्तमातङ्ग–कुम्भकुट्टाकखड्गभृत् । तत्राभूद्भूपतिःश्रीमान्, श्रेणिको विश्रुतः सताम् ॥ ८ ॥ श्रीमद्वीरजिनेन्द्रस्य, स्वामिनः सिद्धिगामिनः । यः प्रणामकिणव्याजादङ्कभाले न्यवीविशत् ॥ ९ ॥ यश्चाभ्युदयिकीं दृष्टिं, क्षायिकीमपि लब्धवान् । भाविदेवचतुर्विंशत्यादिमोऽनवमोऽपि सन् ॥ १० ॥ बभूव यस्य ध्वजिनीनिवेशः, करीरवीरः कलिकोपकारी । प्रत्यर्थिपृथ्वींद्रवधूव्रजश्च, करीरवीरः कलि(रि)कोपकारी ॥ ११ ॥ स्कन्धे सूत्रत्रयं तच्छ्-

वणपुटतटे भग्नकोटीं वराटीं, रुक्षं भैक्षं कपाले स्फुटिततटमथो कण्ठपीठे कुठारम्। प्राप्ता प्रस्तावधाटी पटुपटहरवांस्तूर्णमाकर्ण्य यन्तः, स्वीचक्रुर्व्याजवेषानिति यदरिगणास्त्राणमत्राणकाः स्राक् ॥१२॥ तस्यादिमा सुनन्दाऽऽसीत् सौन्दर्यैकनिकेतनम्। श्रेष्ठश्रेष्ठिसुता श्रेयः-[1]श्रीर्नीर्द्धीरधीनिधिः ॥ १३ ॥ अद्वितीया द्वितीयाऽपि, द्वितीया चेल्लणेत्यभूत्। जज्ञेऽभयकुमाराख्यः, सुनन्दायाः सुतः कृती ॥ १४ ॥ सामभेदादिनीतिज्ञ-श्चतुर्द्धा बुद्धिबन्धुरः। लोके ज्येष्ठो लघिष्ठोऽपि, दाक्षिण्यादिगुणैर्निजैः ॥ १५ ॥ राकाशशाङ्कद्युतिकान्तकान्त्या, यदीयकीर्त्या परितः स्फुरन्त्या। कर्पूरपूराभरणाभिरामा, रामा इवामूः ककुभो बभूवुः ॥ १६ ॥ धर्म्ये कर्मणि कर्मठा व्यसनिनी प्रौढोपकारक्रमे, कुण्ठा दुर्जनचेष्टितव्यतिकरे खिन्ना परव्यंसने। सौत्सुक्या गुणसंग्रहे कृतधियामावर्ज्जने स्वैरिणी, यस्येदृश्यपि शेमुषी सुमनसां श्लाघां समासादयत् ॥ १७ ॥ स विज्ञाय गुणान् राज्ञाऽकारि सर्वाधिकारिकः। तद्राज्यं पालयामास, श्राद्धसद्धर्ममर्मवित् ॥ १८ ॥ अन्यदा केवलालोक-लोकालोकविलोककः। तत्रायातो महावीरः, सुरासुरनमस्कृतः ॥ १९ ॥ तस्यागमनमाकर्ण्य, श्रीश्रेणिकनरेश्वरः। पादारविन्दवन्दारुर्देवदेवान्तिकं ययौ ॥२०॥ केचिद्भक्त्यानुवृत्त्यान्ये, केचनाश्चर्यचर्यया। द्रष्टुं सर्वज्ञमाजग्मुर्बहवोऽन्येऽपि भूभुजः ॥ २१ ॥ यथास्थानं निविष्टेषु, तेष्वशेषेषु संसदि। स्वामिना देशनारेभे, गिरा गम्भीरधीरया ॥२२॥ वज्रपाणिरमर्त्त्येषु, चक्री नृषु यथोत्तमः। स्यान्मृगेषु मृगारातिर्भवेषु नृभवस्तथा ॥ २३ ॥ दुष्प्रापं प्राप्य तं धर्मं, ये प्रमाद्यन्ति दुर्धियः। सम्मोदका म्रियन्ते ते, बुभुक्षाक्षामकुक्षयः ॥ २४ ॥ मत्स्यण्डीक्षुरसाद्दध्नो, म्रक्षणं गृह्यते यथा। मनुष्यजन्मनः सारं, तथा धर्मोऽपि गृह्यताम् ॥ २५ ॥ असारं राज्यवाज्यादि, प्राज्यमप्यन्यदत्र हि। सत्वरं गत्वरं सर्वं, तत्त्वरध्वं हिताप्तये ॥ २६ ॥ तथाहि—लसल्लीलावतीलोल-लोचनाञ्चलयच्चलम्। जनानां जीवितं विश्वकार्याणामादिकारणम् ॥ २७ ॥ माद्यन्मत्तङ्गजोत्ताल-कर्ण्णतालचलाचलम्। यौवनं वनितालोक-लोचनानन्दनन्दनम् ॥ २८ ॥ पटियः पवनापात-पल्लवप्रान्तवेपिनी। राज्यलक्ष्मीरपि क्षोणीतलैकच्छत्र[2]मानसा ॥ २९ ॥ सावेगतङ्गदुत्तुङ्ग-भङ्गभङ्गीव भङ्गुरा। अभीप्सितपदप्राप्तिः, परोपकरणक्षमा ॥ ३० ॥ समीरलहरी-

१ श्रीनिधिर्धीरधीविधेः B. श्रीनिधिर्धीरधीनिधिः C. श्रीनिधिर्धीरधीविधिः D. २ मांसला C. D.

लोल-पताकाप्रान्तकम्पिनी । समग्रभोगसामग्री-व्यग्रीभावैककारणम् ॥ ३१ ॥ दरिद्रः क्षुत्पिपासाभ्यां, विघ्नाधिव्याधिभिर्धनी । प्रायेण लोकः सर्वोऽपि, शोकशङ्कुसमाकुलः ॥ ३२ ॥ असारेऽत्यन्तमेतस्मिन् , संसारे सर्वथा सताम् । युक्तं सद्धर्मकर्मैव, कर्त्तुं तस्माद्विमुक्तये ॥ ३३ ॥ मुनीनां श्रावकाणां च, स धर्मोऽभिदधे द्विधा । क्षमादिर्दशधा तत्र, यतिधर्म उदाहृतः ॥ ३४ ॥ द्वादशाणुव्रतादिस्तु, श्राद्धधर्मः प्रकीर्त्तितः । यथावद्विस्तरेणैष, द्विविधोऽपि प्रकीर्त्तितः ॥ ३५ ॥ देशनान्तर्गलत् कुष्ठकुष्ठिरूपधरोऽमरः । नृपभ्रान्तिकृते नत्वा, निषसादाऽन्तिकप्रभोः ॥ ३६ ॥ स प्रीतिपुलकव्यक्त्या, भक्त्या त्रिभुवनप्रभोः । गोशीर्षचन्दनेनांह्री, आलिलेप तथा यथा ॥ ३७ ॥ श्रेणिको लक्षयामास, तत्रैव निकटस्थितः । रसिकासेकमाधत्ते, पापोऽसौ स्वामिपादयोः ॥ ३८ ॥ ततोऽसौ चिन्तयामास, रोषरुषितमानसः । पापः करोति कीदृक्षमक्षुद्रं क्षतमक्षतः ॥ ३९ ॥ यः पूज्यः सर्वदेवानां, यो वन्द्यो विश्वभूभुजाम् । तमप्येवमयं मूर्खः, पूयेन परिषिञ्चति ॥ ४० ॥ " तस्याजननिरेवास्तु, प्राणिनः पापकर्म्मणः । परिभूतं गुरुं दृष्ट्वा, यस्तिष्ठति निराकुलः ॥ ४१ ॥ " तस्मादाकृष्टखड्गेन, स्वहस्तेन क्षणोम्यमुम् । यद्वा युक्तमिदानीं नैतत् , त्रिलोकीतिलकान्तिके ॥४२॥ यत्संनिधौ जिनेन्द्राणां, मारिवैराद्युपद्रवाः । विद्रवन्ति द्रुतं सर्वे, दूरतो दुरितानि च ॥ ४३ ॥ तस्मादस्मादयं स्थानात् , तावन्निर्यातु पातकी । दर्शयामि फलं येन, दुर्न्यायविषशाखिनः ॥ ४४ ॥ श्रीमद्वीरजिनेन्द्रेण, प्रस्तावेऽत्र क्षुतं कृतम् । तच्छ्रुत्वा कुष्ठिना तेन, म्रियस्वेत्युदितं वचः ॥ ४५ ॥ क्षुते राज्ञा पुनः प्रोक्तं, जीव त्वं जगतीपते ! । म्रियस्व जीव वेत्युक्तं, तेन जातक्षुतेऽभये ॥ ४६ ॥ कालसौकरिकोऽक्षौषीत् , क्षणे तत्र ततोऽवदत् । मा जीव मा म्रियस्वेति, कुष्ठी निष्ठुरया गिरा ॥ ४७ ॥ विष्टपैकप्रतीक्ष्येण, क्षुते यत्कुष्ठिना क्षणात् । म्रियस्वेत्युदितमासीत् , तेनोत्पन्नघनक्रुधा ॥ ४८ ॥ क्षिप्रमेव स्वयं राज्ञा, संज्ञिताः स्वपदातयः । स्थानादुत्थितमेतस्मादेतं गृह्णीत कुष्ठिनम् ॥ ४९ ॥ कथान्तेऽथ स उत्थाय, नत्वा नाथं च निर्ययौ । उत्तस्थुस्त्वरितास्तेऽपि, पृष्ठलग्ना पदातयः ॥५०॥ प्रेक्ष्य पृष्ठस्थितानेतान् , कृष्टखड्गोद्भटान्भटान् । तेषां स कौतुकं कर्त्तुं, सुरीभूय नभोऽभजत् ॥ ५१ ॥ तैस्ततोऽचिन्ति वैलक्ष्यरुक्षवक्त्रैः परस्परम् । प्रेक्षमाणैरयं मायागोलकः कोऽपि किं भवेत् ॥ ५२ ॥ श्रीश्रेणिकस्य तं वृत्तं, वृतान्तं प्रत्यपीपदत् । स्वामिन् !

कुष्ठी स सद्रूपः, सुरो भूत्वाऽभजन्नभः ॥५३॥ श्रुत्वा तद्विस्मयस्मेर-मुखाम्भोजो जगत्प्रभुम् । पप्रच्छ पार्थिवः स्वामिन् !, कः सः कुष्ठीति कथ्यताम् ॥ ५४ ॥ ततोऽजल्पि जगन्मौलिमाणिक्यमुकुटश्रिया । जिनेन्द्रेण यथा राजन् !, कुष्ठी नैष सुरो ह्यसौ ॥५५॥ मस्तकन्यस्तहस्ताब्ज-युग्मेनाऽभाणि भूभुजा । कोऽयं पूर्वमभूद्देव ! केन देवत्वमभ्यगात् ॥ ५६ ॥ प्राप्तः केन निमित्तेन, त्वत्पाद-पुरतः स्थितः । सुष्ठु निष्ठुरकुष्ठः संश्चक्रे च रसिकाभ्रमं ॥ ५७ ॥ कथं वाचमुवाचैवं, म्रियस्वेत्याद्यसूनृताम् । इत्याद्यावेद्यतां सद्यो, देवदेव ! प्रसीद मे ॥ ५८ ॥ त्रिलोकीतिलकेनोक्तं, श्रूयतां श्रेणिक ! त्वया । सर्वमेतत्तवाश्चर्यचर्याया एककारणम् ॥ ५९ ॥ प्रधान-नगरग्राम-गोकुलादिसमाकुलः । वत्सजनपदः ख्यातः, समस्ति श्रीनिकेतनम् ॥ ६० ॥ पुण्या पुण्यजनाकीर्ण्णा, धनाऽधीश्वरपूरिव । कोशाम्बी तत्र नगरी, गरीयःसम्पदास्पदम् ॥ ६१ ॥ माणिक्यकिंकिणीक्वाणैः, सुरमन्दिरकेतवः । श्वेतमानं यशो यस्यां, गायन्तीव यशस्विनाम् ॥ ६२ ॥ वलक्षभिक्षवो यस्यां, कुशाश्च द्विजवेश्मसु । दृश्यन्ते सर्वतः शश्वद्विप्रवालकरोचिताः ॥ ६३ ॥ उत्तरासङ्गसु-भगाः, सदा पुण्यजनोचिताः श्रावका यत्र वेश्याश्च, यथा यक्षेश्वरस्त्रियः ॥ ६४ ॥ नमत्सामन्त[१]संघात-मौलिमालार्चितक्रमः । शता-नीको नृपस्तत्र, विद्यतेऽवद्यवर्जितः ॥ ६५ ॥ रिष्टेपूत्कृष्ट[२]जम्बून्यरुणमणिगणो(णे) दाडिमीबीजपुञ्जान्, मुक्ता[३]स्वच्छोदबिन्दून् मर-कतकणिकासंकरे मुद्गपूगान् । बुध्वा बुध्वा विमुग्धाश्चटकशुकपिकीकाक[४]कीशादयस्ते, खिद्यन्ते स्वादयन्तो यदविनयकृतां शून्यसौ-धाङ्गणेषु ॥ ६६ ॥ तस्यामस्ति महापुर्यां, द्विजः सेडुवकाह्वयः । गायत्रीमात्रकेऽप्यज्ञः, साक्षादुक्षा न शृङ्गवान् ॥ ६७ ॥ अपि स्वभावसंसिद्धां, जन्मतोऽपि द्विजन्मनाम् । पौराणां पुरतः कर्त्तुं, वेत्ति न प्रार्थनामपि ॥ ६८ ॥ पाशुपाल्यं कृषिः सेवा, वाणिज्यं प्रेष्यरूपता । यद्यप्यस्ति द्विजोऽप्येतत्, तथापि न विवेद सः ॥ ६९ ॥ एवं स वर्त्तते नित्यं, भार्योपार्जितभोजनः । आपन्नसत्व-याऽसत्त्वः, सोऽन्यदा भणितस्तया ॥ ७० ॥ मूर्खशेखर ! कार्यं मे, स्यादौषधघृतादिना । निश्चिंतो वर्त्तसे तत्किं, कुरु कामप्युपार्ज-नाम् ॥ ७१ ॥ शरीरकारणे किं मे, कुरुतां बुद्धिवैभवम् । चिरायोपार्जनाकार्यं, कार्यतां मनउद्यमम् ॥ ७२ ॥ सोऽथ सज्जाञ्जलिः

१ सीमन्त C. D. २ जघन्य B. जन्तून्य D. ३ स्वेदबिन्दून् ४ चसोदयस्ते C. चासो० D.

प्राह, प्राणस्वामिनि ! सर्वथा । त्वत्प्रसादान्मया कश्चिदर्थोपायो न शिक्षितः ॥ ७३ ॥ कुर्वे किमादिशेदानीं, स्वमत्या साऽब्रवीदिदम् । श्रीशतानीकदेवस्य, कुरु सेवां सुनिष्ठुराम् ॥ ७४ ॥ यतः—" सुवर्णपुष्पां पृथिवीं, चिन्वन्ति पुरुषास्त्रयः । शूरश्च कृतविद्यश्च, यश्च जानाति सेवितुम् ॥ ७५ ॥ " ततः सर्वात्मना मूर्खग्रहेण गृहिणीमुखः । सेवते स शतानीकं, ढौकयन् कुसुमादिकम् ॥ ७६ ॥ सेवाग्रहमुदीक्ष्याऽस्य, नृपोऽवोचत्कदाचन । तुष्टस्ते सेवया विप्र !, प्रयच्छामि यदिच्छसि ॥ ७७ ॥ तेनोक्तं कृतकृत्योऽस्मि, प्रसादादेव देव ! ते । प्रार्थयिष्ये विशेषेण, यद्भणिष्यति भट्टिनी ॥ ७८ ॥ आराधयाम्यहोरात्रं, देव ! तां देवतामिव । भोक्तास्मि कापिलात्येव, कर्त्री सर्वत्र सैव मे ॥ ७९ ॥ अत्यार्जवं विलोक्यास्य, स्मित्वा भूपतिरभ्यधात् । याहि तत्पृच्छ्यतां तत्त्वमित्युक्तोऽसौ गतो गृहान् ॥ ८० ॥ ब्राह्मणीमभणद्भद्रे ! नृपतिर्मेऽद्य तुष्टवान् । तद्ब्रूहि राज्यत्राज्यादि, प्रार्थये पार्थिवं कियत् ॥ ८१ ॥ चतुरा चिन्तयामास, सा स्वायतिविलोकिनी । अस्यावश्यं भविष्यन्ति, हुं तरुण्योऽपराः प्रियाः ॥ ८२ ॥ यतः—प्रवर्द्धमानः पुरुषस्त्रयाणामुपघातकः । पूर्वोपार्जितमित्राणां, दाराणामथ वेश्मनाम् ॥ ८३ ॥ तयोक्तमथ राज्येन, किं द्विजानां सपाप्मना । प्रार्थनीयं तदेवात्र, यल्लोकद्वयसाधकम् ॥ ८४ ॥ मार्गणीयस्ततो भूभृत् त्वया ग्रासनभोजनम् । दीनारो दक्षिणायां च, धौतपोतिकया समम् ॥ ८५ ॥ अस्माकमियता किं न, प्रत्यहं परिपूर्यते । एकां च घटिकां यावद्वान्यो (द्राच्यो) जल्पमुपांसु सः ॥ ८६ ॥ किं न श्रुतं त्वया—कालेऽन्नात्सघृतादुष्णादच्छिद्रात् सितवाससः । अपराऽप्रेष्यभावाच्च, शेषमिच्छन्पतत्यधः ॥ ८७ ॥ एनमादेशमादाय, स ययावुपपार्थिवम् । यथोक्तं प्रार्थयामास, प्रत्यश्रोषीन्नृपोऽपि तद् ॥८८॥ ततः प्रभृति तत्सर्वं, कुर्वाणं वीक्ष्य भूभुजम् । चिन्तयामासुरन्येऽपि, भूपतेः पार्श्ववर्त्तिनः ॥ ८९ ॥ महाप्रसादमेतस्य, प्रत्यहं कुरुते नृपः । यतोऽतो वयमप्येतं, पूजयामः प्रयत्नतः ॥ ९० ॥ यतः—यथा व्यालगजारोहः, कालसर्पोपसर्पणम् । पिशाचपरिषत्प्राप्तिस्तथा सेवा महीभुजाम् ॥ ९१ ॥ ये सदैव मृदूत्ताल-द्विजिह्वाश्रयतां गताः । नृपाः सर्पाश्च ते लोके, कस्य विश्वासहेतवः ॥ ९२ ॥ क्षारचित्ते कृते राज्ञि, तत्कदाचन केनचित् । स्यादस्मादपि सान्निध्यं, भूपतेरतिवल्लभात् ॥ ९३ ॥ एवं विचिन्त्य सोऽमात्यो, द्वाःस्थितान्तपुरादिभिः । भोज्यते स्वगृहं नीत्वा, दीयते दक्षिणां क्षणात् ॥९४॥

ततः स तादृशाल्लाभा--दभूत्समधिकर्द्धिकः । पुत्रपौत्रादिभिः प्रापत्, परां वृद्धिमथाचिरात् ॥ ९५ ॥ एवं च दक्षिणालोभाद्भुञ्जानस्य गृहे गृहे । अजीर्णाद्वमतस्तस्य, त्वग्दोषोऽभूद्भयानकः ॥ ९६ ॥ शीर्णघ्राणो व्रणाघ्रातः, प्रस्रवत्पूयगन्धतः । मक्षिकावेष्टितः कष्टामवस्थामास्थितस्ततः ॥ ९७ ॥ तथापि पूर्ववद्राज्ञो, बुभुजे भासने स्थितः । कुष्ठी वर्त्तेऽहमित्येवं, न शशङ्के मनागपि ॥ ९८ ॥ "कुष्ठिनः कुलटायाश्च, स्पष्टं निष्टाङ्कितैकता । वर्ज्यमानौ जनैर्यौ हि, निःशूकावुपसर्पतः ॥ ९९ ॥" अदत्तो दक्षिणालोभात्, पञ्चकेष्वपि वेश्मसु । व्याधिर्वृद्धिमधात्तस्य, सार्द्धं जनजुगुप्सया ॥ १०० ॥ विषं वैश्वानरो व्याधिर्दुर्ज्जनः स्वैरचारिता । अप्रतिक्रियमाणानि, मारयन्ति न संशयः ॥ १ ॥ विज्ञप्तं मन्त्रिभिर्देव ! त्वदभ्रासनभोजनम् । न युक्तमस्य विप्रस्य, संचरिष्णुरियं रुजा ॥ २ ॥ एकत्र भोजनात्स्पर्शादेकशय्यासनस्थितेः । संक्रान्तिर्जायते व्याधेरिति शास्त्रे यदुच्यते ॥ ३ ॥ ततो राजकूले राजन्नागच्छन्नेष वार्यताम् । सन्ति सन्तः सुतास्तस्य, भोज्यन्तां नीरुजोऽत्र ते ॥ ४ ॥ ओमित्युक्ते नरेन्द्रेण, मन्त्रिणा स निवारितः । इत्यभाणि च भोक्तव्यमितः पुत्रैर्नृपान्तिके ॥ ५ ॥ ततश्च भुज्यते तद्वाद्विश्रुतास्तव तत्सुताः । स तस्थौ दुस्थितावस्थः, स्वगृहे दुर्मना मनाक् ॥ ६ ॥ व्याधिव्याप्तौ क्रमेणास्य, कुटुम्बक्षेमकाम्यया । कुटीरं कारितं किंचित्क्वचिद्गेहाद्बहिः सुतैः ॥ ७ ॥ तत्र दुर्गन्धसम्बद्ध--मक्षिकामात्रमैत्र्यकम् । जुगुप्सां वीप्सया कुर्वंस्तं न कोऽप्युपसर्पति ॥८॥ कुङ्कुमागुरुकर्पूर-कस्तूरीस्तबकाञ्चिताः । नान्तिकाऽध्वनि यान्त्यस्तं, वीक्षन्तेऽपि वधूटिकाः ॥ ९ ॥ तद्वचो नानुतिष्ठन्ति, निष्ठीवन्ति मुहुर्मुहुः । काशमानं हसन्त्युच्चै-र्यौवनोन्माददुर्द्धराः ॥ ११० ॥ खिद्यमानमना मानी, निष्फलं स ज्वलन् क्रुधा । नम्रास्यः खरवद्गृष्टौ, निश्चेष्टोऽस्ति कुटीरके ॥ ११ ॥ पिपासाऽनाशितस्वान्तः, क्षामकुक्षिर्बुभुक्षया । मुहुः श्वपाकवन्मार्गन्नाप्नोत्यम्भो न भोजनम् ॥ १२ ॥ बहूक्ता बेटिका किंचित्कदाचन ददाति चेत् । पिधाय वाससा नाशां, तथाप्यभ्येति तीव्रवाक् ॥ १३ ॥ इत्याद्यवज्ञया दग्धः, स्निग्धोऽपि प्रागभूद्विषन् । क्रोधाभिमानशोकार्त्ति-दुःस्थितः सन्नचिन्तयत् ॥ १४ ॥ अहो एतावतीमेतां, प्रतिष्ठां प्रापितं मया । कुटुम्बं मां पुनर्द्वेष्टि, धिग्धिगस्य कृतघ्नताम् ॥१५॥ " आपीय प्रणयात्पयांसि पयसां पत्युर्निपत्योदरे, पाथोदाः परितान्तरिक्षकुहरं प्रापुः परामुन्नतिम् । तस्यैवोपरि विस्तरालविलसज्जिह्वालविद्युद्युतो,

गर्जन्त्युर्जितसर्जितप्रतिरवा धिग्धिक्कृतघ्नानिमान् ॥ १६ ॥" "घुण इव घृणाविहीनो, यस्मिन्वंशे खलः खलूत्पन्नः। शतशश्छि-
द्राण्युत्पाद्य, पातयत्याशु तं मूलात् ॥ १७ ॥" तथा—"जस्सेव पहावुम्मिलियाइं, तं चेव हयकयग्घाइं। कुमुयाइं अप्पसंभावि-
याइं चंदं उवहसंति ॥ १८ ॥" एवमेतेऽपि मत्पुत्रा, मयैव प्रापिताः श्रियम्। पराभवन्ति मामेव, परमार्थेन वैरिणः ॥ १९ ॥
तत्सर्वान्भोजयाम्येतान्, फलमन्यायदुस्तरोः। नभस्तो मस्तके वज्रं, पातयामि दुरात्मनाम् ॥ १२० ॥ अद्य वज्राग्निभिर्दग्धो, विद-
ग्धोऽपि करोमि किम्। अतिनिर्मथनादग्निश्चन्दनादपि जायते ॥ २१ ॥ किंचिदालोच्य चित्तेन, तेन ते बकवृत्तिना। व्यक्तमुक्ता
यथा वत्सा! निर्विण्णो जीवितादहम् ॥ २२ ॥ ततः कृत्वा कुलाचारं, मोक्तुमिच्छाम्यसून् क्वचित्। तीर्थे श्रुत्वा तदेतत्ते, प्रमोदे-
नाब्रुवन्निदम् ॥ २३ ॥ तात! पातकिरोगोऽयमित्थमेव प्रशाम्यति। जन्मान्तरेऽपि नोऽपैति, तद्विदध्याः किमुच्यताम् ॥ २४ ॥ स
प्राहाऽस्मत् कुले पुत्राः! क्रमोऽयं यन्मुमूर्षुभिः। मंत्रोक्षितः पशुर्देयः, स्वबन्धुभ्यो हितैषिभिः ॥ २५ ॥ तस्माद्वत्सं बलीयांसं, सुप्र-
माणं सुदर्शनम्। आनयध्वं कुटीरेऽस्मिन्, कुलक्रमविधित्सया ॥ २६ ॥ युष्माभिः खादयित्वाशु, मन्त्रैस्तु संस्कृतीकृतम्। सार्द्धं
सर्वकुटुम्बेन, कुर्वे कार्यमनाकुलः ॥ २७ ॥ तैरप्यज्ञाततद्भावैर्मुग्धत्वात्तत्कुटीरके। बबन्धे तादृशो वत्सो, वचनानन्तरं मुदा ॥ २८ ॥
उद्वर्त्योद्वर्त्य नित्यं स, स्वशरीरकमादरात्। संक्रमाय स्वकव्याधेर्ददौ वत्साय वर्त्तिकाः ॥ २९ ॥ ताश्चरन्नचिरेणैव, सुष्ठु कुष्ठी
ततोऽप्यभूत्। यदा तदानीं पुत्रेभ्यः स तं भोज्यार्थमार्पिपत् ॥ १३० ॥ तैरप्यज्ञाततच्चित्तैर्भक्षिते पिशिते पशोः। यामि सांप्रतमा-
पृष्टाः, सुतास्तीर्थे क्वचिन्म्रिये ॥ ३१ ॥ इति प्रमद्वरः प्रोच्य, द्विजः स निरगाद्गृहात्। कुष्ठिनो दूरतस्त्यागात्, तेऽप्यभूवन् प्रम-
द्वराः ॥ ३२ ॥ मन्दं मन्दमयं पादैः, क्षुधीरूर्ध्वमुखोऽगमत्। निर्जनामटवीमेकां, कालरात्रिमिव स्वयम् ॥ ३३ ॥ शाखामृगाः सुव-
र्णाभाः, षट्पदाः श्यामलत्विषः। यस्यां पक्वफलायन्ते, शाखिशाखाशिखाश्रिताः ॥३४॥ सदा शुभ्राजितानेक—विरुद्धागमविस्तराः।
[1]लसत्सकुंतलकुचा–[2]भोगरामास्वसद्भुवि( द्रुचिः) ॥३५॥ अक्षमालोपलाभा या, पिहिता बहुशोभया। सत्फलामलकान्ता च, मूर्त्ति-

१ अनत्थ B. २ भोग रामाश्च सद्भुवि D. रुचिः C.

जैंनमुनेरिव ॥ ३६ ॥ युग्मम् । तपनातपसंपातात्, क्षुद्रसत्वभयादपि । उष्णे तृष्णगतीवाभूदम्भोऽन्वेष्टुं प्रचक्रमे ॥ ३७ ॥ अम्भोथैं भ्राम्यता तेन, गिरीणां गह्वरोदरे । क्वचिदालोकयां चक्रे, तज्जीवितमिवात्मनः ॥ ३८ ॥ कलिद्रुमशमीधात्री, पिचुमन्दाऽभयादिभिः । सर्वतः संपरिक्षिप्ते, ह्रदे तुच्छजलास्पदे ॥ ३९ ॥ तीरवृक्षावलेः पत्रैः, फलैः पुष्पैश्च सन्ततम् । पतद्भिः कल्कवज्जातं, तत्र ग्रीष्मोष्मणा जलम् ॥ १४० ॥ तद्दृष्ट्वा हृदयं तस्य, समुच्छ्वास तत्क्षणात् । इन्द्रियाणि च जातानि, स्वार्थग्रहपटून्यलम् ॥ ४१ ॥ तेन विश्रम्य विश्रम्य, कल्काकारं जलं ततः । प्रारेभे पातुमत्यन्तं, पिपासाविगमार्थिना ॥ ४२ ॥ यथा यथौषधक्वाथकल्पं तत्स पयोऽपिबत् । तथा तथाऽस्य संजज्ञे, विरेकः कृमिजालवान् ॥ ४३ ॥ पथ्यं हरीतकीधात्रो, फलैरेव प्रकल्पयन् । सेवते स्म घनच्छायां, सदा तेषां महीरुहाम् ॥ ४४ ॥ एवं कतिपयैरेव, वासरैस्तच्छरीरकम् । चक्रे रसायनेनेव, नीरुक्तेनाम्बुनाऽधिकम् ॥४५॥ या न चिन्तयितुं शक्या, न कर्त्तुं नापि भाषितुम् । साऽप्यवस्था भवत्येव, विधावभिमुखे सति ॥ ४६ ॥ अनुकूले विधौ पुंसां, विषमप्यमृतायते । विपरीते पुनस्तस्मिन्नप्यमृतं विषायते ॥ ४७ ॥ विधिः पितेव सर्वत्र, कदाचित् परिरक्षति । कदाचित्पीडयत्येव, दायाद इव दुर्दमः ॥ ४८ ॥ न यत् पुरुषकारेण, साध्यं धीसम्पदा न च । तदेकं दैवमेवेह, बलिभ्यो बलवत्तरम् ॥ ४९ ॥ परोपतापिनां सौख्यं, दौस्थ्यं परहितैषिणाम् । यदत्र जायते सोऽयमन्यायोऽस्य महान्विधेः ॥ १५० ॥ अथ तेन स्वदेहस्य, वीक्ष्य सौन्दर्यसम्पदम् । चिन्तितं दर्शयाम्येतां, स्वलोकाय वपुःश्रियम् ॥ ५१ ॥ किं तया सारयाऽप्यत्र, जातया सम्पदा नृणाम् । यां न पश्यन्ति लोकाः स्वे, प्रमादोत्फुल्ललोचनाः ॥ ५२ ॥ पुत्राः सह कलत्रैश्च, श्रयन्ते यादृशीं दशाम् । पश्यामि तादृशीं तेषां, तां च तातैकविद्विषाम् ॥ ५३ ॥ स्वयं संपादितं सद्यो, द्विषां द्वेषस्य यः फलम् । स्वचक्षुर्भ्यां निरीक्षेत, जन्म तस्य प्रशस्यते ॥ ५४ ॥ ” इत्यालोच्य दुराचारः, स स्वपत्तनमीयिवान् । कथंचित्प्रत्यभिज्ञातः, पपृच्छे सहवासिभिः ॥ ५५ ॥ केन भद्र ! तवापास्तं, तत्कुष्ठं सुष्ठु निष्ठुरम् । स प्राह सुप्रसन्ना मां, देवतैवंविधं व्यधात् ॥ ५६ ॥ तैरुक्तं त्वं कृती विप्र ! प्रसन्ना यस्य देवता । स्तूयमानो जनैरेवं, स विवेश स्वमन्दिरम् ॥ ५७ ॥ दृष्ट्वा तान् कुष्ठिनः पुत्रान्, सकुटुम्बानवोचत । सहर्षं मदवज्ञाया, भवद्भिर्भुज्यतां

फलम् ॥ ५८ ॥ पुत्रैः प्रजल्पितं पाप ! किं तवैतद्विजृम्भितम् । तेनोक्तं मां विना शक्तिः, कस्य स्यादीदृशी भुवि ॥ ५९ ॥ आः पाप ! किं त्वयेदृक्षं, विरुद्धं धर्मलोकयोः । निस्त्रिंशेन समाचीर्णमित्युचुस्तेऽतिदुःखिताः ॥ १६० ॥ तेनोक्तं किं रे पापा ! मामाक्रोशथ दुर्मुखाः । किं नाम विस्मृतं यद्वो, यत्ताते मय्यनुष्ठितम् ॥ ६१ ॥ महतोऽपि स्वदोषान्नो, परदोषांस्त्वणूनपि । पश्यत्यपूर्वमन्धत्वमहो लोकस्य दृश्यते ॥ ६२ ॥ तं क्रूरकलहाक्रोशैः, साकं पुत्रैरुपस्थितम् । लोकोऽप्यालोक्य धिग्जातिं, धिक्कर्त्तुं प्रावृतद्यथा ॥ ६३ ॥ स्वयमारोपितारामे, पत्रपुष्पफलस्फुटे । स्वकुले किं त्वया पाप ! प्रदत्तोऽयं तनूनपात् ॥ ६४ ॥ प्रतीतं प्राकृतस्यापि यत्ते तदपि विस्मृतम् । " विषवृक्षोऽपि संवर्ध्य, स्वयं छेत्तुमसाम्प्रतम् " ॥ ६५ ॥ धिक्कारानिति दुर्वारानाप्नुवन्ननिशं जनात् । अस्वल्पकज्जलालेप-श्यामलास्यीभवंस्तथा ॥ ६६ ॥ दीनो दिवसमप्येकं, तत्र स्थातुमपारयन् । निशीथे निरगान्निःश्री-र्भूप ! हे प्रापिवानिह ॥ ६७ ॥ अजानन् जीविकामन्यां, गोपुरद्वारपालकम् । प्रारेभे सेवितुं सम्यगभूद्विश्रम्भभाजनम् ॥ ६८ ॥ कदाचिद्वयमत्रैव, स्वविहारक्रमोद्यमात् । राजन् । राजगृहद्वारि, प्राप्तास्त्वां चाभिवन्दितुम् ॥ ६९ ॥ ततो दौवारिकेणासावुक्तो भद्र ! अभिवन्दितुम् । भगवन्तं व्रजिष्यामि, त्वया पुनरिहास्यताम् ॥ १७० ॥ तावत्क्वापि न गन्तव्यं, स्थानादस्माद् ध्रुवं त्वया । यावदेम्यहमित्युक्त्वा, तेन मत्पार्श्वमाययौ ॥ ७१ ॥ द्विजस्तु तस्थिवांस्तत्र, दुर्गादेवीपुरस्थितम् । नैवेद्यं निगिलन्नुच्चै-र्नैनाम विरराम सः ॥ ७२ ॥ बाहुल्याद्बलिभक्ष्यस्य, जिह्वालाम्पट्यपाटवात् । रङ्कराजवदात्मानं, कण्ठपूरमपूरयत् ॥ ७३ ॥ भक्षणाद्रूक्षभक्ष्यस्य, ग्रीष्मत्वात्समयस्य च । उदन्या दुःखितोऽध्यायत्, धन्यास्ते मत्स्यकच्छपाः ॥ ७४ ॥ आर्त्तैनैतेन तिर्यक्षु, बद्धायुर्बाधितस्तृषा । आरटन्नुन्मुखो मूर्खः, क्षणात्प्राप्तः परासुताम् ॥ ७५ ॥ अत्रैव नगरे वाप्यां, दर्दुरीगर्भतां गतः । जज्ञे स समये संज्ञी, प्राप्तवान्प्रौढतां क्रमात् ॥ ७६ ॥ विहारक्रमयोगेन, वयमत्र पुरे पुनः । प्राप्तास्त्वमपि भूपेन्द्र ! वन्दनार्थमुपागतः ॥ ७७ ॥ पुरक्षोभोऽभवद्भूयः, प्रोचुः पानीयहारिकाः । सद्धर्मदेशनावाक्य-रहस्याकर्णनोत्सुकाः ॥ ७८ ॥ एका प्राह हला देहि, मार्गमग्रं च मुञ्च मे । यास्यामहं जिनं नन्तुमभिश्रोतुमुपासितुम् ॥ ७९ ॥ अन्याह नागमः किं त्वं, श्वश्रूः किं तेऽपि कर्कशा । पापामृतं वहाम्येतल्लभे धर्म्मामृतं न तत् ॥१८०॥

अपराऽऽह त्वरस्व त्वं, यास्यावः सममेव वां । पत्याहमनुजज्ञे तत् , पृच्छ त्वमपि वल्लभम् ॥ ८१ ॥ पानीयहारिकाशब्दानित्या-
दीन् दर्दुरः स तान् । आकर्ण्णयंस्तदा दध्यौ, पूर्वकृतमिदं क्वचित् ॥ ८२ ॥ स्यात्पुनः क्वेति तात्पर्यादीहापोहं प्रकुर्वतः । संज्ञि-
त्वात्तस्य संजज्ञे, जातिस्मरणमुज्ज्वलम् ॥ ८३ ॥ मां धृत्वा स पुरद्वारि, द्वारपालं यमर्हितुम् । आसीद्गतः स एष स्यादागतो भग
वान्बहिः ॥ ८४ ॥ तदा न वन्दितो येन, मया पापीयसा प्रभुः । तेन दर्दुरता सेयं, फलं तस्यानुभूयते ॥ ८५ ॥ तत्साम्प्रतमपि
स्वस्य, पूरयामि मनोरथान् । परः कोऽत्रसरः स्यान्मे, क्व कदा वेति वेदकः ॥ ८६ ॥ सार्द्धं श्रद्धावताऽनेन, जनेन प्रणिनंसुना ।
भदन्तं वन्दितुं यामि, स्वीकरोम्यद्भुतं फलम् ॥ ८७ ॥ उत्प्लुत्योत्प्लुत्य मत्पार्श्वं, यावदायातुमुद्यतः । तावत्त्वत्तुरगेणासौ, खुरेणा-
क्रम्य चूर्णितः ॥ ८८ ॥ प्रधानप्रणिधानस्यानुभावेन मृतस्ततः । दर्दुराङ्केषु देवेषु, प्रादुरासीन्महासुरः ॥ ८९ ॥ जीवानां भावसं-
शुद्धिर्विज्ञेया साध्यसाधनी । अन्यथालिङ्ग्यते कान्ता, दुहिता पुनरन्यथा ॥ १९० ॥ क्रियाशून्यो हि यो भावो, भावशुन्या च या
क्रिया । अनयोरन्तरं ज्ञेयं, भानुखद्योतयोरिव ॥ ९१ ॥ तदस्य भावसंशुद्धे–र्बद्धबुद्धेः शुभाध्वनि । अभूद्देवतयोत्पत्तिस्तद्भावः पुण्य-
कारणम् ॥ ९२ ॥ श्रीवीरस्यैष पृथ्वीशः, श्रेणिकः श्रावकाऽग्रणीः । मयाऽपि तीर्थकृद्भक्तेः, शक्यश्चालयितुं न हि ॥९३॥ श्रेणिक !
त्वं सुधर्मायां, सभायामित्यशस्यथाः । अग्रतः स्वर्गिवर्गस्य, समग्रस्य बिडौजसा ॥ ९४ ॥ एतदश्रद्दधानोऽसौ, त्वत्परीक्षार्थमागमत् ।
अमरः कुष्ठिरूपेण, त्वद्दृष्टेर्मोहमादधौ ॥ ९५ ॥ गोशीर्षचन्दनेनांह्री, सिञ्चति स्म मदादरात् । त्वया तु रसिकासेकं, करोतीति
निरैक्ष्यत ॥ ९६ ॥ यत्पुनः प्रोक्तवानेष, म्रियस्वेति मया क्षुते । तदभक्त्या न भक्त्यैव, सत्प्रयोजनमब्रवीत् ॥ ९७ ॥ व्याख्याक्षु-
दादिखेदेन, किमर्थं स्थीयते भवे । मोक्षमेकान्तसौख्यं त्वं, मृत्वा याहीति सोऽवदत् ॥ ९८ ॥ प्राज्यराज्यार्ज्जितं सौख्यं, जीवतो
जगतीश ! ते । मृत्यौ तु दुर्गतिस्तेन, त्वां जीवेति गिराऽगृणात् ॥ ९९ ॥ त्वत्सुनोर्जीवतः पुण्यं, मृतस्य सुरसम्पदः । यदृच्छा
तेन तेनोक्ता, जीव वा त्वं म्रियस्व वा ॥ २०० ॥ कालसौकरिकः प्राणान् , पापमापद्यतेतराम् । मृतस्तु दुर्गतौ गन्ता, निषिद्धस्त-
द्भयादपि ॥ १ ॥ अथाकर्ण्ण्यात्मनः पातं, दुर्गतौ श्रेणिकः क्षणात् । कामं श्यामुखच्छायस्तीर्थनाथं व्यजिज्ञपत् ॥ २ ॥ युष्माद-

शेष्वपीशेषु, दुर्गत्युदधिसेतुषु । भाविनी भगवन्नेषा, कथं मे दुर्गतौ गतिः ॥ ३ ॥ जन्मन्यस्मिन्नभूदेतत्त्वं स्वामी सेवकस्त्वहम् । एवं स्थितेऽपि मे दौस्थ्यं, सा स्वामिंस्तव वाच्यता ॥ ४ ॥ किं ममापि विकल्पोऽभू-स्त्वद्भक्तौ भगवन्निह । अथवा योग्यता नास्ति, त्वत्प्रसादस्य मे प्रभो ? ॥ ५ ॥ दंभोलिदण्डवत्किंवा, त्वमेव सुष्ठु निष्ठुरः । नाऽप्रमादं प्रसादं मे, भक्त्यैवमपि यासि तत् ॥ ६ ॥ मेरुं दण्डं महीं छत्रं, कर्त्तुं ये प्रभविष्णवः । तेषां च क्वाप्यसामर्थ्यमिति श्रद्धीयते कथम् ॥ ७ ॥ व्याजहार जिनो भूप ! बद्धायुर्नरके भवान् । प्रागेव तेन तेऽवश्यं, गतिस्तत्र भविष्यति ॥ ८ ॥ जन्मन्यत्र यथा बद्ध-मायुर्वेद्यं तथैव तत् । नरकेषु स्वभावोऽयं, न शक्यः कर्त्तुमन्यथा ॥९॥ आत्मा नाणुरणुर्नात्मा, कर्तुं केनापि शक्यते । अवश्यं भाविभावेऽस्मि-न्नाशक्तिरियता नृणाम् ॥ २१० ॥ किंवा—भविष्यन्त्यां चतुर्विंश-त्यर्हत्पङ्क्तौ भविष्यसि । त्वमाद्योऽर्हन्महापद्मो, माऽधृतिं भूप ! तत्कृथाः ॥११॥ श्रुत्वा तत्प्रमदोत्कर्षफुल्ललोचनपङ्कजः । प्रणम्य प्राञ्जलिः पृथ्वी-नाथो नाथमवोचत ॥ १२ ॥ किं नाम विद्यते स्वामि-न्नुपायः कोऽपि नेदृशः । न यामि यादृशेनास्मि, नारकावासवेश्मसु ॥ १३ ॥ स्वामिना जानताऽप्यर्थ-मभविष्णुममुं ध्रुवम् । तस्य प्रोक्तमधीरस्य, धीरतोत्पत्तिहेतवे ॥ १४ ॥ प्रीत्या महातपस्विभ्यः, कपिला ब्राह्मणी यदि । भिक्षां क्षोणीश्वर ! स्वैरं, सकृदप्यत्र दापयेः ॥ १५ ॥ कालशौकरिकं शूनां, त्याजयेर्यदि वा दिनम् । तदानीं दुर्गतिप्राप्तेस्तव मोक्षोऽस्ति नान्यथा ॥ १६ ॥ कार्यतात्पर्यमालोक्य, स्वस्य साध्यमिदं क्षणात् । मानसे स प्रमोदेन, नरीनर्त्ति स विस्मयात् ॥ १७ ॥ त्रिलोकीतिलकं नत्वा, निवृत्तः स्वपुरं प्रति । जिनेशशासने श्रद्ध-दक्षोभ्यस्त्रिदशैरपि ॥ १८ ॥ प्रस्तावे सोऽत्र सम्यक्त्वं, दर्दुराङ्कः परीक्षितुम् । प्रस्थास्नोर्भूपतेर्मार्गे, दृष्टिमोहममुं व्यधात् ॥१९॥ गृहीतवडिशं साधु-मूर्ध्वज्ञं स(शि)रसीतटे । आदाय मत्स्यानैक्षिष्ट, भूमीभृद्भृतझोलिकम् ॥२२०॥ वीक्ष्यैतच्चिन्तयामास हा हा धिक्कर्मगौरवम् । यज्जिनेन्द्रव्रतस्थोऽपि, जज्ञेऽसौ मत्स्यबन्धकः ॥ २१ ॥ व्रजन्तीं ध्वजिनीं कृत्वा, परिवर्त्य तुरङ्गमम् । एकाकी श्रेणिकस्तस्य, समीपे समुपागमत् ॥ २२ ॥ तमाख्यन्मञ्जुलालापैः, किमेतत्तव चेष्टितम् । त्वं हि जैनमुनिर्म्लेच्छाश्छिन्दते मत्स्यकच्छपान् ॥ २३ ॥ सुरा च पञ्चगव्यं च, यद्येते योगमर्हतः । अमत्रे क्वचिदेकत्र, साधो ! ब्रूहि त्वमेव तत् ॥ २४ ॥ जैनेन्द्र-

शासने स्पष्ट–स्फटिकोपलनिर्मले। पापमेतत्प्रकुर्वाणः, कलङ्कस्तवकायसे ॥ २५ ॥ साक्षेपमाचचक्षे स, त्वं किमेवं प्रजल्पसि। यत्र स्युस्तादृशाः श्राद्धाः, किमन्यत्तत्र जायते ॥ २६ ॥ और्णिको नास्ति मे कल्पः, किं व्रतं तं विना च मे। धर्मोपकरणे चिन्तां, त्वं कदाचन किं व्यधाः? ॥२७॥ मात्स्यैरेतैस्ततः कल्पं, क्रेष्यामि व्रतवृद्धये। नृपोऽजल्पदयुक्तोऽस्मि, मिथ्यादुष्कृतमस्तु मे ॥२८॥ रत्नकम्बलमादत्स्व, प्रसीद त्यज दुष्क्रियाम्। बोधयित्वेति तं भूयः, पार्थिवः प्रस्थितः पुरः ॥ २९ ॥ प्रेक्षामास ततोऽप्यग्रे, कज्जलाञ्छितलोचनाम्। गर्भिणीमार्यिकां याच–मानां हट्टे वराटकान् ॥ २३० ॥ तत्रापि प्राणिनामेव, दुष्कर्मत्वमचिन्तयत्। जैनेन्द्रशासने शङ्कां, न त्वल्पामप्यकल्पयत् ॥ ३१ ॥ तामप्यत्रीवदत्तद्वत्, पार्थिवः साप्यदोऽवदत्। राजन्! जातमिदं तावत्, किमतिक्रान्तचिन्तया ॥३२॥ साम्प्रतं प्रसवासत्तिस्तद्घृताद्यैः प्रयोजनम्। न चान्यास्ति गतिस्तेन, याचे हट्टे वराटकान् ॥३३॥ मा भूच्छासनमालिन्यमित्येकान्तगृहे क्वचित्। एनामानाययामास, मम (माभार) भोभो इतोऽवदत् ॥३४॥ यदैवं नैव सम्यक्त्वात्, कथंचिदचलत्ततः। प्रत्यक्षीभूय भूमिभृद्देवेनेदमभाष्यत ॥ ३५ ॥ भो भोः श्रेणिक! यादृक्षस्तमृभुक्षापरीक्षितः। तादृक्ष एव जैनेन्द्रशासने त्वं सुनिश्चलः ॥ ३६ ॥ त्रिदशो दर्दुराङ्कोऽहं, त्वत्परीक्षार्थमागमम्। मयैवाकारि सर्वेयं, कुश्रिसाध्व्यादिविक्रिया ॥ ३७ ॥ मनागपि न तु क्षोभः, समजायत जातु ते। न किं वज्रमणेर्भेदे, भिद्यन्ते लोहशुचयः ॥ ३८ ॥ तद्गृहाण विभो! हारं, गोलकद्वितयं तथा। क्रीडार्थमिति गीर्वाणस्तस्मै तत्सर्वमार्पिपत् ॥ ३९ ॥ तारं हारं तथा छिन्नं, योऽमुं सन्धास्यते पुमान्। न जीविष्यत्यसावेव, मुक्त्वा सोऽन्तर्दधे सुरः ॥ २४० ॥ श्रेणिकश्चेल्लणादेव्यास्तं तारं हारमार्पयत्। गोलकद्वितयं तत्तु, सुनन्दायाः प्रदत्तवान् ॥ ४१ ॥ तेनानन्दमविन्दाना, सुनन्दा प्रकटेर्ष्यया। भित्तावास्फोटयामास, तौ गोलौ स्फुटितौ स्फुटम् ॥ ४२ ॥ तस्मादकस्मादेकस्माद्विस्मयैकनिकेतनम्। देवदूष्यद्वयं सद्यः, प्रादुरासीद्विकस्वरम् ॥ ४३ ॥ द्विधाभूताद्द्वितीयस्मात्पुष्पदन्तद्वयद्युति। कुण्डलद्वितयं दिव्य–रत्नरम्यं प्रकट्यभूत् ॥ ४४ ॥ चेल्लणा च सुनन्दा च, देव्यौ द्वे अपि तत्क्षणात्। हर्षोत्कर्षेण रत्नानि, तान्यङ्गेष्वप्यनह्यताम् ॥ ४५ ॥ नृपेणापि गृहं गत्वा, जल्पिता कपिला स्वयम्। देहि भिक्षां तपस्विभ्यो, याचसे यद्ददामि तत् ॥ ४६ ॥ साऽवादीद्यदि मां देव! सर्वामपि

हिरण्मयीम् । करोषि न तथाप्येतत् । करिष्यामि कदाचन ॥ ४७ ॥ भूयसा वा किमुक्तेन, कल्पयेः कणशोऽपि चेत् । कुर्वे तथापि नाऽकार्यं, त्वदायत्तं तु जीवितम् ॥ ४८ ॥ कालशौकरिकोऽप्येवं, प्रोचे भूमिभृता भृशम् । शूनां त्यजाऽद्य येन त्वामदरिद्रं करोमि भोः ॥ ४९ ॥ सोऽवोचत्कः किलास्यां स्याद्दोषः कथय भूपते ! । येन मां त्याजयस्येनां, बहुद्रव्यार्पणादपि ॥ २५० ॥ प्रत्युत प्राणि-संघातः, प्राणिति प्रायशोऽनया । विप्रक्षत्रियवैश्यादिः, कुतस्तस्मात्त्यजामि ताम् ॥ ५१ ॥ किमत्र बहुनोक्तेन, तद्वचः पृथिवीपते ! । नैव ताभ्यामभव्यत्वादङ्गीचक्रे मनागपि ॥ ५२ ॥ कालशौकरिको राज्ञा, सोऽन्धकूपे च चिक्षिपे । हिंसामेकाहमप्येनं, वारयामि हठादिति ॥ ५३ ॥ नृपः प्राप्तो द्वितीयेऽह्नि, वन्दनाय जगत्प्रभोः । प्रोवाच पालितः स्वामिन् !, मयैको नियमस्तयोः ॥ ५४ ॥ मुनीन्द्रः प्राह मिथ्यैतन्मृन्मयान्महिषान् यतः । तावतस्तत्र कृत्वाऽसौ, जघानेति निरीक्ष्यताम् ॥ ५५ ॥ जाते क्रमेण यत्तस्य, मृत्यौ निकटवर्तिनि । कालशौकरिकस्याभूत् , तदिदानीं निगद्यते ॥ ५६ ॥ पञ्च पञ्च शतान्युच्चैर्महिषाणां विनिघ्नता । प्रत्यहं तेन यत्कर्म, निर्मितं प्रचितं चिरात् ॥ ५७ ॥ तत्प्रभावान्महारोगाः, प्रादुरासन् शरीरके । तादृशा यादृशा शङ्के, सादृश्यं रौरवे भवेत् ॥ ५८ ॥ हा हा हतोऽस्मि हा मात-र्म्रियते म्रियतेऽधुना । इत्याक्रन्दैस्तटस्थानां, कम्पयामास मानसम् ॥ ५९ ॥ न शय्यायां न भूपृष्ठे, नाभुञ्जानस्य नाश्नतः । नाप्सु पीतास्वपीतासु, सुखं तस्यास्ति सर्वथा ॥ २६० ॥ वीणावेणुमृदङ्गादि-शब्दादिविषयैः क्षणात् । जायते तस्य कोऽप्यन्तः, सन्तापः प्रतिवासरम् ॥ ६१ ॥ प्रविष्टमिष्टकापाके, चितायामथवा स्थितम् । पच्यमानमिवात्मानमनात्मज्ञो विवेद सः ॥ ६२ ॥ स्वतातमार्त्तमत्यन्तमित्येवमवलोकयन् । आख्यद्दुःखी स्वमित्रस्याभयस्य सुलसोऽखिलम् ॥ ६३ ॥ विमृश्य कर्ममर्माणि, श्राद्धधर्मधुरन्धरः । अभयः कथयामास, तस्य तत्पुरतो यथा ॥ ६४ ॥ तत्पित्रा मित्र ! संचिक्ये, चिरं तत्कर्मकल्मषम् । सप्तस्वपि न यन्माति, भूमिषूपरि वर्त्तते ॥ ६५ ॥ जन्मन्यत्रैव तत्तस्य, फलमेषोऽनुभाव्यताम् । कुरु त्वमिन्द्रियार्थानां, वैपरीत्यमतोऽधुना ॥ ६६ ॥ इत्यवेत्य समेत्यासौ, सुलसः सत्वरं गृहान् । तीक्ष्णकण्टकशय्यायां, शाययामास तं क्षणात् ॥ ६७ ॥ विलेपनमसद्गन्धैः, सर्वाङ्गीणमवीवृधत् । कट्वम्लतिक्तवस्तूनि, स्वयं भृशमभूभुजत् ॥ ६८ ॥ इत्यनिष्टा जनद्विष्टा, इन्द्रियार्था यथा

यथा। सुलसेन विधीयन्ते, सुखी स स्यात्तथा तथा ॥ ६९ ॥ अभ्यर्णचारिणं किंचिदवोचदिति चात्मजम्। किं त्वयैतावतीं वेलां, सत्सुखात्सुत ! वञ्चितः ॥ २७० ॥ तां दृष्ट्वा तादृशीं चेष्टां, वाचोयुक्तिं च पैतृकीम्। सुलसश्चिन्तयामास, विस्मयाधीनमानसः ॥ ७१ ॥ अहो पापस्य माहात्म्यमीदृशं कटु दृश्यते। जन्मन्यत्रैव नो जाने, किं परत्र भविष्यति ॥ ७२ ॥ विपाकं पापकस्यैवं, साक्षादनुभवन्नपि। न तातः कुरुतेऽद्यापि धिग्धर्मस्य कथामपि ॥ ७३ ॥ अहं तु वर्त्तयिष्यामि, वार्त्तामपि न पाप्मनः। साक्षान्नि-रीक्ष्यमाणेऽग्नौ झंपापातं करोति कः ॥७४॥ धर्मध्यानपराधीने, सुलसे दुष्कृतालसे। क्रन्दमाने जने क्रूरकर्मामग्रे स दुर्मनाः ॥७५॥ उद्पाद्यप्रतिष्ठाने, वज्रकण्टकसङ्कटे। सप्तम्यामवनौ दुःख-प्रकर्षैकनिकेतने ॥ ७६ ॥ सुलसश्चान्यदाऽभाणि, स्वजनैर्जीविकार्थिभिः। पितुःपदं क्रमायातं, त्वयाऽधिष्ठीयतामिति ॥ ७७ ॥ मांसगृद्धा वृथा वृद्धाः, सर्वान् वस्तदिदं ब्रुवे। नाहमेतत्करिष्यामि, पातकं प्राणिघातकम् ॥ ७८ ॥ चकार तातस्तन्नाम-सद्धर्माध्वनिरन्धलः। धर्माधर्मपथौ पश्यन्नहं तु न करोम्यदः ॥ ७९ ॥ चक्षुष्मन्तो भवन्तोऽपि, पश्यन्तः पुरतः पथि। अन्धकूपं बृहद्रूपं, किं पतन्ति कदाचन ॥ २८० ॥ हिंसया जायते दुःखं, यथाऽऽत्मनि तथा परे। यथावद्वर्ज्यते स्वात्मन्यन्यत्रापि तथा न किम् ॥८१॥ कालशौकरिके साक्षादीक्षांचक्रे मुमूर्षति। विपाकः पाप्मनां मास्म, मुग्ध-मुग्धा मुधा ततः ॥ ८२ ॥ जीवितार्थे जनो दत्ते, कृत्स्नामपि वसुन्धराम्। तन्महामूल्यमल्पेऽर्थे, मा हताहतजीवितम् ॥ ८३ ॥ धत्तां तपस्यां बहुभिर्नमस्यां, व्याख्यातु शास्त्रं स्वरहस्यपात्रम्। न धर्मरक्षा यदि जीवरक्षा, तदा समस्तं तदिहाप्रशस्तम् ॥ ८४ ॥ रुक्षैरक्षरकैस्तिरस्कृतिकृतैः स्वस्याधिरुत्पद्यते, यद्वत्ते जितकुन्तखड्गविशिखाक्षेपैः शरीरव्यथा। मृत्योर्नाम त एव निर्भरभयं सत्यं तथा प्राणिनामन्येषामपि ही कथं रतिरतः प्राणप्रहाणेन वः ॥ ८५ ॥ प्राज्यस्वाराज्यसज्जाप्रसभसुभगताजीवितारोग्यरूपः, प्रीतिप्रस्ता-वयन्तीप्रतिहतकुगतिः प्रस्तुतप्राभवश्रीः। सेयं सोपानपङ्क्तिः प्रगुणगुणततिः सिद्धिसौधावरोहे, रोहन्ति पुण्यभाजां मनसि विजयते जीवरक्षा सुलक्ष्या ॥ ८६ ॥ तैरुक्तं भावि यत्पापं, प्राणिव्यापादनोद्भवम्। तत्ते वयं गृहीष्यामः, सर्वेऽप्यल्पकमल्पकम् ॥ ८७ ॥ किंचैक एव हन्तव्यो, भोस्त्वया सैरिभः स्वयम्। भेत्स्यामो वयमेवान्यांस्तत्कियत्तव पापकम् ॥ ८८ ॥ ज्ञातिष्विति प्रजल्पत्सु, प्रति-

बोधधिया निजः । कुठारेणांह्रिराजघ्ने, सुलसेन सुबुद्धिना ॥ ८९ ॥ पीडया प्रलपन्नुच्चैः, समस्तांस्तानुवाच सः । गृह्णीध्वं बन्धवः कांचित्कणशो मम वेदनाम् ॥ २९० ॥ एते भवन्तः सर्वेऽपि, सुस्निग्धाः सर्वदा मयि । तत्किमेवमुपेक्षन्ते, मत्पीडां किं न गृह्णते ॥ ९१ ॥ तेऽवोचन् शक्यते लातुं, किमन्येनान्यवेदना । सोऽवादीदेवमेवैत-ल्लास्यथैनोऽपि तत्कथम् ॥ ९२ ॥ अत्राल्पवेदनादानेऽप्यलं यदि न तत्कथम् । आदास्यध्वे प्रभूतां तां, यूयं नरकवेदनाम् ॥ ९३ ॥ यः करोत्यत्र यत्कर्म, स एवाप्नोति तत्फलम् । न ह्यन्येन विषे भुक्ते, मृत्युरन्यस्य जायते ॥ ९४ ॥ पिता माता स्वसा भ्राता, वल्लभा वा भवार्णवे । वैपरीत्यभृतोऽपि स्युस्तत्किमेतैरतात्त्विकैः ॥ ९५ ॥ अनाद्यनन्ते संसारे, को न केन न कस्य न । संबन्धो जन्तुना जन्तोः, केयं स्वपरकल्पना ॥ ९६ ॥ त्यक्त्वा कदाग्रहग्रन्थिं, तदस्मिन्पापकर्मणि । जैनधर्माधिकारे नः, साहाय्यं धत्त धीधनाः ॥ ९७ ॥ निर्माय धर्मकर्मैकतानं तं वीक्ष्यते ततः । तदुक्तं प्रत्यपद्यन्त, किं न वज्रेण भिद्यते ॥ ९८ ॥ इत्येवमेष सुलसः स्वमतिप्रभावात्कल्याणभागभयनिर्भरसौहृदाच्च । अङ्गीकृतद्विषडणुव्रतवृद्धिशुद्धिबुद्धिर्बभूव जिनधर्मधराधुरीणः ॥ २९९ ॥

साम्प्रतं 'केसिंचि परो लोगो' इत्यादि भङ्गकचतुष्टये प्रथमभङ्गं तावद्योजयन्नाह—

छज्जीवकायविरओ, कायकिलेसेहिं सुट्ठु गुरुएहिं । नहु तस्स इमो लोगो, हवइऽस्सेगो परो लोगो ॥ ४४१ ॥
नरयनिरुद्धमईणं, दंडियमाईण जीवियं सेयं । बहुवायम्मिऽवि देहे, विसुज्झमाणस्स वर मरणं ॥ ४४२ ॥
तवनियमसुट्ठियाणं, कल्लाणं जीविअंपि मरणंपि । जीवंतऽज्जंति गुणा, मयाऽवि पुण सुग्गइं जंति ॥ ४४३ ॥
अहियं मरणं अहिअं च जीवियं पावकम्मकारीणं । तमसम्मि पडंति मया, वेरं वड्ढंति जीवंता ॥ ४४४ ॥
अवि इच्छंति अ मरणं, नय परपीडं करंति मणसाऽवि । जे सुविइयसुगइपहा, सोयरियसुओ जहा सुलसो ॥ ४४५ ॥

षड्जीवकायेषु निरतस्तदुपमर्दकारीत्वाद्यः 'कायक्लेशैः'—पञ्चाग्नितापनादिभिरतिबृहत्तमैर्वर्त्तते तस्यायं लोको—मनुष्यभवरूपो न

भवत्यज्ञानमहाकष्टानुष्ठानादिहलोकसुखाभावात् किं तु व्यवहारेण स्फुटं स एकः परलोको भवति अज्ञानकष्टोपार्जिततुच्छपरलोकसुखोपस्थानात्। बालतपस्विनो हि रागद्वेषाद्युपहतचित्तवृत्तयः पञ्चाग्नितापनघटसहस्रधाराधारणभिक्षाक्षालनादिषटकायोपमर्दं कृत्वा मृत्वा चाज्ञानमहाकष्टोपार्जितपापानुबन्धितुच्छपुण्याः, परलोके संसारिकसुखोपभोगभागिनो व्यन्तरादित्वेनोत्पद्यन्ते, ततस्तेषां कोणिकजीवसेनकसंज्ञतापसादीनामिव परो लोको भवति, नेह लोकः केवलकष्टानुभावात्। न च जैनसाधवोऽपि तथा तेषां वीतरागत्वेनात्रापि सुखित्वात् तृतीयभङ्गके प्रवेशात्। यदुक्तम्—' देवलोगसमाणो उपरियाओ महेसिणमिति ' तन्नास्ति राजराजस्येत्यादि ॥ अतः परं ' केसिं चि वरं मरण'मिति प्रथमगाथोक्तं भङ्गचतुष्टयमुदाहरिष्यति ' न तु अन्नेसिं एत्थ होइ इहलोगो ' इत्यादि भङ्गत्रयं द्वयोरपि गाथयोः शब्दवृत्त्यैव भेदो न तात्पर्येणेत्यर्थज्ञापनार्थम् ॥ ४४१ ॥ " नरय " गाहा। ' नरकनिरुद्धमतीनां '–परलोकेऽवश्यं नरकगामिनां श्रेणिकदण्डिकादीनां जीवितं श्रेयो वर्त्तते मुहूर्त्तसुखावाप्तेः परलोके नरकदुःखानुभवस्यावश्यंभावित्वादित्येतावता 'जीवियमन्नेसि'ति भङ्ग उदाहृतः। अथ ' केसिं चि वरं मरण 'मित्युदाह्रियते–बह्वपायेऽपि–रोगाद्यपायाक्रान्तेऽपि देहे विशुद्ध्यतः प्रशस्तध्यानान्निर्मलीभवतो यावदद्यापि वेदनासहिष्णुतया नार्त्तध्यानं गच्छति तावद्वरं श्रेयोमरणं सुगतिगमनात्सुकोशलसाध्वादेरिव ॥ ४२ ॥ तृतीयभङ्गकं योजयति—" तव " गाहा। कल्याणं पथ्यं हितं जैनसाधूनामिव ॥ ४३ ॥ चतुर्थभङ्गयोजनामाह—" अहियं " गाहा–तमसि नरकरूपे वैरहेतुत्वाद्वैरं–पापमित्यर्थः ! कालशौकरिकादयो हि जीवन्तो यावतो जीवान् घ्नन्ति तावद्भिः सार्द्धं वैरहेतुं पापं वर्द्धयन्ति ॥४४॥ अत एव विवेकिनः पापं प्राणप्रहाणेऽपि नाचरन्तीत्याह—"अवि" गाहा अपि–सम्भावनायां संभाव्यत एवायमर्थो–यथा स्वस्येच्छन्ति मरणं न पुनः परस्य पीडां मनसाऽपि कुर्वन्ति। ' सुविदितसुगतिपथा '–विज्ञातमोक्षमार्गाः। सुलसाख्यानकं दर्दूराङ्कदेवाख्यानके कथितमेव ॥ ४५ ॥ तदिदं विवेकविजृंभितमुक्तमविवेकविजृम्भितमाह—

**मूलग कुदंडगा दामगाणि उच्छूलघंटिआओ य। पिंडेइ अपरितंतो, चउप्पया नत्थि य पसूऽवि ॥ ४४६ ॥**

इह–परलोकयोः भङ्गकानि।

तह वत्थपायदंडग-उवगरणे जयणकज्जमुज्जुत्तो। जस्सऽट्ठाए किलिस्सई, तं चिय मूढो नऽवि करेई ॥ ४४७ ॥
अरिहंता भगवंतो, अहियं व हियं व नवि इहं किंचि। वारंति कारवेंति य, घित्तूण जणं बला हत्थे ॥ ४४८ ॥
उवएसं पुण तं दिंति जेण चरिएण कित्तिनिलयाणं। देवाणऽवि हुंति पहू, किमंग पुण मणुअमित्ताणं ? ॥ ४४९ ॥
वरमउडकिरीडधरो, चिंचइओ चवलकुंडलाहरणो। सक्को हिओवएसा, एरावणवाहणो जाओ ॥ ४५० ॥
रयणुज्जलाइँ जाइं, बत्तीसविमाणसयसहस्साइं। वज्जहरेण वराइँ, हिओवएसेण लद्धाइं ॥ ४५१ ॥
सुरवइसमं विभूइं, जं पत्तो भरहचक्कवट्टीऽवि। माणुसलोगस्स पहू, तं जाण हिओवएसेण ॥ ४५२ ॥
लध्धूण तं सुइसुहं, जिणवयणुवएसममयबिंदुसमं। अप्पहियं कायव्वं, अहिएसु मणं न दायव्वं ॥ ४५३ ॥
हियमप्पणो करिंतो, कस्स न होइ गरुओ गुरू गण्णो। अहियं समायरंतो कस्स न विप्पच्चओ होइ ? ॥ ४५४ ॥

'मोलका'–अश्वबन्धनयोग्या स्थूणाः। कुदण्डदामकादीनि प्रतीतानि। चतुष्पदा पशुश्छागिकाऽपि। यथा चतुष्पदमात्राभावेऽपि मोलकादीनि तदूपकरणानिं मूर्खो मीलयत्यपरिश्रान्त इति दृष्टान्त ॥ ४६ ॥ दार्ष्टान्तिकमाह—"तह" गाहा–तथा वस्त्रपात्रदण्डकाद्युपकरणानि पिण्डयतीति योगः। यतनाकार्योद्युक्तोऽहमेतानि मीलयामीति शाठ्यवान्। यस्य संयमस्यार्थाय क्लिश्यत्युपकरणमीलने न तमेव संयमं मूढो न करोत्युपकरणरामणीयक एव तात्पर्यात्। अयमर्थः—यथा चतुष्पदविकलस्य तदूपकरणान्वेषणं क्लेश एव। तथा संयमरहितस्योपकरणराढेति ॥ ४७ ॥ एवं तर्हि उन्मार्गप्रवृत्तं तीर्थकराः किमिति न वारयन्तीत्याह—"अरिहंता" गाहा। तर्हि किं कुर्वन्तीत्याह—"उवएसं" गाहा। देवानां प्रभव–इन्द्रा इत्यर्थः ॥ हितोपदेशो हि सकलकल्याणानि सम्पादयतीत्याह—"वर" गाहा। वरमुकुटानामपि यत्किरीटं प्रधानतयोपरिवर्त्तित तद्धारयतीति। 'चिंचइओ' त्ति अङ्गदादिमण्डितः ॥ ऐरावतो–देवहस्ती वाहनं यस्य स तथा सनत्कुमारजीवः प्राक्तनभवे परिव्राजकेनापमानितस्तपश्चरीत्वा शक्रः संजातः, परिव्राजकस्तु

तद्वाहनहस्तीत्यनेन सूचितम् । तच्च 'थेवेण वि सप्पुरिसा' इत्यत्र कथितमेव । तथा "रयणुज्जलाइं" गाहा ॥ किंच "सुरवइ" गाहा । एतत्कथानकमपि किं 'परजणबहुजाणावणाहिं धम्मो मएण हुंतो' ॥ 'अइसुट्ठिओ' त्ति-इत्यत्र यथायोगं भणितमेव ॥ तदिदमवेत्य यद्विधेयं तदेवाह—"लद्धूण" गाहा । आत्महितं-संयमानुष्ठानादि । अहितेषु-प्रमादकषायादिषु ॥ तथाकुर्वन्निहलोक एव यादृग्भवति तदाह—"हिय" गाहा । गण्यो-गणनीयः । सर्वकार्येषु सर्वस्य प्रष्टव्यः । 'विप्पभूओ' त्ति-विगतः प्रत्ययो यस्मात्स विप्रत्ययोऽविश्वसनीय इत्यर्थः ॥ ४८ तः ५४ ॥ ननु यो योग्यः कोऽपि स एव गुरुः स्यादहं तु नायोग्य इति यो मन्येत तं प्रत्याह—

**जो नियमसीलतवसंजमेहिं जुत्तो करेइ अप्पहियं । सो देवयं व पुज्जो, सीसे सिद्धत्थओ व्व जणे ॥ ४५५ ॥**

**सव्वो गुणेहिं गण्णो, गुणाहिअस्स जह लोगवीरस्स । संभंतमउडविडवो सहस्सनयणो सययमेइ ॥ ४५६ ॥**

**चोरिक्कवंचणाकूडकवडपरदारदारुणमइस्स । तस्स च्चिय तं अहियं, पुणोऽवि वेरं जणो वहइ ॥ ५५७ ॥**

**जइ ता तणकंचणलुट्ठरयणसरिसोवमो जणो जाओ । तइया नणु वुच्छिन्नो, अहिलासो दव्वहरणम्मि ॥ ४५८ ॥**

**आजीवगगणनेया, रज्जसिरिं पयहिऊण य जमाली । हियमप्पणो करिंतो, नय वयणिज्जे इह पडंतो ॥ ४५९ ॥**

अयमर्थः—यः कश्चिदात्महितं करोति स दैवतमिव पूज्यो भवति शीर्षे कुलस्य सिद्धार्थक इव-सर्षपवदुह्यत इति शेषः । अयमभिप्रायः—न हि गुरुपदोचितानां काचित्खानिरस्ति, किं तर्हि ? गुणाः पूज्यत्वहेतवस्ते च सर्वस्य स्वप्रयत्नसाध्यास्ततः सर्वेण तेष्वादरो विधेयः । यदुक्तम्—न साधूनां क्षेत्रं न च भवति नैसर्गिकमिदं, गुणान् यो यो धत्ते स स भवति साधुर्भजत तान् । तथा—गुणेषु यत्नसाध्येषु, यत्ने चात्मनि संस्थिते । अन्योऽपि गुणिनां धुर्य, इति जीवन् सहेत कः ॥ एतदेव भावयति—"सव्वो" गाहा । संभ्रान्तमुकुटविटपः-भक्त्यातिशयाकुलकिरीटशाखः निगीर्याध्यवसानाद्विटपशब्देन किरीटस्य शिखराण्युच्यन्ते ॥ 'एति'-वन्दनायेति शेषः ॥ ४५६ ॥ गुणहीनस्य तु व्यतिरेकमाह—"चोरिक्क" गाहा । 'चोरिक्कं'-चोर्यम् । 'वञ्चना'-

क्रियया विप्रलम्भनम् । कूटमसत्यवचनम् । 'कपटं'-मानसं शाठ्यम् । 'परदाराः'-परकलत्रम् । एतेषु विषयभूतेषु दारुणा-पापप्रवृत्ता मतिर्यस्य स तथा तस्य । तस्यैव तदहितमिह परत्र चापथ्यम् । पुनरपि 'वैरं'-क्रोधाध्यवसायं तस्योपरि जनो वहति पापीयान् न द्रष्टव्योऽयमित्याद्याक्रोशदानात् । तदयं तस्य वराकस्य गण्डस्योपरि स्फोट इति । गुणस्थितानां पुनरमी दोषा दूरोत्सारिता एव ॥ ५७ ॥ तथा चाद्यदोषाभावमन्येषामुपलक्षणाय दर्शयन्नाह—"जइता" गाहा । 'जइया'-यदा । यद्वा यदि तावत्तृण-काञ्चन-लोष्ठुरत्नेषु सदृशोपमो निर्लोभतया एकाकारो जनो जातस्तदा न तु निश्चितं व्युच्छिन्नोऽभिलाषो द्रव्यहरणे कारणाभावात् । तदिदमवेत्य सन्मार्गे वर्त्तितव्यम् ॥५८॥ ये पुनः सन्मार्गे स्खलन्ति तेषां महतामप्यवस्तुता सम्पद्यत इत्याह—"आजीव" गाहा-आजीवन्ति द्रव्यलिङ्गेन लोकमित्येवाजीवका-निह्नवास्तेषां गणस्य नेता-नायको-गुरुरित्यर्थः । राज्यश्रियं 'प्रहाय'-परिहृत्य च शब्दात्प्रव्रज्यां च गृहीत्वा जमालिर्भगवज्जामाता यदिशब्दाध्याहाराद्यद्यात्मनो हितं 'कज्जमाणे कडे' इति भगवदुपदिष्टार्थश्रद्धानमकरिष्यत्तदा वचनीये 'निह्नवोऽ' यमिति निन्द्यत्वे इहलोके नापतिष्यत् ॥ ४५९ ॥ अथ जमालिकथेयमुच्यते—

क्षत्रियकुण्डग्रामे, जमालिनामा बभूव राजन्यः । श्रीवीरजिनेन्द्राग्रज-सहोदराया उदारायाः ॥ १ ॥ [1]प्रियदर्शनाभिधाया-स्तनूद्भवः शोभमानसौभाग्यः । अभिरामयौवनारामरामणीयकविकाशिश्रीः ॥ २ ॥ नयविनयैकनिधानं, निरवधिकरुणाविधासुधासिन्धुः । श्रीवीरदेवदुहिता, सुदर्शना तस्य भार्याऽभूत् ॥ ३ ॥ वैषयिकसुखासक्तस्य, तस्य साकं तयातिचक्रमे । कालो निकामकामाभिरामकेलेः कियानपि ॥ ४ ॥ पुरनगरग्रामादौ, कदापि देवाधिदेवता वीरः । विहरन् ब्राह्मणकुण्ड-ग्रामारामे समागच्छत् ॥५॥ उपबहुशालकचैत्यं, त्रिदशेश्वरविरचिते समवसरणे । निषसाद संसदे धर्म-देशनासारमाधातुम् ॥ ६ ॥ क्षत्रियकुण्डग्रामाज्जमालिरप्याजगाम तत्रैव । कृत्वा प्रदक्षिणात्रयमुपाविशद्देशनाश्रुतये ॥ ७ ॥ इह बध्यन्ते जीवा, यैर्मिथ्यात्वादिभिर्यथा चरितैः । मुच्यन्ते च यथा यैः,



१ सुदशः सुदर्शनायास्त. B. C. सुदशः सुदर्शनाभिधायास्त. D.

सम्यक्संयमतपःप्रमुखैः ॥ ८ ॥ संक्लिश्यन्तः सर्वासु, यान्ति दुःखार्दिता यथा गतिषु। अरहट्टघटीयन्त्रन्यायेन पुनः पुनस्तत्र ॥ ९ ॥ संक्लेशलाघवाल्लंघयन्ति संसारसागरं च यथा। अवितथमकथि तथा तत्, सर्वं तीर्थाधिनाथेन ॥ १० ॥ अत्रान्तरे भवोत्त्रस्तचेता जमालिः स्वामिनं प्रणम्य व्यजिज्ञपत्-यथा भगवन्! पितृभ्यामनुज्ञातो युष्मदन्तिके ग्रहीतुमिच्छामि प्रव्रज्याम्। भगवता तु मा प्रतिबन्धं विधत्स्वेत्युक्तः प्रणत्य स्वगृहानगादपृच्छच्च व्रतार्थं मातापितरौ। कथं कथमपि ताभ्यामनुज्ञातः पुरुषसहस्र-वाह्यां शिबिकामारुह्य महाविभूत्या भगवन्तमुपतस्थे। भगवताऽपि पञ्चशतराजपुत्रपरिवारोपेतः प्रव्राजयाञ्चक्रे। तत्पत्नी च सुदर्शना स्त्रीसहस्रपरिवारा प्रव्राजिता। द्वयोरपि सामायिकाद्येकादशाङ्गपर्यन्ता श्रुतसम्पत्सम्पदे, कालेन गीतार्थतायां जातायां जमालिर्जाताचा-र्यपदप्रतिष्ठोऽनुष्ठाननिष्ठाप्रष्ठः पञ्चभिरनगारशतैः परिवृतो ग्रामनगरादिषु विहरन् कदापि श्रावस्त्यां नगर्यां तिण्डुकोद्याने कोष्ठकचैत्ये-ऽवग्रहमनुज्ञाप्य स्थितवान्। तत्र चान्तप्रान्ताद्याहाराभ्यवहारोत्पन्नदाहज्वरः संस्तारकाऽऽस्तरणाय साधूनादिक्षत्, तैश्चेच्छाम इति भणित्वा संस्तरीतुमारब्धम्। स च गाढतरवेदनया दोदूयमानतनुः पुनरवादीत्। यथा भोः श्रमणाः! संस्तीर्णं नवेति। तेऽवोचन्-संस्ती-र्णम्। ततोऽसौ समेत्य यावद्वीक्षांचक्रे तावत्संस्तीर्यमाणसंस्तारकं विलोक्य सकष्टमुपविष्टः सकोपमवदत्-किं भोः साधवो! भव-द्भिरर्द्धसंस्तीर्णोऽपि संस्तारकः संस्तीर्ण इति भणितः। तैरवादि—'कज्जमाणे कडे', 'चलमाणे चलिए', 'उदीरिज्जमाणे उदी-रिए', 'निज्जरिज्जमाणे निज्जिन्ने' इत्यादिभगवद्वचनप्रामाण्यात्, ततोऽसौ कियतीमपि वेलां संस्तारके स्थित्वा तत्क्षणोपजातमिथ्या-त्वकर्मोदयादुदितदुर्विकल्पः शरीरात्मनि च संक्रान्ते दाहज्वरे साधूनाहूयाब्रवीत्—भोः साधवः! श्रूयतां तात्पर्यं पर्यालोचितमस्माभिः। यदेतदर्हता—'कज्जमाणे कडे' इत्याद्युच्यते न तत्सुपर्यालोचितवचनम्। संस्तीर्यमाणसंस्तीर्णयोर्भिन्नकालत्वस्येदानीमेव दर्शनात् क्रिया-कालनिष्ठाकालयोरत्यन्तं भेदात्ततो भगवद्वचसि स्खलितमेतदिति प्रतिजानीमहे। एवमुक्ताश्च ते साधवः केचिदेवमेतदिति प्रतिपेदिरे। अपरे त्ववगतभगवद्वचनयथावस्थितार्था एवमभिदधुर्यथा—जमालिसूरे! नैतद्युक्तमुक्तं त्वया यतो न भगवान् कदाचिदसत्यं जल्प-त्यविकलकेवलालोकत्वेन वीतरागद्वेषत्वेन च वितथकथने कारणाभावात्॥ रागाद्वा द्वेषाद्वा, मोहाद्वा वाक्यमुच्यते ह्यनृतम्। यस्य तु

नैते दोषास्तस्यानृतकारणं किं स्यात् ॥ ११ ॥ तथा—आगमो ह्याप्तवचनमाप्तिर्दोषक्षयं विदुः । क्षीणदोषोऽनृतं वाक्यं, न ब्रूयाद्धेत्वसंभवात् ॥ १२ ॥ ततः स्थितमेतत्—'क्रियमाणं कृतमिति सत्यमेतदाप्तोक्तत्वादितरवाक्यवत् । न च भगवद्वचनं—"पुराणं मानवो धर्मः, साङ्गो वेदश्चिकित्सितम् । आज्ञासिद्धानि चत्वारि, न हन्तव्यानि युक्तिभिः—॥ १३ ॥" इत्यादितुल्यम् । जात्यसुवर्णवत्तापादिशुद्धत्वात् । अन्यथा 'अस्ति वक्तव्यता काचित्तेनेदं न विचार्यते । जात्यं तु काञ्चनं भूत्वा, तापादिभ्यो बिभेति किम् ॥ १४ ॥' इत्याद्युपालम्भभाजनं स्यात् । यत्तूक्तं—'संस्तीर्यमाणसंस्तीर्णयोर्भिन्नकालात्तस्ये'त्यादि तदपि बालप्रलपितं, क्रियाकालनिष्ठाकालयोः कथंचिदेकत्वाभ्युपगमेन संस्तीर्णसमयेऽपि कथंचित्संस्तीर्णत्वनिर्णयात् ॥ तथाहि—क्रियमाणक्षणे कृतत्वमप्यस्त्यन्यथा क्रियमाणाद्यक्षणादिष्विवान्त्यक्षणेऽपि कृतत्वस्याविद्यमानत्वात्कदाचित्कृतोऽयमिति प्रत्ययो नोत्पद्यते । यदि हि पटस्यान्त्यक्षणं यावन्निष्पद्यमानदशायां मनागपि न निष्पन्नताऽभूत्तदा कदापि कथं निष्पन्नः पटो व्यपदिश्येत । अन्यथा घटेऽपि निष्पन्ने निष्पन्नः पट इति व्यपदेशः स्यादुभयत्र प्रकटस्य निष्पन्नत्वाभावात् । ननु यद्येक-द्वि-त्र्यादितन्तुप्रक्षेपकाले पटस्य निष्पद्यमानत्वेन निष्पन्नता स्यात्तदानीं तन्तुवायस्य तदैव तत् क्रियोपरतिर्भवेत् । नैवम्—एकद्वित्रितन्तुप्रक्षेपकाले हि एकद्वित्र्यादितन्तुका एव पटाः प्रारब्धा निष्पन्नाश्च परिपूर्णपटस्तु चरमतन्तुप्रक्षेपकाल एवारभ्यते निष्पद्यते च । ततः कथमादावेव तत्क्रियोपरतिः प्राप्नोत्येवं संस्तारकेऽपि योज्यमित्यत्र बहु वक्तव्यम् । तच्च विशेषावश्यकादवगन्तव्यम् ॥ एवं बहुविधं साधुभिरभिहितोऽपि जमालिर्यावद्भगवद्वचनं न प्रतिपद्यते । तावज्जातं मिथ्यात्वं, गतोऽयमधुना, न योग्यः सेवाया इत्यवधार्य विमुच्य च ते तदन्तिकं श्रीमहावीरस्वामिनमेवाशिश्रियुः ॥ इतश्च सुदर्शना जमालिवन्दनानिमित्तं तत्रैवागता श्रीमहावीरश्रावकढङ्ककुम्भकारगृहे अवग्रहमनुज्ञाप्य तस्थौ ॥ सा च कृतमेव कृतं न क्रियमाणं कृतमिति जमालिवाक्यमनेकधा कर्ण्णयन्ती पतिरागं च किंचिच्चिन्तयन्ती तदेवाभ्युपगतवती ढङ्कस्याग्रतः प्रतिपादितवती च । ततस्तेन जमालिवृत्तान्ताऽभिज्ञेन छद्मनोक्तमार्ये ! नाहमेवंविधं विशेषं ज्ञातुं शक्तो यथा भगवान् सत्यो जमालिर्वेत्यभिधाय तूष्णीं स्थितस्तावद्यावदन्यथा स्वाध्यायपौरुषीं कुर्वत्या एवास्या आपाकमस्तकस्थानि भण्डकान्यत्रतारयता तेन झगित्येव ज्वलद-

ङ्गार एकस्तथा क्षिप्तो यथा तत्संघाटिकैकदेशे लग्नस्तया च भणितं भोः श्रमणोपासक महानुभाव ! किं मदीया संघाटी त्वया दग्धा । तेनोक्तं–किमित्यार्थे ! अलीकमभिदधासि । नहि दह्यमानं दग्धमुच्यते त्वन्मते । संघाटी च त्वदीयेदानीं दह्यमानैव वर्त्तते इत्याद्युक्त्या सा प्रतिबुद्धाऽवदत्–यथा भव्यं कृतं श्रावक ! इच्छाम्यनुशास्तिमिति दत्तमिथ्यादुष्कृता च गता जमालिपार्श्वम् । स्वाभिप्रायं च सयुक्तिकं बहुश उक्तवती । तथापि न तत्प्रतिपन्नवानसौ । ततः सा परिशेषसाधवश्च स्वामिसकाशमेव प्राप्ताः । सोऽप्येकाकी तस्माद्दुष्प्ररूपणादनालोचिताप्रतिक्रान्तोऽर्द्धमासिकसंलेखनया कालं कृत्वा लान्तककल्पे त्रयोदशसागरोपमस्थितिकः किल्बिषिको देवः समुत्पन्नः । ततश्च्युतश्चत्वारिपञ्च तिर्यग्मनुष्यदेवभवग्रहणानि संसारमनुपर्यट्य महाविदेहे सेत्स्यतीति ॥ भगिनीतनयः पतिः सुतायाः स्वकरसमर्प्पितसंयमाधिराज्यमवगणयति चेज्जिनं जमालिस्तदहह कोऽपि कृतघ्नप्रकर्षः ? ॥४५९॥ जमालिप्रकारमेव जीवमाश्रित्याह—

इंदियकसायगारव-मएहिं सययं किलिट्ठपरिणामो । कम्मघणमहाजालं, अणुसमयं बंधई जीवो ॥ ४६० ॥
परपरिवायविसाला, अणेगकंदप्पविसयभोगेहिं । संसारत्था जीवा, अरइविणोअं करंतेवं ॥ ४६१ ॥
आरंभपायनिरया, लोइअरिसिणो तहा कुलिंगी अ । दुहओ चुक्का नवरं, जीवंति दरिद्दजियलोए ॥ ४६२ ॥
सव्वो न हिंसियव्वो, जह महिपालो तहा उदयपालो । नय अभयदाणवइणा, जणोवमाणेण होयव्वं ॥ ४६३ ॥
पाविज्जइ इह वसणं, जणेण तं छगलओ असत्तुत्ति । न य कोइ सोणिय बलिं, करेइ वग्घेण देवाणं ॥ ४६४ ॥
वच्चइ खणेण जीवो, पित्तानिलधाउसिंभखोभेहिं । उज्जमह मा विसीअह, तरतमजोगो इमो दुलहो ॥ ४६५ ॥
पंचिंदियत्तणं माणुसत्तणं आरिए जणे सुकुलं । साहुसमागम सुणणा, सद्दहणाऽरोग पव्वज्जा ॥ ४६६ ॥
आउं संविल्लंतो, सिढिलंतो बंधणाइं सव्वाइं । देहट्ठिअं मुयंतो, झायइ कलुणं बहुं जीवो ॥ ४६७ ॥
एक्कंऽपि नत्थि जं सुट्ठु सुचरियं जह इमं बलं मज्झ । को नाम दढकारो, मरणंते मंदपुण्णस्स ? ॥ ४६८ ॥ युग्मम् ॥

कर्म्माण्येव घना-मेघा जीवचन्द्रावारकत्वात्कर्मघनास्तेषां महाजालं-निबिडसमूहम् ॥ इन्द्रियकषायादिभिः केवलं कर्मैव बध्नाति न पुनः कश्चिदत्र परमार्थो वैषयिकसुखस्य दुःखरूपतया पामकण्डूयनकल्पत्वादरतिविनोदद्वारेण विपर्यासात्, तत्राविवेकिनां सुखबुद्धि-प्रवृत्तिः ॥ उक्तं च—'तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि, क्षुधार्त्तः सन् शालीन् कवलयति मांसपाकव(सादिक)लितान्। प्रदीप्ते रागाग्नौ दहति तनुमाश्लिष्यति वधूं, प्रतीकारे व्याधेः सुखमिति विपर्यस्यति जनः ॥१॥' एतदेव सूत्रगाथयाह—'परपरिवाये' त्यादि। आद्यपादेन द्वेषकार्यमुक्तम्। द्वितीयेन रागकार्यं, रागद्वेषवशगाः प्राणिनोऽरतिविनोदमात्रमेवानुभवन्ति न तु सुखं किंचिदिति ॥ ६१ ॥ लौकिकव्रतिनोऽप्येतादृशा एवेति दर्शयति—"आरंभ" गाहा आरम्भः स्नानादौ षट्कायोपमर्दः पाकश्च धान्यादीनां तयो-र्निरता-आसक्ताः लौकिकऋषयस्तापसाः कुलिङ्गिनश्च कापालिकतपस्विप्रभृतयस्ते किमित्याह-'दुहओ चुक्का नवरं' ति। न केवल-मुभयतो भ्रष्टा-न ते गृहस्थास्तद्विरुद्धवेषत्वान्नापि यतयो हिंसादिप्रवृत्तत्वात्। अतो 'जीवंति दरिद्दजियलोए' ति दरिद्रवत् दैन्यवृत्त्या जीवलोको जीविका यस्मिन् जीवने तत्तथा जीवन्तीति क्रियाविशेषणमेतत्। जैनदर्शनादन्ये यतयो मोहादारम्भादौ वर्त्तमानास्तेन विड-म्बनोदरपूरणमात्रमेव कुर्वन्तीत्यर्थः ॥ ६२ ॥ जैनसाधूनां पुनरेतच्चेतसि वर्त्तत इत्याह—"सव्वो" गाहा। हिंसायां विचार्यायां राजवद्रङ्कोऽपि न हन्तव्यः। द्वयोरपि प्रियप्राणत्वादेकतुलया प्राणरक्षाकार्येत्यर्थः। उदगमात्रमेव तडागादिसत्कं स्वपानाय पालयति नत्व-न्यदश्वादिमात्रस्याप्यात्मीयस्याभावादित्युदकपालो द्रमकः। न च नैवाभयदानव्रतिना सर्वप्राणिनामभयप्रदानप्रवृत्तेन यतिजनोपमानेन लोकतुल्येन भाव्यं यथाहुर्लौकिकाः-अग्निदो गरदश्चैव, शस्त्रपाणिर्धनापहः। क्षेत्रदारहरश्चैव, षडेते आततायिनः॥ आततायिनमा-यान्तमपि वेदान्तपारगम्। जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेदिति। पीडाप्रवृत्तेऽपि परे पीडा न कर्त्तव्येत्यर्थः ॥ ६३ ॥ एवं च कुर्वन्नविवेकिभिरक्षमो गण्यत इत्याह—"पाविज्जइ" गाहा। प्राप्यते व्यसनं हीलारूपमत्राविवेकिना जनेन हेतुकर्तृभूतेन क्षमावान् सन् यथा त्वं छगलको बस्तोऽशक्तोऽक्षम इति, अत एव चण्डिकादेर्बलिम्बस्तेनैवाशक्तेन लोकः करोति न पुनर्व्याघ्रेण तेजस्विना कोऽपि करोति। एवं त्वमपि यदि शक्तिं दर्शयेस्तदा न केनापि परिभूयेथा इति। एवं हील्यमानेनापि साधुना क्षमैव

कार्या न पुनः क्रोधः क्वापि कर्त्तव्यस्तस्य परलोकापकारित्वादायुषश्चानित्यत्वेन परलोकस्याभ्यर्णवर्त्तित्वात् ॥ ६४ ॥ एतदेवाह—"वच्चइ" गाहा। व्रजति क्षणेन परलोकमिति गम्यते पित्तानिलादिक्षोभैस्तथाविधैः सर्वदा पार्श्ववर्त्तिभिः स्वपुत्रं रणसिंहराजं शिष्यांश्च प्रत्याह—उद्यच्छत मा विषीदत सदनुष्ठाने मा शिथिलीभवत। यतस्तरतमयोगः सातिशयो धर्मकारणसम्बद्धोऽयं वक्ष्यमाणो दुर्लभस्ततस्तत्प्राप्तौ न युक्तः प्रमादः कर्त्तुम् ॥ तथाहि—"भो भव्याः काकतालप्रपतनतुलया रत्नदृष्टान्ततो वा, मानुष्यक्षेत्रजातिप्रभृति कथमपि प्रापि दुष्प्रापमेतत्। धर्मः कर्मप्रमाथी श्रुतचतुरगुरुश्चैष लेभे भवद्भिस्तत्किं नाद्यापि सद्यस्त्यजथ कुगतिदं निर्विवादं प्रमादम् ॥ १ ॥ ६५ ॥ तथा चाह—"पंचिंदियत्तणं" गाहा। पञ्चेन्द्रियत्वादीन्येतानि सर्वाण्यप्युत्तरोत्तरक्रमेण दुर्लभानि प्राप्योद्यमः कर्त्तु युक्तो, न प्रमादः। एवमप्युपदिष्टे यः साम्प्रतेक्षित्वाद्दुर्बुद्धिर्धर्मं न कुर्यात् स पश्चाद् बहु शोचतीत्याह—"आउं" 'आयु'–जीवितं 'संवेष्टयन्'–सन्निहितोक्रमकारणैर्लघूकुर्वन् करुणं ध्यायति जीवो यथा हा किं मया मन्दभाग्येन लब्धेऽपि सर्वज्ञशासने क्षिप्रमेव मोक्षप्रापिणि विषयलवलम्पटतया निरन्तरमहादुःखाधारसंसारकारणमीदृशमनुष्ठितमिति सुचरितावष्टम्भाभावात् ॥ एतदेवाह—"एक्कंपि" गाहा। एकमपि–द्रव्यभावस्तवयोरन्यतरत्। 'दढक्कारो' त्ति–द्रढिमा अवष्टम्भः क्व मरणान्ते मन्दपुण्यस्य जीवस्य विषयासक्त्या पञ्चेन्द्रियत्वसद्धर्मसामग्रीहारणात्तदुक्तम्—लोहाय नावं जलधौ भिनत्ति, सूत्राय वैडूर्यमणिं दृणाति। सच्चन्दनं प्लोषति भस्मनेऽसौ, यो मानुषत्वं नयतीन्द्रियार्थे ॥६८॥ न केवलं पित्तादिभिरुपक्रमकारणैरायुश्च्यवते, किं तर्हि? एवमपीत्याह—

**सूलविसअहिविसूई–पाणीसत्थग्गिसंभमेहिं च। देहंतरसंकमणं, करेइ जीवो मुहुत्तेण ॥ ४६९ ॥**
**कत्तो चिंता सुचरिय–तवस्स गुणसुट्ठियस्स साहुस्स?। सोगइगमपडिहत्थो, जो अच्छइ नियमभरियभरो ॥ ४७० ॥**
**साहंति अ फुडविअडं, मासाहससउणसरिसया जीवा। न य कम्मभारगरुयत्तणेण तं आयरंयि तहा ॥ ४७१ ॥**
**वग्घमुहम्मि अहिगओ, मंसं दंतंतराउ कड्ढेइ। मा साहसं ति जंपेइ, करेइ न य तं जहाभणियं ॥ ४७२ ॥**

परिअट्टिऊण गंथत्थवित्थरं निहसिऊण परमत्थं। तं तह करेइ जह तं, न होइ सव्वंपि नडपढियं ॥ ४७३ ॥
पढइ नडो वेरग्गं, निविज्जिज्जा य बहुजणो जेण। पढिऊण तं तह सढो, जालेण जलं समोअरइ ॥ ४७४ ॥
कह कह करेमि कह मा करेमि कह कह कयं बहुकयं मे। जो हिययसंपसारं, करेइ सो अइकरेइ हियं ॥ ४७५ ॥
सिढिलो अणायरकओ, अवसवसकओ तहा कयावकओ। सययं पमत्तसीलस्स, संजमो केरिसो होज्जा ? ॥ ४७६ ॥
चंदुव्व कालपक्खे, परिहाइ पए पए पमायपरो। तह उग्घरविघरनिरंगणो य णय इच्छियं लहइ ॥ ४७७ ॥

शूलादिभिरप्यकस्मान्म्रियते प्राणी स चाकृतधर्मा शोचतीत्यर्थः॥ विहितसदनुष्ठानस्य तु नास्ति शोक इत्याह—"कत्तो" गाहा। कुतश्चिन्ता मृत्यावुपस्थितेऽपि न काचिदित्यर्थः। परिहत्थो–दक्षः। नियमानां–विचित्राभिग्रहाणां सम्बन्धी भृतो भर आत्मशकटे येन स तथा ॥ ७० ॥ एतच्च जानाना अप्येके गुरुकर्मत्वान्न कुर्वन्तीत्याह—" साहिंति य " गाहा। मासाहसशकुनसदृशका जीवा इत्यनेन वक्ष्यमाणगाथासंविधानकं सूचयति–तदेवाह—" वग्घ " गाहा। किल कश्चित्पक्षी मार्गे गच्छता ब्राह्मणेन 'मा साहस'–मित्यारटन्नाकर्णितो गत्वा निरीक्षितश्च यावत्प्रसुप्तव्याघ्राननने प्रविश्यासौ मांसमाकर्षति, ततो ब्राह्मणेनाभ्यधायि—' मासाहसं ' ति जंपसि, वग्घमुहाओ य आमिसं हरसि। मुद्धो सि सउण दीससि, वायासरिसं न य करेसि ॥ १ ॥ एवमन्योऽपि योऽन्यथा-वादी अन्यथा करोति स तत्तुल्यो दृष्टव्यः॥ एतद्विदित्वा आगमज्ञेन यथावादिना तथाकारिणा भाव्यमुक्तव्यतिरेके तु लाघवापादने-नागमाध्ययनस्य न पाठतुल्यतैवाविर्भाविता भवेत्ततो यथासौ न स्यात्तथा कार्यमित्याह—" परि " गाहा। परिवर्त्याभ्यस्य ग्रन्था-र्थयोः सूत्रतदर्थयोर्विस्तारम्। उद्घोषणामात्रेणापि परावर्त्तनं स्यात्तदपोहायाह निघृष्य कनकमिव कषपट्टके परमार्थं तत्सारमपि विज्ञा-येत्यर्थः। तदागमोक्तं तथा करोत्यनुष्ठानसंपादनेन यथा तदागमाध्ययनं सर्वमपि नटपठितं न भवति॥ नटपठितदृष्टान्तमेवाह—" पढइ " गाहा। जालेन मत्स्यान् ग्रहीतुं नद्यादिजलेऽवतरति। यथाऽयं तथा स्वयमनाचरन् प्रस्तुतो धर्मदेशकोऽपि ज्ञेय इति॥

तदिदमवेत्य यद्विधेयं तदाह—" कह कह " गाहा। यः कथं कथं करोमि इत्यादिकं हृदयेन सार्द्धं संप्रसारं पर्यालोचनं प्रतिदिनं करोति सोऽतिशयेन करोत्यात्महितम् ॥ किमित्येतावानादर उपदिश्यत इत्युच्यते। अनादरेण सदनुष्ठानाराधनाऽयोगात्तथा चाह— " सिढिलो " गाहा। शिथिलः संयमः सदा प्रमत्तस्वभावस्य कीदृशो भवेदिति सम्बन्धः, स च शिथिलः, कथं स्यादित्याह— अनादरकृतोऽयत्नानुष्ठितः यत्नेनापि परभयादनुष्ठीयमाने न किंचित्स्यादित्याह—अवशवशकृतः। अवशो–गुर्वाद्यायत्तता तद्वशेन तद्-द्वारेण नात्मश्रद्धया कृतः। कृतापकृतश्च क्वचित्संपूर्णाराधनाद्विराधनाच्च क्वचिदिति। एतदेवाह—" चंदो॰व " गाहा। तथोद्गृहवि-गृहनिरङ्गनश्च नैवेप्सितं लभेत्। तत्रोद्गतं प्राबल्येन नष्टं गृहस्थावस्थाभावि गृहं यस्य स तथा। प्रव्रज्यावस्थायामपि विशिष्टवस-त्यभावाद्विगृहः निरङ्गनश्च–योषिदभावात्ततः कर्मधारयः। ततोऽयमर्थः—क्लिष्टाध्यवसायेन विषयान् वाञ्छन्नप्यसौ कर्मैव चिनोति न पुनरभिलषितं प्राप्नोति गृहगृहिणीप्रभृतीनां तत्साधनानामभावादिति ॥ ४७६ ॥ अन्यच्चासाविहैव यदनुभवति तदाह—

भीओव्विग्ग निलुक्को, पागडपच्छन्नदोससयकारी। अप्पच्चयं जणंतो, जणस्स धी जीवियं जियइ ॥ ४७८ ॥
न तहिं दिवसा पक्खा, मासा वरिसा वि संगणिज्जंति। जे मूलउत्तरगुणा, अक्खलिया ते गणिज्जंति ॥ ४७९ ॥
जो न वि दिणे दिणे संकलेइ–के अज्ज अज्जिया मि गुणा ?। अगुणेसु अ नहु खलिओ, कह सो उ करिज्ज अप्पहिअं ? ॥४८०॥
इय गणियं इय तुलिअं इय बहुआदरिसियं नियमियं च। जइ तहवि न पडिबुज्झइ, किं कीरइ ? नूण भवियव्वं ॥ ४८१ ॥
किमगंतु पुणो जेणं, संजमसेढी सिढिलीकया होई। सो तं चिअ पडिवज्जइ, दुक्खं पच्छा उ उज्जमई ॥ ४८२ ॥
जइ सव्वं उवलद्धं, जइ अप्पा भाविओ उवसमेणं। कायं वायं च मणं, उप्पहेणं जह न देई ॥ ४८३ ॥
हत्थे पाए निखिवे, कायं चालिज्ज तं पि कज्जेणं। कुम्मो व्व सए अंगे, अंगोवंगाइं गोविज्जा ॥ ४८४ ॥

भीतो मां कोऽपि किंचिद्भणिष्यतीति त्रासादुद्विग्नः क्वचिदपि धृतेरभावात्। ' निलुक ':–संघपुरुषादिभयो नात्मानं गोपयन्।

ततः पदत्रयस्य कर्मधारयः। धिग्जीवितमिति–धिक्कारार्हप्राणधारणेन जीवति ॥ यतः सातिचारस्यायं दोषस्तस्मादित एव निरतिचारेण भाव्यं। यस्तु चिन्तयेत् द्राधीयान्मे पर्यायस्तत एवेष्टसिद्धिर्भविष्यति किं निरतिचारतया तं प्रत्याह—" न तर्हि " गाहा। ' संगणिज्जं ' ति–सम्यक्संख्यायन्ते एतावन्ति दिवसादीनि मे व्रतिनो जातस्येति तस्मान्मूलोत्तरगुणास्खलनायां तात्पर्यं कार्यम्। सा च गाढमप्रमादिनो भवति। यत आह—" जो नवि " गाहा। ' अगुणेहि य ' त्ति अगुणैश्च मिथ्यात्वादिभिर्न च स्खलितो मोक्षमार्गाच्च्यावित इति। ' अज्जियामि'ति मे शब्दार्थो मिशब्दः पठनीयः अन्यथा गाथाभंगात्। तदेवमादित आरभ्यानेकाकारेषूपदेशेषु सदनुष्ठानगोचरेषु दत्तेष्वपि केचिन्न प्रतिपद्यन्ते प्रतिपन्नमपि चापरे शिथिलयन्तीति दर्शयन्नाह—" इय " गाहा। इत्युक्तेन प्रकारेण गणितं परिसंख्यातं ' संवत्सरमुसभजिणो ' इत्यादिना सदनुष्ठानमिति विशेष्यं सर्वत्र गम्यते इति तुलितमाकलितमवन्तिसुकुमालोदाहरणादिना। इति बहुधा दर्शितमार्यमहागिरिदृष्टान्तादिना। नियमितं च नियन्त्रितं अन्वयव्यतिरेकाभ्यां–'समिईकसायगोरवे'त्यादि यतनयान्वयेन ' बायालमेसणाओ ' इत्यादिना व्यतिरेकेण नियतं दर्शितमिति यावत्। यदि तथापीयताऽप्यादरेण कथयता न प्रतिबुध्यते गुरुकर्मभिः सद्भिर्न तत्त्वदर्शिभिर्भूयते, ततः किं क्रियतामन्यत्समधिकतरं? नूनं निश्चितं भवितव्यमनन्तकालं यावत्संसारे तैरिति गम्यते ॥ ८१ ॥ एतदेव शिष्यप्रश्नपूर्वकमाह—" किमगंतु "–येन संयमश्रेणिः शिथिलीकृता भवति स किमिति पुनरगन्तुः–सम्यगनुष्ठानमार्गे गन्ता न भवति, उच्यते–स तदेत शैथिल्यमेव प्रति–सामस्त्येन मोहबाहुल्याद्धश्रयति वज्रवन्निबिडं करोति। यथा पश्चादतिक्लेशेनोद्यच्छत्युद्यमं करोति। यथा ह्युच्चैःस्थानात्पतितो भग्नाङ्गोपाङ्गतया पुनरारोहाय दुःखमुद्यच्छत्येवमेषोऽपीत्यर्थः। उक्तश्चासकृत्प्रागप्ययमर्थः। ' काऊण संकिलिट्ठं दुलहं विसोहिपय 'मिति। " अवि नाम चक्कवट्टी चएज्ज सव्वं पि चक्कवट्टिसुहं। न य ओसन्नविहारी, दुहिओ ओसन्नयं चयइ ॥ १ ॥ " इति च एतच्चायुक्ततरं यत उक्तम्—" वरं कृतध्वस्तगुणादत्यन्तमगुणः पुमान्। प्रकृत्या ह्यमणिः श्रेयान्नालङ्कारच्युतोपलः ॥ २ ॥ " इति ततो मूलादेव प्रमादो रक्षणीयः। ' किमगंतु ' इत्यत्रानुस्वारव्यत्ययं कृत्वा तुशब्दं चार्थे व्यवस्थाप्य किं चांगेति प्राग्वृत्तौ व्याख्यातमस्ति तद्यदि सहृदयानां हृदयंगमं

भाति तदा तत एव बोद्धव्यम् ॥ ८२ ॥ गणिततुलिताद्युपदेशं यो न बुद्धयते तस्य शिक्षामाह—" जइ " गाहा यदि तु सर्वमुपदेशजातमुपलब्धं हृदयेनावधारितम् । उपलब्धेऽपि यद्यात्मोपशमेन रागादिजयेन भावितः । अयमर्थः—स एवोपदेशोपलम्भो भण्यते यत्र रागादिजयो भवति । यदुक्तम्—तज्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः । तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुम् ॥ १ ॥ इति ततश्च हे विवेकिनः! कायं वाचं मनश्चोत्पथेन यथा न दद्ध्वं तथा यतध्वमिति शेषः । यथोत्पथप्रवृत्ता योगा न भवन्ति तथा वर्त्तितव्यमित्यर्थः ॥ तत्र तावत्कायमधिकृत्याह—" हत्थे " गाहा । हस्तौ पादौ प्रयोजनेऽपि नासंवृतावप्रतिलेख्याऽप्रमार्ज्य च क्षिपेत् एवं कायमपि । ' कुम्मो व्व ' इत्यादिना संवृतत्त्वमेवाह—उक्तं च शय्यम्भवपूज्यैः—"कुम्मो व्व अलीणपलीणगत्तो परकमिज्जा तव संजमंमि " ॥ ४८४ ॥ वाचमङ्गीकृत्याह—

**विकहं विणोयभासं, अंतरभासं अवक्कभासं च । जं जस्स अणिट्ठमपुच्छिओ य भासं न भासिज्जा ॥ ४८५ ॥**
**अणवट्ठियं मणो जस्स, झायइ बहुयाइं अट्टमट्टाइं । तं चिंतिअं च न लहइ, संचिणइ अ पावकम्माइं ॥ ४८६ ॥**
**जह जह सव्वुवलद्धं, जह जह सुचिरं तवोवणे वुच्छं । तह तह कम्मभरगुरू, संजमनिब्बाहिरो जाओ ॥ ४८७ ॥**
**विज्जप्पो जह जह ओसहाइं पिज्जेइ वायहरणाइं । तह तह से अहिययरं, वाएणाऊरिअं पुट्टं ॥ ४८८ ॥**
**दड्ढजउमकज्जकरं, भिन्नं संखं न होइ पुणकरणं । लोहं च तंबविद्धं, न एइ परिकम्मणं किंचि ॥ ४८९ ॥**
**को दाही उवएसं, चरणालसयाण दुव्विअड्ढाणं । इंदस्स देवलोगो, न कहिज्जइ जाणमाणस्स ॥ ४९० ॥**

विकथा–राजादिसत्का । विनोदभाषा कालनयनमात्रफला । अन्तरभाषा–गुर्वादेर्जल्पतः । अवाक्यभाषा–जकारमकारादिः । या च यस्य कस्याप्यनिष्टा मर्मस्पर्शिनी तां सर्वां न भाषेतेति सम्बन्धः । अपृष्टश्च वाचालतया न भाषेतेति ॥ मनोऽधिकृत्याह—" अणवट्ठियं " गाहा ' अट्टमट्टाइं ' ति–पापसम्बद्धान्यर्द्दवितर्द्दप्रयोजनानि ॥ पुनरपि गुरुकर्मणां विपरीतचारितां दर्शयति—" जह जह "

गाहा। तपोवने साधुमध्ये गच्छवासेन 'संजमनिव्वाहिरो' त्ति–आगमोक्तानुष्ठानबहिर्भूतो नागरं नरं कंचिदसाध्यव्याध्यन्वितमकल्याणिनमिति गम्यते। अयमुपनयः भाववैद्ये कर्मवातहराणि सिद्धांतपदौषधानि पाययत्यप्यनेकधा पापी यः प्राणी रोगिणां चित्तोदरं पापवायुना गाढतरं पूर्यंत इति ॥ किमिति–सिद्धान्तपदौषधैरपि तेषां न कोऽपि गुणो जायत इत्यत्र दृष्टान्तानाह—"दड्ढजउ" गाहा। यथा दग्धेन जतुना न कार्यं भवति, भग्नश्च शङ्खः पुनः सज्जीकर्तुं न शक्यते। ताम्रविद्धं च लोहं नान्यघटनां प्राप्नोति घण्टान्तानि लोहानीति प्रसिद्धेरेवं यतिरपि गुरुकर्मा चिकित्सितुं न शक्यत इति ॥ एतदेवाह—"को दाही" गाहा। अयं भावार्थः—यथा देवलोकगुणान् जानानस्येन्द्रस्याग्रे देवलोको न कथ्यते, कथने हि केवलमुपहास्यता स्यात्। तथा तेऽपि किल वयमेव जानीम इत्युपदिशन्तमुपहसन्त्येव न पुनस्ते किंचिज्जानन्ति प्रबलमोहनिद्रावष्टब्धत्वादन्यथोन्मार्गप्रवृत्तेरयोगादिति ॥ ४९० ॥
ननु कथमयमुन्मार्ग इत्याह—

दो चेव जिणवरेहिं, जाइजरामरणविप्पमुक्केहिं। लोगम्मि पहा भणिया, सुस्समण सुसावगो वाऽवि ॥ ४९१ ॥
भावच्चणमुग्गविहारया य दव्वच्चणं तु जिणपूआ। भावच्चणाउ भट्ठो, हविज्ज दव्वच्चणुज्जुत्तो ॥ ४९२ ॥
जो पुण निरच्चणो च्चिअ, सरीरसुहकज्जमित्ततल्लिच्छो। तस्स नहि बोहिलाभो, न सुग्गई नेय परलोगो ॥ ४९३ ॥
कंचणमणिसोवाणं, थंभसहस्सूसिअं सुवण्णतलं। जो कारिज्ज जिणहरं, तओऽवि तवसंजमो अहिओ ॥ ४९४ ॥
निव्वीए दुब्भिक्खे, रण्णा दीवंतराओ अन्नाओ। आणेऊणं बीअं, इह दिन्नं कासवजणस्स ॥ ४९५ ॥
केहिवि सव्वं खइयं, पइन्नमन्नेहिं सव्वमद्धं च। वुत्तं गयं च केई, खित्ते खुट्टंति संतत्था ॥ ४९६ ॥
राया जिणवरचंदो, निव्वीयं धम्मविरहिओ कालो। खित्ताइं कम्मभूमि, कासववग्गो य चत्तारि ॥ ४९७ ॥
अस्संजएहिं सव्वं, खइअं अद्धं च देसविरएहिं। साहूहिं धम्मबीअं, उत्तं नीअं च निप्फत्तिं ॥ ४९८ ॥

सुवर्णमणिप्रासादादधिकौ तपसंजमौ।

जे ते सव्वं लहिउं, पच्छा खुट्टंति दुब्बलधिईया। तवसंजमपरितंता, इह ते ओहरिअसीलभरा ॥ ४९९ ॥
आणं सव्वजिणाणं, भंजइ दुविहं पहं अइक्कंतो। आणं च अइक्कंतो, भमइ जरामरणदुग्गम्मि ॥ ५०० ॥

ननु तृतीयः संविग्नपाक्षिकमार्गोऽप्यस्ति स कथं नोक्तः? सत्यमपिशब्दसूचितोऽसावनयोरेवान्तर्भूतो द्रष्टव्यः। सन्मार्गोपबृंहकत्वेन तन्मध्यपातित्वाविरोधादिति। एतावेव मार्गौ भावार्चनद्रव्यार्चनशब्दाभिधेयावित्याह—"भावच्चण" गाहा। भावार्चनमुग्रविहारतादि सम्यक्चारित्राराधनम्। द्रव्यार्चनं तु–जिनपूजारूपसम्यग्द्रव्यस्तवाराधनम्। अनयोः प्रथममेव प्रधानं तदशक्तावितरदपि विधेयं तस्यापि पुण्यानुबन्धिपुण्यहेतुतया पारम्पर्येण भावार्चनहेतुत्वादिति॥ यद्येवं तर्हि प्रस्तुते किं स्थितमित्याह—" जो पुण " गाहा। एवं मन्यते द्वावेव अनन्तरोपवर्णितौ मार्गौ सर्वज्ञाभिमतौ। अयं तून्मार्ग एवोभयलिङ्गशून्यत्वादत एव यः पुनरिति तद्व्यतिरेकितयोपात्तः। निरर्चनो–भावार्चनरहितः। तल्लिच्छशब्दो दृश्यस्तत्परतावाचकः। बोधिलाभः–प्रेत्यजिनधर्मप्राप्तिः। सुगति–मोक्षावाप्तिः। परलोकः–सुदेवत्वाद्यवाप्तिः॥ द्रव्यार्चनभावार्चनयोः किमभ्यधिकतरमित्यत्रोच्यते—" कंचण " गाहा। रत्नमयचैत्यभवनद्रव्यार्चनकर्त्तुरपि सकाशात्ततः संयमभावार्चनकर्त्तुराधिक्यं ततस्तत्रैव यत्नः कार्यः॥ यस्तु पार्श्वस्थादिर्यत्नं करोति तस्यापायान् दर्शयितुं दृष्टान्तास्तावदाह—" निव्वीए " गाहा। " केहि वि " गाहा। कदाचिद्दुर्भिक्षे निर्बीजे सति राज्ञा देशान्तरादन्यस्मादानीय बीजमिह स्वदेशे कर्षकलोकस्य दत्तं निष्पन्नस्यास्य समभागो देय इति॥ तत्र कैश्चित्सर्वं भक्षितम्। अन्यैरर्द्धं प्रकीर्णमर्द्धं भक्षितम्। अपरैः सर्वं प्रकीर्णं–निष्पत्तिं नीतम्। केचित्सर्वं व्युप्तोद्गतं निष्पन्नं सत् क्षेत्र एव कुट्टयन्ति, राज्ञश्चोरिकया गृहे नयनाय, अत एव संत्रस्ता राजदण्डाद् भीताः। तेन ज्ञाताश्च वधादीन् प्राप्नुवन्ति॥ ९५–९६॥ दार्ष्टान्तिकमाह—" राया " गाहा। " अस्संजएहिं " गाहा। ' चत्तारि ' त्ति–चत्वारोऽसंयतदेशविरतसुसाधुपार्श्वस्थाः। तेषां जीनवरराजेन धर्मबीजं केवलालोकद्वीपादानीय मोक्षधान्यावाप्तये समर्पितमिति। तत्रासंयतैर्विरतिधर्मरूपं बीजं सर्वं खादितं, तद्विरहितत्वात्तेषामर्द्धं च देशविरतैः खादितमर्द्धस्यैव तेषु दर्शनात्। साधुभिः

पुनस्तद्धर्मबीजं व्युप्तं-सुक्षेत्रे नीतं च निष्पत्तिं सम्यक्पालनेन ॥ पार्श्वस्थैस्तर्हि किं कृतं कीदृशा वा त इत्याह "जे ते" गाहा ये ते सर्वविरतिरूपं धर्मबीजं लब्ध्वाऽपि क्षेत्रे-शरीरे कुट्टयन्ति-खण्डयन्ति भगवदनादिष्टाश्चौरकर्षका इव। अत एव दुर्बलधृतिकास्तपःसंयमयोः परितान्ताः-श्रान्ताः। अवभृतशीलभराः पार्श्वतो मुक्तशीलभारास्ते पार्श्वस्थादयो भवन्ति॥ सांप्रतं यदर्थमिदमुपक्रान्तं तद्दर्शयितुमाह— "आणं" गाहा। द्विविधं पथं सुश्रमण-सुश्रावकलक्षणम् ॥ ५०० ॥ यदा तर्हि भग्नपरिणामतया न शक्नोति व्रतं धारयितुं तदा किं विधेयमित्याह—

जइ न तरसि धारेउं, मूलगुणभरं सउत्तरगुणं च। मुत्तूण तो तिभूमी, सुसावगत्तं वरतरागं ॥ ५०१ ॥
अरिहंतचेइआणं, सुसाहुपूयारओ दढायारो। सुस्सावगो वरतरं, न साहुवेसेण चुअधम्मो ॥ ५०२ ॥
सव्वंति भाणिऊणं, विरई खलु जस्स सव्विया नत्थि। सो सव्वविरइवाई, चुक्कइ देसं च सव्वं च ॥ ५०३ ॥
जो जहवायं न कुणइ, मिच्छद्दिट्ठी तओ हु को अन्नो ?। वड्ढेइ अ मिच्छत्तं, परस्स संकं जणेमाणो ॥ ५०४ ॥
आणाए च्चिय चरणं, तब्भंगे जाण किं न भग्गंति। आणं च अइक्कंतो, कस्साएसा कुणइ सेसं ॥ ५०५ ॥
संसारो अ अणंतो, भट्ठचरित्तस्स लिंगजीविस्स। पंचमहव्वयतुंगो, पागारो भल्लिओ जेण ॥ ५०६ ॥
न करेमि त्ति भणित्ता, तं चेव निसेवए पुणो पावं। पच्चक्खमुसावाई, मायानियडीपसंगो य ॥ ५०७ ॥
लोएऽवि जो ससूगो, अलिअं सहसा न भासए किंचि। अह दिक्खिओऽवि अलियं, भासइ तो किंच दिक्खाए ? ॥५०८॥
महव्वयअणुव्वयाइं, छंडेउं जो तवं चरइ अन्नं। सो अन्नाणी मूढो, नावाबु(छुड्डो)ड्डो मुणेयव्वो ॥ ५०९ ॥
सुबहुं पासत्थजणं, नाऊणं जो न होइ मज्झत्थो। नय साहेइ सकज्जं, कागं च करेइ अप्पाणं ॥ ५१० ॥

यदि न शक्नोषि धारयितुं मूलगुणभरं सोत्तरगुणं तदा तिस्रो (जन्मविहारदीक्षा) भूमिर्मुक्त्वा सुश्रावकत्वमेव वरतरं-प्रधानतरं कर्त्तुं युक्तम्। भूमयश्च जन्मापेक्षया ज्ञेया न दीक्षापेक्षया ॥ अमुमेवार्थं समर्थयन्नाह—"अरहंत" गाहा। अर्हच्चैत्यानां सुसाधूनां च यथौचित्येन पूजारतः दृढो निष्प्रकम्पश्चाचारोऽणुव्रतादिपालनात्मको यस्य स दृढाचारः। सुश्रावको वरतरं प्रधानतरो न पुनः साधुवेषेण च्युतधर्मः शासनलाघवकारित्वात्। तथा "सव्वंति" गाहा। 'सव्वे'ति उपलक्षणत्वात्—'सव्वं सावज्जं जोगं पच्चक्खामि जावज्जीवाए तिविहं तिविहेण' मित्येवं भणित्वा यस्य विरतिः सर्विका-सर्वविरतिर्नास्ति स सर्वविरतिवादी व्रतग्रहण काले भ्रश्यति देशविरतेः सर्वविरतेश्च प्रतिज्ञाताकरणात् ॥ न केवलमयमुभयभ्रष्ट एव भवति किन्तु मिथ्यादृष्टिश्च भवतीत्याह— "जो जह" गाहा। यो यथावादं यथोक्तमागमे तथा न करोति ततः कोऽन्यो मिथ्यादृष्टिः, स एव मिथ्यादृष्टिरित्यर्थः ॥ किंच— "आणाए च्चिय" गाहा। आज्ञया-भगवदादेशेनैव वर्त्तमानस्य चारित्रं व्यवतिष्ठते 'तब्भंगे' इत्यादि स्पष्टम् ॥ अभ्युच्चयमाह— "संसारो" गाहा। पञ्चमहाव्रतभिरत्युन्नतः प्राकार इव प्राकारो जीवनगररक्षाक्षमो गुणकलाप इति गम्यते। 'भिल्लिओ' त्ति विलुप्तो येनापुण्यवतेति ॥ अधुना महासाहसिकत्वं तस्य दर्शयन्नाह—"न करेमि" गाहा प्रत्यक्षो मृषावादी साक्षादलीकवावदूकः पश्यतोहर इवात्यन्तमचिकित्स्य इति। तस्य च मायानिकृत्योरान्तरबाह्यशाठ्ययोः प्रसंगः प्राप्तिः संपद्यते ॥ तथा चासौ प्राकृतलोकादपि पापीयानित्याह—"लोगे वि" गाहा। सशूको मनागपि पापभीरुः सोऽपि विमृश्यकारित्वादलीकं सहसा किंचिन्न भाषते। 'अह दिक्खिओवी 'त्यादिना ततो व्यतिरेकमाह—'किं चेति' चकारः पादपूरणे ॥ यस्तु महाव्रताणुव्रतानि पालयितुमशक्तस्तपसा तु निकाचितान्यपीति तपो हि दुरतिक्रममिति च श्रुत्वा तपस्येवोद्यमं करोति तं प्रत्याह—"महव्वय" गाहा। 'नावावोहो' त्ति नौवोद्रो मन्तव्यः। यो हि जलधौ नावं भित्त्वा मूर्खतया लोहकीलकान् गृह्णाति तत्समदृशोऽयं दृष्टव्यः। संयमनौभञ्जेन गृहीततपो यः कीलकस्यापि भवजलधौ निमज्जनात् व्यर्थं तद्ग्रहणं तस्मात् द्वयोरपि यत्नो विधेयः ॥ साम्प्रतं पार्श्वस्थाद्याकीर्णलोके माध्यस्थमालम्बनीयं न मौखर्यं कार्यमन्यथा प्रस्तुतार्थक्षतिः स्यादित्याह—"सुबहुं" गाहा। 'कागं च करेइ' ति तद्दोषोद्घोषमौखर्यं क्रिय-

पार्श्वस्थादि-बलवत्तरे माध्यस्थमालम्बनीयम्।

माणे प्रत्युत रोषात्सर्वैस्तैः संभूयात्मनो गुणवत्त्वख्यापनाय हंसकल्पतामारोप्य लोकमध्ये स एव निर्गुणतया प्रख्याप्य काककल्पः क्रियत इत्यर्थः ॥ ५१० ॥ तदयं सुस्थितस्योपदेशो, दुस्थितेन तु यद्विधेयं तत्काक्वा प्राह—

परिचिंतिऊण निउणं, जइ नियमभरो न तीरए वोढुं। परचित्तरंजणेणं, न वेसमित्तेण साहारो ॥ ५११ ॥
निच्छयनयस्स चरणस्सुवग्घाए नाणदंसणवहोऽवि। ववहारस्स उ चरणे, हयम्मि भयणा उ सेसाणं ॥ ५१२ ॥
सुज्झइ जई सुचरणो, सुज्झइ सुस्सावओऽवि गुणकलिओ। ओसन्नचरणकरणो, सुज्झइ संविग्गपक्खरुई ॥ ५१३ ॥
संविग्गपक्खियाणं, लक्खणमेयं समासओ भणियं। ओसन्नचरणकरणाऽवि जेण कम्मं विसोहंति ॥ ५१४ ॥
सुद्धं सुसाहुधम्मं, कहेइ निंदइ य नियमायारं। सुतवस्सियाण पुरओ, होइ य सव्वोमरायणीओ ॥ ५१५ ॥
वंदइ नय वंदावइ, किइकम्मं कुणइ कारवे नेय। अत्तट्ठा न वि दिक्खइ, देइ सुसाहूण बोहेउं ॥ ५१६ ॥
ओसन्नो अत्तट्ठा, परमप्पाणं च हणइ दिक्खंतो। तं छुहइ दुग्गईए, अहिययरं बुड्डइ सयं च ॥ ५१७ ॥
जह सरणमुवगयाणं, जीवाण निकिंतए सिरे जो उ। एवं आयरिओऽविहु, उस्सुत्तं पन्नवंतो य ॥ ५१८ ॥
सावज्जजोगपरिवज्जणा उ सव्वुत्तमो जईधम्मो। बीओ सावगधम्मो, तइओ संविग्गपक्खपहो ॥ ५१९ ॥
सेसा मिच्छद्दिट्ठी, गिहिलिंगकुलिंगदव्वलिंगेहिं। जह तिण्णि य मुक्खपहा, संसारपहा तहा तिण्णि ॥ ५२० ॥

अयमाशयो निर्गुणस्य लिंगं धारयतो जनमिथ्यात्वोत्पादनहेतुत्वेन गाढतरानन्तसंसारावाप्तेस्तत्परित्याग एव श्रेयान् उक्तं हि प्राक् 'मुत्तूण तो तिभूमि सुसावगत्तं वरतरागं' ति ॥ ५०१ ॥ स्यादेतद्यदि नाम चारित्रमनेन विनाशितं तथापि ज्ञानदर्शने स्तः, ततश्च नैकान्तेन नैर्गुण्यं तथा च लिङ्गत्यागः पर्यवस्येन्नैवं चरणाभावे तत्त्वतस्तयोरप्यभावात्, यत आह—" निच्छय " गाहा । निश्चयनय-

स्यान्तस्तत्त्वनिरूपणाभिप्रायस्येदं दर्शनं, यदुत चरणस्योपघाते सति ज्ञानदर्शनवधोऽपि जायत एव, तयोस्तत्साधकत्वेनैव पारमार्थिक स्वरूपावस्थितेः, तदभावे त्वकिंचित्करतयाऽवस्तुत्वप्राप्तेः। व्यवहारस्य तु बहिस्तत्त्वनिरूपकाभिप्रायस्य पुनश्चरणे हते भजना-विकल्पना ज्ञानदर्शनयोः, कार्याभावेनैकान्ततः कारणाभावासिद्धेः निर्धूमस्यापि वन्हेर्दर्शनादिति ॥ तदियता ग्रन्थेन यदुक्तं द्वावेव मार्गौ जिनवरैरुक्ताविति तद् व्यवस्थापितमधुना तत्रापिशब्दसूचितसंविग्नपाक्षिकेन सह तयोरेव स्वकार्यकारित्वमाह—"सुज्झइ" गाहा। 'संविग्गपक्खरुइ' त्ति संविग्ना-मोक्षाभिलाषिणः सुसाधवस्तत्पक्षे तदनुष्ठाने रुचिरभिलाषोऽस्येति संविग्नपक्षरुचिः। सिद्धिप्रतिबद्ध-विशुद्धबुद्धिबन्धुः सदापि यः सुमनाः संविग्नपाक्षिकोऽसौ तस्वाऽन्यत्र प्रवृत्तोऽपि ॥ ते तर्हि संविग्नपक्षरुचयः कथं लक्ष्यन्त इत्याह—"संविग्ग" गाहा। यदनया गाथया प्रतिज्ञातं तदेव संविग्नपाक्षिकलक्षणमाह—"सुद्ध" गाहा। "वंदइ" गाहा। शुद्धं सुसाधुधर्मं कथयति, न पुनः स्वमन्दाचारपोषत्वेनाशुद्धम्। तथा कथनस्य दुरन्तत्वेन ज्ञानत्वात्तथाहि—

"नो सत्थं न विसं न साय(इ)णिवसो नो पेय-भूयग्गहो, दुक्कालो न दुराउलं न जलणो जालाकरालोचितं।
सिद्धंतो जिणदेसिओ कुमइणा लोएण मिच्छगहा, संपाडिज्ज अणत्थसत्थमिह जं देसिज्जमाणोऽन्नहा ॥ १ ॥"

'सव्वोमरायणिओ' त्ति-सर्वावमरात्निकः अद्यदिनदीक्षितेऽल्पोऽप्यात्मानं न्यूनं मन्यते इत्यर्थः, कृतिकर्मवन्दनकविश्रामणादिकं सुसाधूनां स्वयं करोति, न पुनस्तान् कारयति ॥ किमित्यात्मार्थं न प्राव्राजयतीत्याह—"ओसन्नो" गाहा। न केवलमात्मार्थं प्रव्राजयन् भवजलधौ ब्रुडति, वितथं प्ररूपयन्नपि ब्रुडतीत्याह—"जह" गाहा। यथा हि शरणोपगतानां जीवानां यः शिरांसि कृन्तति स विश्वासघातकोऽभिधीयते। एवमाचार्योऽप्युत्सूत्रं प्रज्ञापयन् विश्वासघातक एव। तथा च तानात्मनं च दुर्गतौ क्षिपतीति। निगमयन्नाह—"सावज्ज" गाहा। सावद्ययोगानां सर्वथा त्यागेन यतिधर्मः प्रथमः सर्वोत्तमो मोक्षमार्गस्तद्धेतुत्वादपरावपि मोक्षमार्गाविति ॥ शेषाणां का वार्त्तेत्यत आह—"सेसा" गाहा। शेषाः-प्रोक्तयतिव्यतिरिक्ताः मिथ्यादृष्टयो विपरीताभिनिवेशाद्भवानुयायिन

इत्यर्थः ॥ के तेऽत आह—गृहिलिङ्गकुलिङ्गद्रव्यलिङ्गैः करणभूतैर्यै वर्त्तन्ते । गृहिलिङ्गं–गार्हस्थ्यम् । कुलिङ्गं–पाशुपतादिवेषः । द्रव्यलिङ्गं–पार्श्वस्थानां रजोहरणादि । एवं च स्थिते किं संपन्नमित्याह—' जह तिन्निओ ' त्ति ॥ ५२० ॥ ननु गृहिपाशुपतादयो भवन्तु भवानुयायिनो भगवल्लिङ्गधारिणस्तु कथमित्यत्राह—

सर्वैः द्रव्यलिङ्गान्यनंतशो मुक्तानि ।

संसारसागरमिणं, परिब्भमंतेहिं सव्वजीवेहिं । गहियाणि य मुक्काणि य अणंतसो दव्वलिंगाइं ॥ ५२१ ॥
अच्चणुरत्तो जो पुण, न मुयइ बहुसोऽवि पन्नविज्जंतो । संविग्गपक्खियत्तं, करिज्ज लब्भिहिसि तेण पहं ॥ ५२२ ॥
कंताररोहमद्धाणओमगेलन्नमाइकज्जेसु । सव्वायरेण जयणाइ कुणइ जं साहुकरणिज्जं ॥ ५२३ ॥
आयरतरसंमाणं, सुदुक्करं माणसंकडे लोए । संविग्गपक्खियत्तं, ओसन्नेणं फुडं काउं ॥ ५२४ ॥
सारणचइआ जे गच्छनिग्गया पविहरंति पासत्था । जिणवयणबाहिराऽवि य, ते उ पमाणं न कायव्वा ॥ ५२५ ॥
हीणस्सऽवि सुद्धपरूवगस्स संविग्गपक्खवायस्स । जा जा हविज्ज जयणा, सा सा से निज्जरा होइ ॥ ५२६ ॥
सुक्का(सुंका)इयपरिसुद्धं, सइ लाभे कुणइ वाणिओ चिट्ठं । एमेव य गीयत्थो, आयं दट्ठु समायरइ ॥ ५२७ ॥
आमुक्कजोगिणो च्चिअ, हवइ थोवाऽवि तस्स जीवदया । संविग्गपक्खजयणा, तो दिट्ठा साहुवग्गस्स ॥ ५२८ ॥
किं मूसगाण अत्थेण, किं वा कागाण कणगमालाए ? । मोहमलखवलिआणं, किं कज्जुवएसमालाए ? ॥ ५२९ ॥
चरणकरणालसाणं अविणयबहुलाण सययऽजोगमिणं । न मणी सयसाहस्सो, आबज्झइ कुच्छभासस्स ॥ ५३० ॥

अनादित्वात्कालस्य सर्वभावैः संयोगधर्मकत्वाच्च प्राणिनामनन्तशो द्रव्यलिङ्गसम्बन्धो न विरुद्ध इति भावः ॥ एवं च स्थितेन द्रव्यलिङ्गेन काचिदास्थाऽतस्त्याग एव तस्य श्रेयान् । यस्तु न त्यजति स आगमज्ञैः प्रज्ञापनीयस्तथापि च यो न त्यजेत्तं प्रत्याह—

" अत्थणुरत्तो " गाहा । यः पुनर्लिङ्गधारणेऽत्यन्तानुरक्ते मनाक् सशूकश्च गुणदोषकथनेन बहुशो गीतार्थैः प्रज्ञाप्यमानोऽपि न मुञ्चति द्रव्यलिङ्गं स संविग्नपाक्षिकत्वमनन्तरोक्तलक्षणं कुर्यादित्युपदेशः । यतोऽसौ तेन क्रियमाणेन लप्स्यते पथं ज्ञानादिमोक्षमार्गमिति ॥ सा तर्हि संविग्नता क्वोपयुज्यत इत्याह—" कंतार " गाहा । कान्तारं–महारण्यं रोधेन नगरादौ परचक्राक्रान्तिः । अध्वानमार्गः । अवमं–दुर्भिक्षम् । ग्लानत्वं–ज्वरादिमान्द्यम् तदादिकार्येषूपस्थितेषु सर्वादरेणागमोक्तयतनया यथा तेषां चित्तोपरोधो न भवति तथा संविग्नपाक्षिकः साधूनां यत्करणीयं प्रयोजनं करोति, साधवोऽपि प्रतीच्छन्ति, न पुनः प्रार्श्वस्थादीनामिव न प्रतीच्छन्ति ॥ एतच्चातिदुष्करमत एवासौ प्रशस्यतयोक्तो यत आह—" आयर " गाहा । आदरतरेण–सातिशयप्रयत्नेन सन्मानः सुसाधूनामभ्यर्चनं यस्मिन् संविग्नपाक्षिकत्वे तदादरतरसन्मानं सुदुष्करं–दुरनुष्ठेयम् । मानसंकटे–गर्वेण तुच्छे लोके स्वाभिमानग्रस्तप्राणिगणमध्ये दुःशकं कर्त्तुमिति भावः ॥ संविग्नपाक्षिकत्वमवसन्नेन–शिथिलेन स्फुटं लोकप्रकाशं निर्व्याजं वा कर्त्तुं दुष्करमिति सम्बन्धः ॥ अथ ये सुसाधुविहारेण बहुकालं विहृत्य पश्चात्कर्मपरतन्त्रतया शैथिल्यमवलम्बन्ते तांश्च प्रमाणीकृत्यापरे प्रमादे वर्त्तमाना गीतार्थैः सूत्रसंदर्शनेनानुयुक्ता यदि ब्रूयुर्यदुत किं कुर्मो, वयमस्मत्तो बृहत्तरैरप्यतदाचरितं तान्प्रतीदमुच्यते ॥ "सारण" गाहा । ग्रन्थाग्रं ११००० स्मारणस्योपलक्षणत्वात् स्मारणवारणचोदनादिभिस्त्याजिता निर्वेदिताः सन्तो ये गच्छान्निर्गताः प्रविहरन्ति यथेष्टचेष्टया विचरन्ति ते प्रमाणं नैव कर्त्तव्या इति सम्बन्धः, सुसाधुतया नैव दृष्टव्या इत्यर्थः । अग्रेतनस्यापि तुशब्दस्यात्र सम्बन्धादपि तु पार्श्वस्थास्ते यतो जिनवचनबाह्या इतिहेतुद्वारेण विशेषणम् । अयमर्थः—ये जिनवचनबाह्यतया चिरादपि पार्श्वस्था जातास्ते चारित्राचरणे प्रमाणं विदुषा न क्वचिदपि कार्याः, सूत्रमेव प्रमाणयितव्यम् । अन्यथाऽर्थापत्त्या भगवतोऽप्रमाणता आपद्येत । तथा चावाचि श्रीहरिभद्रसूरिभिः—सुयवज्झायरणरया पमाणयंता तहाविहं लोयं । भुवणगुरुणो वराया, पमाणयं नावगच्छंति ॥ १ ॥ सुत्तेण चोइओ जो, अन्नं उद्दिसिय तं न पडिवज्जे । सो तंतवायबज्झो, न होइ धम्मंमि अहिगारी ॥ २ ॥ इत्यादि तस्मादागमपरतन्त्रतैव लोकाचरितनिरपेक्षाऽपरलोकाङ्गं तस्यां च सत्यां शक्त्यनुरूपं यदेवानुष्ठीयते तदेव निर्जराकारीति ॥५२५॥ अमुमेवार्थमाह—"हीणस्स वि" गाहा ।

जिनवचनबाह्या न प्रमाणयितव्याः ।

संविग्नपक्षपातिनो या या यतनया मनाक् परिणतपरिमितोदकादिग्रहणरूपा सा सा से तस्य संविग्नपक्षपातिनो निर्जरा भवति कर्मविलयहेतुत्वात्तस्य कायेनान्यत्र प्रवृत्तस्यापि सदनुष्ठान एव गाढं चित्तप्रतिबन्धात्तथा चोक्तम्—संविग्गपक्खिओ पुण, अन्नत्थ पयट्टओ वि काएण। धम्मे च्चिय तल्लिच्छो, दढरत्तिथिव्व पुरिसंमि ॥ त्ति ॥ छ ॥ २६ ॥ इदानीं गीतार्थो बहुस्तोकगुणदोषपर्यालोचनं भगवदुपदेशात् किंचिदासेवमानोऽपि महतो निर्जरालाभस्य भाजनं स्यादिति सदृष्टान्तमाह—"सुंकाई" गाहा। शुल्को—राजदेयो भागस्तदादिर्येषां कर्मकरव्ययादीनां ते शुल्कादयस्तैः परिशुद्धो निर्वे(व)दितः शुल्कादिपरिशुद्धः शुल्कादीन् प्रपात्य यो लाभस्तस्मिन् सति वाणिजः करोति चेष्टां व्यवहारात्मिकाम्। एवमेव गीतार्थो ज्ञानाद्यधिकलाभरूपमायं दृष्ट्वा यद्यदा बहुगुणं तत्तदा आचारत्यासेवते आयव्ययतुलनया गीतार्थः प्रवर्त्तमानो निर्जरालाभवान् भवतीत्यर्थः ॥ २७ ॥ नन्वस्तु गीतार्थस्य निर्जरालाभो, यस्तु निष्प्रयोजनमेव संपूर्णानुष्ठानविकलः संविग्नपाक्षिकमार्गः स किमर्थं समर्थ्यत इत्याह—"आमुक्क" गाहा। आसमन्तान्मुक्ता योगा येन स आमुक्तयोगी तस्य तादृशस्यापि जातस्य साधुवर्गस्य भवत्येव स्तोका जीवदया, ततः संविग्नपक्षयतना मोक्षाभिलाषानुरागेण पूर्वोक्तरूपा वर्त्तना दृष्टा भगवद्भिरिति, तदयमर्थो यथा ह्यातुरो बहुकालमपथ्यासेवी सुवैद्यसंपर्कादिना विज्ञातपथ्यासेवनगुणत्वादारोग्याकाङ्क्षित्वेनापथ्यं हातुकामः पथ्यासेवनायां भावतः प्रतिबद्धोऽपि क्रमेणैवापथ्यं मुञ्चे ॥ तथा चोक्तमायुर्वेदे, उचितादहिताद्धीमान्, क्रमशो विरमेन्नरः। हितं क्रमेणोपचरेत्, क्रमश्चात्रोपदेक्ष्यते इति। तथा कथंचिदेव बहुकालं यः पार्श्वस्थादिभावभागी स सुसाधुसंपर्कादिना प्रादुर्भूततीव्रधर्मश्रद्धानोऽपि—'न य ओसन्नविहारी, दुहिओ ओसन्नयं चयइ' इत्यादिप्रागुक्तयुक्त्या दुस्त्यजत्वात्तद्भावस्य क्रमशो निवर्त्तमानो गाढं संयमप्रतिबद्धाभिप्रायः संपूर्णवीर्यलाभादर्वाक् संविग्नपाक्षिकः स्यात्तदर्थं तन्मार्गोऽपि मोक्षहेतुतया प्रज्ञापित इति ॥ २८ ॥ तदेवमनेकाकारान् सदुपदेशान् प्रतिपाद्य तेषां सुपात्रन्यासयोग्यतां विपक्षविक्षेपद्वारेणाह—"किं मूसगाण" गाहा। मूषककाकदृष्टान्तयोरेतयोर्दार्ष्टान्तिकमाह—'मोहमलखवलियाणं' ति मोहमलदिग्धानां गुरुकर्मणां जीवानां किं कार्यमुपदेशमालया किंचिदुपकाराभावात् ॥ २९ ॥ किंच—"चरण" गाहा। 'सययअजोग्गमिणं' ति सदा अयोग्यमेतदुपदेशमालाख्यं

आयव्ययं तोलयित्वा गीतार्थो आचरति।

वस्तु। नहि मणिर्लक्षमूल्यः काकस्य परिधीयते, परिधायकस्याप्युपहास्यत्वावाप्तेरिति ॥ ५३० ॥ किमेवमप्युच्यमाने केचिन्न सम्यग्वर्तेरन्, येनैवमुच्यते? बाढं, कर्मपरतन्त्रत्वात्प्राणिनां तदाह—

**नाऊण करयलगयाऽऽमलं व सब्भावओ पहं सव्वं। धम्मम्मि नाम सीइज्जइत्ति कम्माइं गुरुआइं ॥ ५३१ ॥**

**धम्मत्थकाममुक्खेसु जस्स भावो जहिं जहिं रमइ। वेरग्गेगंतरसं, न इमं सव्वं सुहावेइ ॥ ५३२ ॥**

**संजमतवालसाणं, वेरग्गकहा न होइ कण्णसुहा। संविग्गपक्खियाणं, हुज्ज व केसिंचि नाणीणं ॥ ५३३ ॥**

**सोऊण पगरणमिणं, धम्मे जाओ न उज्जमो जस्स। न य जणियं वेरग्गं, जाणिज्ज अणंतसंसारी ॥ ५३४ ॥**

**कम्माण सुबहुआणुवसमेण उवगच्छई इमं सव्वं। कम्ममलचिक्कणाणं, वच्चइ पासेण भन्नंतं ॥ ५३५ ॥**

**उवएसमालमेयं, जो पढइ सुणइ कुणइ वा हियए। सो जाणइ अप्पहियं, नाऊण सुहं समायरई ॥ ५३६ ॥**

ज्ञात्वा करतलगतामलकवत् परिस्फुटं सद्भावत उपादेयबुद्ध्याऽपि पथं ज्ञानादिकं मोक्षमार्गं सर्वविशेषं तथापि धर्मे नामेति संभाव्यत एतत्कैश्चित् सीद्यते प्रमादादिभिर्भूयते तत्तज्ज्ञायते कर्माणि गुरुकाणि तत् विजृम्भितं तदित्यर्थः ॥ ३१ ॥ अन्यच्च "धम्मत्थ" गाहा। धर्मार्थकाममोक्षाणां मध्ये कस्यापि भावः क्वापि रमते, ततो वैराग्यैकान्तरसं–वैराग्यैकप्रतिबद्धं प्रकरणमिदं न सर्वं जनमाह्लादयतीति भावः ॥ ३२ ॥ किंच—"संजम" गाहा। 'संविग्ग' त्ति–संविग्नपाक्षिकाणामुक्तलक्षणायां संयमतपोऽलसानामपि भवेद्वा कर्णसुखवैराग्यकथा केषांचिज्ज्ञानिनां संयमप्रतिबद्धचित्तत्वादवदातज्ञानानामिति यावत् ॥ ३३ ॥ अन्यच्चेदं प्रकरणं मिथ्यात्वाहि(दि)दष्टजन्तूनां साध्यासाध्यत्वविज्ञानाय प्रयुक्तं संग्रहपरिच्छेदकारीति दर्शन्नाह—"सोऊण" गाहा–श्रुत्वा प्रकरणमेतद् धर्मे यस्योद्यमो न संजातः। न च वैराग्यं–विषयवैमुख्यं जनितं तमनन्तसंसारीति जानीयाः कालदष्टवदसाध्य इत्यर्थः ॥ ३४ ॥ किमित्येवमत आह—"कम्माण" गाहा–कर्मणां मिथ्यात्वादीनामुपशमेन क्षयेण क्षयोपशमेन च किंचिच्छेषकर्मणामेव प्राणिनामुपाग-

॥ ५२८ ॥

च्छति-सद्बोधं जनयतीदं प्रकरणं सम्यक् । व्यतिरेकमाह—कर्मपङ्कदिग्धानां त्वम्रे भण्यमानमपि पार्श्वतो याति, नान्तःप्रविशत्युपरि प्लवत इत्यर्थः ॥ ३५ ॥ अधुनाऽस्यैव प्रकरणस्य पाठादिफलमाह—" उवएस " गाहा उपदेशमालामेतामनन्तरोक्तां यो धन्यः पठति सूत्रतःश्रृणोत्यर्थतः करोति च हृदये प्रतिक्षणमेतदर्थं भावयतीत्यर्थः । स जानात्यात्महितमिहलोकपरलोकयोः स्वपथ्यं ज्ञात्वा च सुखमकृच्छ्रेणैव समाचरत्यात्महितमेव ॥ अत्रार्थे रणसिंहमहाराज एव निदर्शनम् ॥

किलैतस्य विजयाक्षत्रियाकुक्षिराजीवराजहंसस्य जातमात्रस्यैवाग्रमहिष्याऽजयाभिधानया छद्मना प्रच्छन्नमरण्ये परित्याजितस्य कतिपयवत्सरान्ते यथावद्वृत्तान्तं विदित्वा संजातात्यन्तवैराग्यः श्रीविजयसेनमहाराजो विजया-तद्भ्रातृसुजयाभ्यां सार्द्धं जगदेकालङ्कारकारुण्याकूपारपरमेश्वरश्रीमहावीरपद्महस्तेन प्रव्रज्यामहोत्सवं स्वीचक्रे । ततोऽधिगतैकादशाङ्गश्रुतसंपन्निशिततरतरवारिधाराकरालातिविशालतपोऽनुष्ठाननिष्ठावाप्तधर्मदासगणिनामधेयोऽवधिज्ञानी स्वहस्तदीक्षिततीर्थकरान्तेवासित्वेनाध्ययनप्रबन्धविधित्सुरवधिना स्वपुत्रस्य प्राप्तस्वकीयराज्यस्य भाविनीं कलिच्छलनामालोकयन् प्रतिबोधविधानाय यथार्थमेतदुपदेशमालाप्रकरणमुत्पादयाञ्चकार । पाठयां चकार च । पुत्रप्रतिबोधसंविधाय तन्मातुलकमवोचच्च यथासमये समेत्य कलिच्छलितः स्वस्वस्रो(स्रो)यस्त्वया प्रतिबोधनीय इति । एवं च कतिचित्संवत्सरान्ते त्रिदशेश्वरातिथेयी प्रतीष्टवति महामुनौ शोभनावसरे सुजयसाधुर्विजयागणिनीसमन्वितः समाजगाम राजरणसिंहस्य रहस्याख्यानाय विजयपुरपरिसरारामवसुन्धरायाम् । सोऽपि विदितवृत्तान्तः समेत्याभिवन्द्य च मातुलं मातरं चाप्रतिमप्रमोदपल्लवितचित्तधृ(वृ)त्तिः पुरस्तादुपविश्योपदेशपरं परंपरामश्रौषीत् । समये श्रीविजयसेनमहामुनिवृत्तान्तविस्तारपूर्वं सुजययतिवरस्तमुपदेशमालामिमां श्रावयामास । सोऽपि सादरं सकृच्छ्रवणेऽप्यकरोत्कण्ठप्रतिष्ठितां तां मीमांसामास समासतोऽपि तस्यास्तात्पर्यम् । ततः प्रभृति प्रतिक्षणमन्तःकरणे कृत्वा परिभावयाम्बभूव विशेषेण । ततोऽप्यात्महितं ज्ञात्वा प्रस्तावे व्रतप्रतिपत्त्या तत्प्रास्तावीदिति वृद्धानामुपदेशः ॥ ५३६ ॥ साम्प्रतं सूत्रकारः स्वाभिधानं व्युत्पत्त्या प्रकटयन् तैरेव शब्दैः स्वपुत्रस्य रणसिंहस्य मुख्यवृत्त्योपकारार्थं कृतमेतत्प्रकरणमिति ज्ञापयन्नाह—

**धंत-मणि-दाम-ससि-गय–णिहिपयपढमक्खराभिहाणेणं । उवएसमालपगरणमिणमो रइअं हिअट्ठाए ॥ ५३७ ॥**

**जिणवयणकप्परुक्खो, अणेगसुत्तत्थसालविच्छिन्नो । तवनियमकुसुमगुच्छो, सुग्गइफलबंधणो जयइ ॥ ५३८ ॥**

**जुग्गा सुसाहुवेरग्गिआण परलोगपत्थिआणं च । संविग्गपक्खिआणं, दायव्वा बहुसुआणं च ॥ ५३९ ॥**

तत्र धन्तादेः पदषट्कस्य प्रथमाक्षरैर्धर्मदासगणिरित्यभिधानं नाम यस्य तेनेदमुपदेशमालाप्रकरणं रचितमिति सम्बन्धः । किमर्थं–हितार्थाय हितं–निःश्रेयसं सत्त्वानुग्रहो वा तदर्थमिति । अपरः पुनरयमर्थः–' ध्माताः '–कलंकशोधनार्थं पुटपाकं प्रापितास्ते च ते 'मणय'श्च–पुष्पराग–पद्मराग–वज्र–वैडूर्य–चन्द्रकान्तादयो ध्मातमणयस्तेषां ' दामानि '–मालाः । ' शशिनो ' दुर्वर्णसुवर्णकर्प्पूराः । ' गजाः '–कुञ्जरास्तुरगरथपदातीनामुपलक्षणमेतत् । ' निधयो '–निखातद्रव्याणि तेषां 'पद'मास्पदं–स्थानं, राजा स चेह प्रस्तावाद्रण-सिंहस्तस्य प्रथमाक्षराभिधानेन, कोऽर्थः । प्रथममक्षरमोंकारो मातृकाया इव सर्वशास्त्राणामादौ मङ्गलार्थमुपादीयमानत्वात्तस्य च पञ्च-परमेष्ठिवाचकतया विश्रुतत्वात् । अभिधानमन्तर्जल्पो जाप इत्यर्थस्तेन हेतुना रचितमुपदेशमालाप्रकरणमेतदिति योगः ॥ कलिच्छलितो ह्यसावेतयोपदेशपरम्परया प्रतिबोधितो यथेह परलोककल्याणकारणपञ्चमङ्गलजापपरायणो भवति तथा करोमीत्यभिप्रायेणेत्यर्थः । अत एवोक्तं हितार्थाय एतद्धितस्य पथ्यं यदेवंविधमन्त्रराजजापपरायणो भवति । तथाहि—" सिद्धान्तस्य रहस्यमेकमिह यः पाथेयमामुष्मिकम् , सम्यक् पूर्वविदामपि प्रतनुते दुस्साधसिद्धिर्ध्रुवम् । सर्वत्रापि च सर्वदा च शुचिर्यस्यायमेव क्रमः, सोऽयं पञ्चनमस्क्रियेति जयति श्रीमन्त्रराजः क्षितौ ॥ छ ॥ ३७ ॥ साम्प्रतमन्त्यमङ्गलं जिनप्रवचनस्तवनरूपं कल्पवृक्षरूपकेणाह—" जिणवयण " गाहा–जिनवचनमेव कल्पवृक्षः सकलार्थिसार्थमनोरथप्रथापूरकत्वाज्जिनवचनकल्पवृक्षः स जयतीति सम्बन्धः ॥ अङ्गिनोऽनुगुणामङ्गरूपणा-(ता)माह—अनेकेऽनन्ता ये सूत्राणामर्थास्त एव शाखास्ताभिर्विस्तीर्णो विशालः । उक्तं चागमे—"सव्वनईणं जा होज्ज वालुया, सव्व-उदहिजं उदयं । एत्तो अणंतगुणिओ, अत्थो एक्कस्स सुत्तस्स ॥ " यद्वाऽनन्तत्वं सूत्रस्यापि सम्बध्यते, अनन्तगमत्वादागमसूत्राणाम् ।

तपांस्यनशनादीनि, नियमा–द्रव्यक्षेत्रकालभावाभिग्रहास्तपोनियमास्त एव कुसुमानां गुच्छाः–स्तबका यस्मिन् स तपोनियमकुसुमगुच्छः। सुगतिः–स्वर्गापवर्गौ तावेवानन्यसामान्यसुखरसपूर्णत्वात्फलं तद्‌बध्नाति–करोति यः स सुगतिफलबन्धनो जयति–सकलागमोत्कर्षेण वर्त्तते। तदुक्तम्—"जह तरुसु कप्परुक्खो, मणीसु चिंतामणी अइमहग्घो। तह इयरसयलधम्माण, मज्झयारंमि जिणधम्मो" ॥१॥३८॥ साम्प्रतं येषामिदं योग्यं तानभिधित्सुराह—"जुग्गा" गाहा वैराग्येण चरन्तीति वैराग्यिकास्ते श्रावका अपि स्युस्तद्व्यवच्छेदाय विशिनष्टि, सुसाधुत्वेन वैराग्यिकाः संविग्नाः-सद्यतयस्तेषां योग्या पठितुं-श्रोतुं-व्याख्यातुं चोपदेशमालेयम्। परलोकोपस्थायिधर्ममार्गे प्रस्थिताः प्रस्थानं कृतवन्तो यतिधर्माभिलाषुका अद्यापि गृहवासं मोक्तुमशक्ताः सुश्रावकास्तेषां च योग्याः। तथा संविग्नपाक्षिकाः प्रागुक्त-लक्षणास्ते हि तत्र मार्गे गच्छन्तोऽपि श्रान्ताः शरीरप्रवृत्त्या, चित्तवृत्त्या तु तत्र प्रतिबद्धा गच्छतोऽन्यान् बहुमन्यमानाश्च तेषां च योग्या ततो दातव्यैव ॥ सर्वेषां किं विशिष्टानां बहुश्रुतानां स्वस्वोचितबहुश्रुतशालिनामित्यर्थः ॥ ५३९ ॥ उपदेशसमाप्तौ च वयमपीदं पूज्यसूक्तेन ब्रूमः—एसो धम्मोवएसो निबिडतमभरुत्तारतारप्पईवो, एसो धम्मोवएसो मयमयणमहावाहिनासोसही य। एसो धम्मोवएसो सिवसुहभवणारोहसोवाणसेणी, एसो धम्मोवएसो भवियजण तओ ता(ना)वणिज्जो मणाओ ॥ इतश्चतस्रः प्रक्षेपगाथा व्याख्यायन्ते—तत्र आद्यां तावत् बालाबालदीनामपि प्रकरणकर्तृनामावधिगमायाह—

केषामियं दातव्या ?।

इय धम्मदासगणिणा, जिणवयणुवएसकज्जमालाए। मालव्व विविहकुसुमा, कहिआ य सुसीसवग्गस्स ॥ ५४० ॥
संतिकरी वुड्ढिकरी, कल्लाणकरी सुमंगलकरी य। होइ कहगस्स परिसाए, तह य निव्वाणफलदाई ॥ ५४१ ॥
इत्थ समप्पइ इणमो, मालाउवएसपगरणं पगयं। गाहाणं सव्वाणं, पंचसया चेव चालीसा ॥ ५४२ ॥
जाव य लवणसमुद्दो, जाव य नक्खत्तमंडिओ मेरू। ताव य रइआ माला, जयम्मि थिरथावरा होउ ॥ ५४३ ॥

इत्येषा प्रकृतोपदेशमाला धर्मदासगणिमहर्षिणा कथिता शिष्यवर्गस्येति सम्बन्धः। किं स्वातन्त्र्येण ? नेत्याह—जिनवचनोपदे-

श्यानां कार्याणां या माला तस्याः सम्बन्धित्वेन तस्या वा सकाशात् । अत्रोपमानं मालेव विविधकुसुमा । यथा ह्येषा सौरभादिगुणग्रामाभिरामतया सर्वेषामुपादेया एवमुपदेशमाला ऽपीति ॥ ४० ॥ द्वितीया त्वाशीर्वादायेयं गाथा—" संतिकरी " इत्यादि ॥ उपस्थितदुरितोपशान्तिकारिणी धर्मसाधनसामग्र्या वृद्धिकारिणी ऐहलौकिकसकलकल्याणकारिणी पारलौकिकसकलसन्मङ्गलकारिणी च । क्रमेण–परम्परया निर्वाणफलदायिनी च भवतु, कस्येत्याह—कथकस्य–सूत्राध्यापकस्य–व्याख्यातुश्च ॥ ५४१ ॥ तृतीया समाप्त्याभिधानपूर्वकं ग्रन्थसंख्यानाय—" एत्थ " गाहा । अत्र जिनशासने समाप्यते–समर्थ्यते एतत् । मालया–परम्परया उपदेशा मालोपदेशास्तेषां प्रकरणमुपदेशमालाप्रकरणमित्यर्थः ॥ ४२ ॥ द्विचत्वारिंशदधिकानि गाथानां पञ्चशतानि (५४२) ग्रन्थमानम् । चतुर्थी तु श्रुतज्ञानस्याशीर्वादाय—" जावय " गाहा । यावल्लवणसमुद्रोऽयं वेलाभिः पोप्लूयते । यावच्च नक्षत्रैरन्तर्वर्त्तिभिर्मण्डितो मेरुः प्रभासते । यावच्चैतौ चन्द्रादित्यौ द्योतेते तावदिदं श्रुतज्ञानमुपदेशमालाख्यं सकलं वा श्रुतज्ञानं भवत्वित्याशिषि पञ्चमी भवतादस्खलितं नन्दतादित्यर्थः ॥ ४३ ॥ समुद्रादीनां प्लवनादयश्चात्र क्रियाः प्रसिद्धेरेव लभ्यन्ते ॥ यथा मा भवन्तमनलः पवनो वा वारणो मदकलः कलभो वा । वज्रमिन्द्रकरविप्रसृतं वा स्वस्ति तेऽस्तु लतया सह ॥ वृक्षेत्यत्राधाक्षीद्धाङ्क्षीदित्यादि क्रियाणामनुपात्तानामप्यवगमः । एवं प्रस्तुतेऽपि तत्तत्क्रियासिद्धिः ॥ ५४३ ॥

## ॥ इतिश्रीरत्नप्रभसूरिविरचितायामुपदेशमालाविशेषवृत्तौ चतुर्थो विश्रामः ॥

D प्रतौ समाप्त इति भद्रं ॥ शुभमस्तु ॥ विक्रमाद्वसुलोकार्के वर्षे माघे समर्थिता । एकादश सहस्राणि मानं सार्धशतं तथा । अंकतोऽपि ग्रंथाग्रं ११११५० तथा सूत्रगाथा ५४३ । एवं संपादिकायां ग्रंथाग्रं ६७९ एवं ग्रंथाग्रं ११८२९ ॥छ॥ संवत १५८६ वर्षे पोष वदि १३ दिने उपदेशमालावृत्ति लिखिता ॥ B प्रतौ सार्द्ध द्वौ श्लोकाः प्रशस्तिः चास्ति १ D प्रतौ प्रशस्तिः नास्ति ।

## ॥ व्याख्याकारप्रशस्तिः ॥

नानारूपनरोत्तमैकवसतिर्नीरागतासंगतः, पातालं परितः स्फुरन्निह बृहद्गच्छोऽस्ति रत्नाकरः । स श्रीमन्मुनिचन्द्रसूरिसुगुरुस्तत्राभवद्भूरिभिः, शाखाभिर्भुवि यः प्रयागवटवद्विस्तारमुद्रामगात् ॥ १ ॥ साहित्यतर्कागमलक्षणेषु, यद्ग्रन्थवीथीकविकामधेनुः । कस्योपकारं न चकार सम्यक्, निःशेषदेशेषु च यद्विहारः ॥ २ ॥ शिष्यः श्रीमुनिचन्द्रसूरिगुरुभिर्गीतार्थचूडामणिः, पट्टे स्वे विनिवेशितस्तदनु स श्रीदेवसूरिप्रभुः । आस्थाने जयसिंहदेवनृपतेर्येनास्तदिग्वाससा, स्त्रीनिर्वाणसमर्थनेन विजयस्तम्भः समुत्तम्भितः ॥ ३ ॥ तत्पट्टप्रभवोऽभवन्नथ गुणग्रामाभिरामोदयाः, श्रीभद्रेश्वरसूरयः शुचिधियस्तन्मानसप्रीतये । श्रीरत्नप्रभसूरिभिः शुभकृते श्रीदेवसूरिप्रभोः, शिष्यैः सेयमकारि सम्मदकृते वृत्तिर्विशेषार्थिनाम् ॥ ४ ॥ श्रीदेवसूरिशिष्यभ्रातॄणां विजयसेनसूरीणाम् । आदेशस्यानृणभाव-मगममेतावताहमिह ॥ ५ ॥ यदियमुपदेशमाला, श्रावकलोकस्य मूलसिद्धान्तः । प्रायेण पठति चायं, तदिहास्माभिः कृतो यत्नः ॥ ६ ॥ व्याख्यातृचूडामणिसिद्धनाम्नः, प्रायेण गाथार्थ इहाभ्यधायि । क्वचित्क्वचिद्यातु विशेषरेखा, सद्भिः स्वयं सा परिभावनीया ॥ ७ ॥ यदिह किंचिदनागमिकं क्वचिद्विरचितं मतिमन्दतया मया । तदखिलं सुधियः क्षमयामि च कृतकृपाः परिशोधयतादरात् ॥ ८ ॥ स्वस्य परस्य च सूक्तैर्वृत्ति-र्विस्तारिता चकास्तीयम् । मणिखण्डमण्डलैरिव, सुवर्णपूजा जिनेन्द्राणाम् ॥ ९ ॥ प्रकृता समर्थिता च, श्रीवीरजिनाग्रतो भृगुपुरेऽसौ । अश्वावबोधतीर्थे श्री-सुव्रतपर्युपास्तिवशात् ॥ १० ॥ संशोधिता च संनिहित-कतिपयैः सहृदयैरियं प्रायः । पुनरपि कण्टकशुद्धिः, कार्या वः प्रार्थये सर्वान् ॥ ११ ॥ भास्वद्भास्वरकान्तकान्ततिलकं प्रक्षिप्तवक्त्राकृतं, निर्यन्नोर(ल)शिलातलासुपटलीदुर्वारदूर्वाङ्कुरम् । यावन्मेरुमहीभृतं(धरं) प्रतिकरोत्यारात्रिकोत्तारणं, ताराभिर्द्युविलासिनी विजयतां तावन्नवैषा कृतिः ॥ १२ ॥ विक्रमाद्वसुलोकार्क-(१२३८) वर्षे माघे समर्थिता । एकादशसहस्राणि, मानं सार्द्धशतं तथा ॥ १३ ॥ ११९५०

॥ शुभमस्तु लेखकपाठकयोः ॥ इति व्याख्याकारप्रशस्तिः समाप्ता ।

नमः श्री वर्द्धमानाय, वर्द्धमानाय वेदसा। वेदसारं परब्रह्म-ब्रह्मबद्धस्थितिश्चयः ॥ १ ॥ स्वबीजगुप्तं कृतिभिः कृषीवलैः, क्षेत्रेषु सिक्तं शुभभाववारिणा। क्रियते यस्मिन् स फलशिवश्रिया, पुरं तदत्रास्ति दयावटाभिधम् ॥ २ ॥ ख्यातस्तत्रास्ति वस्तुप्रगुणगुणगणः प्राणिरक्षैकदक्षः, सज्ज्ञाने लब्धलक्ष्यो जिनवचनरुचिश्चञ्चदुच्चैश्चरित्रः। पात्रं पात्रिकचूडामणिजिनसुगुरूपासनावासनायाः, संघः सुश्रावकाणां सुकृतमतिरमी सन्ति तत्रापि मुख्याः ॥ ३ ॥ होनाकः सज्जनज्येष्टः, श्रेष्ठो कुमरसिंहकः। सोमाकः श्रावकश्रेष्टः, शिष्टधीररिसिंहकः ॥ ४ ॥ कडुयाकश्च सुश्रेष्ठी, साङ्गाकः इति सत्तमः। खीम्वाकः सुहडाकश्च, धर्मकर्मैककर्मठः ॥ ५ ॥ एतन्मुखः श्रावकसंघ एषो, ऽन्यदा वदान्यो जिनशासने सः। सदा सदाचारविचारचारु,-क्रियासमाचारशुचिव्रतानाम् ॥ ६ ॥ श्रीमज्जगच्चन्द्रमुनीन्द्रशिष्य-श्रीपूज्यदेवेन्द्रमुनीश्वराणाम। तदाद्यशिष्यत्वभृतां च विद्या-नन्दाख्यविख्यातमुनिप्रभूणाम् ॥ ७ ॥ तथा गुरुणां सुगुणैर्गुरूणां, श्रीधर्मघोषाभिधसूरिराज्ञाम्। संदेशनामेवमपापभावां, शुश्राव भावावनतोत्तमाङ्गः ॥८॥ विषयसुखपिपासोर्गेहिनः क्वास्तिशीलं, करणवशगतस्य स्यात्तपो वाऽपि कीदृग्। अनवरतमदभ्रारम्भिणो भावनाः कास्तदिह नियतमेकं दानमेवास्य धर्म्मः ॥ ९ ॥ किंच—धर्मः स्फूर्जति दानमेव गृहिणां, ज्ञानाभयोपग्रहैस्त्रेधा तद्वरमाद्यमत्र यदितो निःशेषदानोदयः। ज्ञानं चाद्य न पुस्तकैर्विरहितं दातुं च लातुं च वा, शक्यं पुस्तकलेखनेन कृतिभिकार्यस्तदर्थोऽर्थवान् ॥ १० ॥ श्रुत्वेति संघसमवायविधीयमान,-ज्ञानार्चनोद्भवधनेन मिथः प्रवृद्धिम्। नीतेन पुस्तकमिदं श्रुतकोशवृद्धयै, बद्धवा (?) दरश्चिरमलेखयदेष हृष्टः ॥ ११ ॥ यावज्जिनमतभानु-प्रकाशिताशेषवस्तुविस्तारः। जगति जयतीह पुस्तकमिदं बुधैर्वाच्यतां तावत् ॥ १२ ॥ शुभं भवतु लेखकपाठकयोः ॥

**॥ समाप्ता सवृत्तिरुपदेशमाला ॥**

इति श्रीमहावीरप्रभु हस्तदीक्षित धर्मदासगणिकृता
वादिदेवसूरि पट्टालङ्कार श्रीरत्नप्रभसूरिविरचिता
दोघट्टी–विशेषवृत्ति समलङ्कृता

# ॥ श्री उपदेशमाला ॥

इति आनन्द–हेम–जैन ग्रन्थमाला ग्रन्थाङ्कः–६ ।